DPN 6920

Title : प्रज्ञापारमिता / PRAGÑĀ PĀRAMITĀ

Run. No. 7645 Cat. No. Micro. No.

Subject दर्शन Philosophy Religion : Hindu / [✓ Bauddha]

Language : [✓ Skt.] / New. / Nep. / Skt.- New. / Maith.- New. / New.- Nep. /

Size in cms. 17·5 × 36·5 Folios 342 (1-79, 90-101, 103, 106-145) (35-342) ? Lines (in a page) 16

[✓ Compl.] / Incompl. Chapt. / act /

Author / translator Scribe / [✓ donor] सुगतदास तुलाधर

Date: NS / SS / VS / KS Ruler / place Sugatā Dasa Tuladhar.

Script : [✓ New.] / Dev. / Bhuj. / Ran. / Illus. :

Material : palmleaf / [✓ paper] / thyasaphu / yellow

Condition : [✓ fine] / [✓ damaged] by worms, rats, [✓ water] /

[✓ Beginning], [✓ colophon], [✓ post-colophon] :

Beg. ॐ नमः श्री सर्वबुद्ध बोधिसत्वाय श्रावक प्रत्येक बुद्धेभ्यः ॥

P.T.O.

या सर्वज्ञतया नयत्पपसमं शान्तैषिण: श्रावकां
या मार्गज्ञतया जगद्धित कृता लोकार्थ संप्रायिका ॥
सर्वाकारमिदं वदन्ति मुनयो विश्वं यया संगता
तस्यै श्रावक बोधिसत्व गणिनो बुद्धस्य मात्रे नम: ॥

Folio-130, आर्य्य पंचविंशति साहस्रिकायां भगवत्या प्रज्ञापारमिताया अभिसमयालंकारानुसारेण संसोधतायां सर्वाकाराधिकार सुभूति परिवर्त: प्रथम: ॥

···· शक्र परिवर्तो नाम द्वितीय: ॥

F. 257. शत साहस्र्या प्रज्ञापारमिताया: परिवर्त: द्वितीय: ॥
F. 266. शत साहस्र्या प्रज्ञापारमिताया: परिवर्त: तृतीय: ॥
F. 270. शत साहस्र्या: प्रज्ञापारमिताया अवैवर्त्यकार लिङ्ग परिवर्त: चतुर्थ: ॥
F. 283. शत साहस्र्या: प्रज्ञापारमिताया: परिवर्त: षष्ठम: ॥
F. 288. " " " " सप्तम: ॥
F. 289. " " " " अष्टम: ॥

F. 311 शत साहस्र्याः प्रज्ञापारमितायाः परिवर्त पञ्च चत्वरिंशाति तमः॥

F. 315. " " " " दशमः॥

F. 332. " " " " पञ्चमः॥

F 338. " " " " एकादशमः॥

F. 342. शात सहस्र्याः प्रज्ञापारमितायाः द्वादशः परिवर्तः प्रथम खण्डः समाप्त इति॥ ॥

अनेन सद्धर्म रसामृतेन, सर्वज्ञ वक्त्रयाद्द वशी तलेन॥
क्लेशानला प्रज्वलितातुरस्य, लोकस्य दुःखं प्रशमोस्तु नित्यं॥
शुभमस्तु॥ ॥शुभम्॥

१धुमयस्यक्नानं पिंसं आविस तयाम्नाचनस (गिआ) सयाविक्षपमाताब्वनभसा ३२६ पत्र छ ।
नवानान याआल ३२६ – ८ थो ।
बोधिसत्वपिसं स्वप्रानेदशाकुशलरोगजीमप्यू – २७० थ्वे १८ थो
[illegible] याबुद्धपिसं आ।अजन्दत्वातवानसम्मगुहताया[illegible] २५० थ्वे ११ थो.
बुद्धपिसंजन्मनहें [illegible] दिनत्याम प्राप्तादेवले धर्मव्याख्यानयाम्हमा. २५ – १२ थो .
वेचमसूयाअथ – १६ – थ्वे ७ थो
[illegible] पाविदियाअर्थ – ३८ – " ६ "
बोधिसत्व महायानं नेमयू – ११ – २
लोकेद बोधिनार धनायगुलि – १३८ – ४
धर्मे स्वप्न भाले सिन दु:रव ओन – २५ – ७
प्रज्ञापारमिता[illegible]भावना – २५ – ११
[illegible] धर्मचित्रयाम् – २६ – ५
[illegible] धर्म नियरिता प्राप्ति कामनार्थ – १४५ – १ – ५
[illegible] मयाति नियन्न हं निर्वाणगुडु – १४८ – ६
भावासंक्षिप्त वर्णन – – १४४ – थ्वे – ४ – १५
स्वर व्यञ्जन वर्णार्थतत्वभावना – – १०८ थ्वे २

आनन्दमान सुगत शासना संकलन
[illegible] बन्धु-कुलवाव उपहार ।

प्रथमखण्ड

[illegible] सुगत दासया संकलन
बाबा बहु-[illegible] उपहार।

१ ॐ नमः श्रीसर्व्वबुद्धबोधिसत्वार्य्यश्रावकप्रत्येकबुद्धेभ्यः॥ ॥ यासर्व्वज्ञतयानयत्युपसमं शान्तैषिणः श्रावकां यामार्ग्गज्ञतयाजगद्धितकृतां लोकार्थसंपादिका सर्व्वाकारमिदं वदन्तिमुनयोविश्वंययासंगता॥ तस्यैश्रावकबोधिसत्वगणिनोबुद्धस्यमात्रेनमः॥ यदस्ति लोके मनन्तकल्पकोटिभिः प्रसन्नधर्म्मैरपि हेतुवर्ज्जितानां॥ एवं तु हि जिनानां निःसृतं यदिदमिदं प्रतिपत्तुं तद्यानं गम्भीरञ्च नचास्यैर्दुर्ल्लभज्ञः सूत्रविविनं च तन विनाभाजनस्मात्तीनवमादज्ञात्॥ नमोभगवते भैषज्यगुरुवैडूर्य्यप्रभायतथागताय॥ नमोभगवत्यैप्रज्ञापारमितायै॥ नमश्चार्य्यावलोकितेश्वराय बोधिसत्वाय महासत्वाय महाकारुणिकाय॥ नमश्चण्डवज्रपाणये महायक्षसेनापतये नमः सर्व्वबुद्धबोधिसत्वेभ्यो भगवद्भ्यः॥ निराश्रवाः सर्व्वसत्वानां कुशलसवीर्यायोगेः संवलकिसिद्धार्थ्यं गौतमनाथागतं। प्रतिलभन्तां सर्व्वसत्वानां सुखसौमनस्यसहितं निर्व्विनमोभगवतेअमिताभायप्रतिमण्डितविशुद्धबुद्धघोषेश्वरराजायतथागताय॥ नमोभगवतेशाक्यमुनयेतथागतायार्हते सम्यक्सम्बुद्धायययस्यायंधर्म्मोत्कोशोमनि॥ ॥ एवम्मयाश्रुतमेकस्मिंसमयेभगवान्राजगृहेविहरतिस्म॥ गृध्रकूटपर्व्वते महताभिक्षुसंघेन सार्द्धं पञ्चमात्रैर्भिक्षुसहस्रैः सर्व्वैरर्हद्भिः॥ क्षीणाश्रवैर्निःक्लेशैर्वशीभूतैः सुविमुक्तचित्तैः सुविमुक्तप्रज्ञैराजानेयैर्महानागैः कृतकृत्यैः कृतकरणीयैः॥ अपहृतभारैरनुप्राप्तस्वकार्थैः परिक्षीणभवसंयोजनैः सम्यगाज्ञासुविमुक्तचित्तैः सर्व्वचेतोवशिपरमपारमिताप्राप्तैरेकपुद्गलस्थापयित्वा। यदुतायुष्मन्तमानन्दं शैक्षं स्रोतआपन्नं। पञ्चमात्रैश्च भिक्षुणीशतैः॥ यशोधरामहाप्रजापतीप्रमुखैः संबहुलैश्च। उपासकोपासिकाभिश्च सर्व्वैर्दृष्टधर्म्मभिः। महता च बोधिसत्वसंघेन सार्द्धं अप्रमेयेनासंख्येयेन बोधिसत्वैर्म्महासत्वैः सर्व्वैर्धारणीमुखप्रतिलब्धैः शून्यतानिमित्ताप्रणिहितविहारिभिरनिमित्तगोचरैरविकल्पिकप्रणिधानैः सर्व्वधर्म्मसमताक्षान्तिप्रतिलब्धैरसंगप्रतिधानेनासंगप्रतिभानसमन्वागतैर्जयप्रतिनिर्देशप्रतिनिर्देशैः प्रतिसम्बिन्नयप्रतिविद्धैः महाभिज्ञाविक्रीडितैरत्यक्तासूयानिक्षेपिनादेयवचनेनकृशीदैरनाच्छेद्यवीर्य्यैः। कायजीवितनिरपेक्षैरकुहकैरलपकैरपगतज्ञानलाभचित्तैर्निरामिषधर्म्मदेशकैर्गम्भीरध

र्म्मक्षान्तिपारमितागतैर्महावैशारद्यप्राप्तैरसंकुचितमानसैः सर्व्वमारकर्म्मसमतिक्रान्तैः कर्म्मावरणप्रतिप्रस्रब्धैर्निहतकर्म्मक्लेशप्रत्यर्थिकैः सर्व्वपरप्रवादानभिभूतैः सर्व्वश्रावकप्रत्येकबुद्धदुरवगाहैः कर्म्मप्रविचयविलोकितनिर्देशकुशलैरसंख्येयकल्पसमानप्रतिधानैः स्मितमुखैः पूर्व्वाभिलापिभिर्व्यपगतभ्रुकुटिकैः शुक्लमधनवचनेगाथाभिगीतमन्त्रालपनकुशलैरनाच्छेद्यप्रतिभानेनानर्कान्तपर्षदभिभवनवैशारद्यसमन्वागतैरनन्तकल्पकोटिनिर्देशज्ञानिभिः सन्नद्धकुशलैर्मायायानमरीचिदकचन्द्रस्वप्नप्रतिश्रुत्काप्रतिभासगन्धर्व्वनगरप्रतिविम्बनिर्माणोपमधर्माधिमुक्तैरपगतसंलीनचित्तैः सर्व्वसत्वचित्तगतिसूक्ष्मज्ञानचर्य्याधिमुक्त्यवतारणकुशलैः सर्व्वसत्वाप्रतिहतचित्तैः। अधिमात्रक्षान्तिसमन्वागतैः सर्व्वधर्म्मसमताप्रतिवेधज्ञानकुशलैर्गम्भीरधर्म्मतादुरवगाहैः स्वचित्तवशिताप्रतिलब्धैः सर्व्वधर्म्मवशिताप्राप्तैः सर्व्वकर्म्मक्लेशदृष्ट्यावरणविमुक्तैः प्रतीत्यनिर्देशकुशलैर्गम्भीरप्रतीत्यसमुत्पादावतारनयावतीर्णैः सर्व्वदृष्टानुशयपर्य्युत्थानविगतैः सर्व्वसंयोजनप्रहीणैः सत्यप्रतिवेधज्ञानकुशलैः सततसमितप्रतियुक्तासमसर्व्वधर्माधिमुक्तैः। अप्रमाणधर्म्मनयनिर्देशवैशारद्ययोवज्रावतारज्ञानकुशलैः॥ अनन्तबुद्धक्षेत्रव्यूहप्रणिधानप्रस्थानपरिगृहीतैरसंख्येयलोकधातुगताबुद्धानुस्मृतिसमाधितत्समितामिमुखीभूतैः सर्व्वबुद्धोत्पादोपसंक्रमणकुशलैरपरिमितबुद्धाध्येषणकुशलैर्नानादृष्टिपर्य्युत्थानसर्व्वक्लेशप्रशमनकुशलैः समाधिशतसहस्रविक्रीडितज्ञानप्रवेशकुशलैः। अपर्य्यन्तकल्पाकौशलगुणसमन्वागतैः॥ तद्यथा भद्रपालेन च नाम बोधिसत्वेन महासत्वेन। रत्नाकरेण च बोधिसत्वेन महासत्वेन। रत्नगर्भेण च बोधिसत्वेन महासत्वेन। रत्नदत्तेन च बोधिसत्वेन महासत्वेन। सुसार्थवाहेन च बोधिसत्वेन महासत्वेन। नरदत्तेन च बोधिसत्वेन महासत्वेन। गुह्यगुप्तेन च बोधिसत्वेन महासत्वेन। वरुणदत्तेन च बोधिसत्वेन महासत्वेन। इन्द्रदत्तेन च बोधिसत्वेन महासत्वेन। भद्रपालेन च बोधिसत्वेन महासत्वेन। उत्तरमतिना च बोधिसत्वेन महासत्वेन। विशेषमतिना च बोधिसत्वेन महासत्वेन। वर्द्धमानमतिना च बोधिस

प्रथमखण्ड

त्वेन महासत्वेन। अनन्तमतिना च बोधिसत्वेन महासत्वेन। अमोघदर्शिना च बोधिसत्वेन महासत्वेन। अनावरणमतिना च बोधिसत्वेन महा
सत्वेन। सर्वसंग्रहिणेन च बोधिसत्वेन महासत्वेन। सुविक्रान्तविक्रामिना च बोधिसत्वेन महासत्वेन। अनन्तवीर्येण च बोधिसत्वेन महास
त्वेन। नित्योद्युक्तेन च बोधिसत्वेन महासत्वेन। नित्यप्रयुक्तेन च बोधिसत्वेन महासत्वेन। अनिक्षिप्तधुरेण च बोधिसत्वेन महासत्वेन। सूर्य
गर्भेण च नाम बोधिसत्वेन महासत्वेन। चन्द्रगर्भेण च बोधिसत्वेन महासत्वेन। अनुपममतिना च बोधिसत्वेन महासत्वेन। अवलोकितगर्भे
ण च बोधिसत्वेन महासत्वेन। महास्थामप्राप्तेन च बोधिसत्वेन महासत्वेन। मञ्जुश्रिया च बोधिसत्वेन कुमारभूतेन च महासत्वेन॥
मारबलप्रमर्दिना च बोधिसत्वेन महासत्वेन। वज्रमतिना च बोधिसत्वेन महासत्वेन। रत्नमुद्राहस्तेन च बोधिसत्वेन महासत्वेन। नित्योत्क्षि
प्तहस्तेन च बोधिसत्वेन महासत्वेन। महाकरुणाचिन्तिना च बोधिसत्वेन महासत्वेन। महाव्यूहेन च बोधिसत्वेन महासत्वेन। प्रहर्षणेन
च बोधिसत्वेन महासत्वेन। मन्त्रकूटेन च बोधिसत्वेन महासत्वेन। मैत्रेयेण च बोधिसत्वेन महासत्वेन॥ एवंप्रमुखैरनेकैर्बोधिस
त्वकोटीनियुतशतसहस्रैः॥ अथ खलु भगवांस्तस्यां वेलायां स्वयमेव सिंहासनं प्रज्ञापयन्न्यषीदत्॥ पर्यङ्कमाभुज्य ऋजुं कायं प्र
णिधाय प्रतिमुखं स्मृतिमुपस्थाप्य तत्र निषद्य सर्वसमाधिराजो नाम समाधिं समापन्नोऽभूत्। यत्र समाधौ समाधयोऽन्तर्गता अनुप्रविष्टाः स
र्वे समवसरणं गच्छन्ति॥ अथ खलु भगवांस्मृतः संप्रजानं स्मृतः समाधेर्व्युत्थायादिव्यनयनेन कृषदं वृद्ध ऊर्ध्वं व्यवलोकयति स्म। व्यवलो
क्य सर्वकायान्प्रशान्तामद्भुतरूपा धस्मान्पादतलयोः सहस्रारात्स्याश्चक्रास्यां षष्टिषष्टीरश्मिकोटीनियुतशतसहस्राणि निश्चरन्ति स्म॥
दशभ्यश्च पादाङ्गुलिभ्यः षष्टिषष्टीरश्मिकोटीनियुतशतसहस्राणि निश्चरन्ति स्म। तस्यां गुल्फस्यां षष्टिषष्टीरश्मिकोटीनियुतशतस
हस्राणि निश्चरन्ति स्म। तस्यां जङ्घायां षष्टिषष्टीरश्मिकोटीनियुतसहस्राणि निश्चरन्ति स्म। तस्यां जानुस्यां षष्टिषष्टीरश्मिको
टीनियुतशतसहस्राणि निश्चरन्ति स्म। तस्यां मूत्रस्यां षष्टिषष्टीरश्मिकोटीनियुतशतसहस्राणि निश्चरन्ति स्म। कट्याः षष्टिष

टीरश्मिकोटीनियुतशतसहस्राणि निश्चरन्ति स्म॥ नाभिमण्डलात् षष्टिषष्टीरश्मिकोटीनियुतशतसहस्राणि निश्चरन्ति स्म। तस्यां पार्श्व
स्यां षष्टिषष्टीरश्मिकोटीनियुतशतसहस्राणि निश्चरन्ति स्म॥ हृदयश्रीवत्सान्महापुरुषलक्षणात् षष्टिषष्टीरश्मिकोटीनियुतश
तसहस्राणि निश्चरन्ति स्म। दक्षिणहस्ताङ्गुलिभ्यः षष्टिषष्टीरश्मिकोटीनियुतशतसहस्राणि निश्चरन्ति स्म॥ तस्यां बाहुस्यां षष्टि
षष्टीरश्मिकोटीनियुतशतसहस्राणि निश्चरन्ति स्म॥ तस्यामंशस्यां षष्टिषष्टीरश्मिकोटीनियुतशतसतसहस्राणि निश्चरन्ति स्म॥ ग्रीवायाः षष्टि
षष्टीरश्मिकोटीनियुतशतसहस्राणि निश्चरन्ति स्म॥ वामहस्ताङ्गुलिभ्यः षष्टिषष्टीरश्मिकोटीनियुतशतसहस्राणि निश्चरन्ति स्म॥ चत्वारिंश
द्दन्तेभ्यः षष्टिषष्टीरश्मिकोटीनियुतशतसतसहस्राणि निश्चरन्ति स्म॥ तस्याश्रुस्यां षष्टिषष्टीरश्मिकोटीनियुतशतसहस्राणि निश्चरन्
ति स्म॥ तस्यां श्रोत्रस्यां षष्टिषष्टीरश्मिकोटीनियुतशतसहस्राणि निश्चरन्ति स्म॥ तस्यां घ्राणस्यां षष्टिषष्टीरश्मिकोटीनियुतशतसहस्रा
णि निश्चरन्ति स्म॥ मध्यभ्रूवातुर्णायाः षष्टिषष्टीरश्मिकोटीनियुतशतसहस्राणि निश्चरन्ति स्म॥ उपरिष्टादुष्णीषात् षष्टिषष्टीरश्मिको
टीनियुतशतसहस्राणि निश्चरन्ति स्म॥ मुखद्वारात् षष्टिषष्टीरश्मिकोटीनियुतशतसहस्राणि निश्चरन्ति स्म॥ सर्वाङ्गेभ्यो गात्रेभ्यो रश्मिकोटीनियुतश
तसहस्राणि निश्चरन्ति स्म॥ सर्वावन्तमिमं त्रिसाहस्रमहासाहस्रं लोकधातुं महतावभासेन स्फुरित्वा॥ पूर्वस्यां दिशि गङ्गानदीवालुकोपमां लोक
धातुं महतावभासेन स्फुरन्ति स्म॥ दक्षिणस्यां दिशि गङ्गानदीवालुकोपमां लोकधातुं महतावभासेन स्फुरन्ति स्म॥ पश्चिमायां दिशि गङ्गान
दीवालुकोपमां लोकधातुं महतावभासेन स्फुरन्ति स्म॥ उत्तरस्यां दिशि गङ्गानदीवालुकोपमां लोकधातुं महतावभासेन स्फुरन्ति स्म
उत्तरपूर्वस्यां दिशि गङ्गानदीवालुकोपमां लोकधातुं महतावभासेन स्फुरन्ति स्म॥ पूर्वदक्षिणस्यां दिशि गङ्गानदीवालुकोपमां लो
कधातुं महतावभासेन स्फुरन्ति स्म॥ दक्षिणपश्चिमायां दिशि गङ्गानदीवालुकोपमां लोकधातुं महतावभासेन स्फुरन्ति स्म॥ प
श्चिमोत्तरस्यां दिशि गङ्गानदीवालुकोपमां लोकधातुं महतावभासेन स्फुरन्ति स्म॥ अधस्ताद्दिशि गङ्गानदीवालुकोपमां लोक

प्रथमखंड

धातुं महतावभासेन स्फरन्ति स्म॥ उपरिष्टाद्दिशि गंगानदीवालुकोपमां लोकधातुं महतावभासेन स्फरन्ति स्म॥ ये च सत्वैः सोऽवभासो दृष्टो यच्च तेनावभासेन स्पृष्टास्ते सर्वे नियता अभूवन्ननुत्तरायां सम्यक्सम्बोधौ॥ ॥ अथ खलु भगवान् पुनरेव सर्वरोमकूपेभ्यः प्रभां मुमोच यया प्रभयायं त्रिसाहस्रमहासाहस्रो लोकधातुर्महतावभासेन स्फुटोऽभूत्॥ पूर्वस्यां दिशि गंगानदीवालिकोपमा लोकधातवो महतावभासेन स्फुटा अभूवन्॥ दक्षिणस्यां दिशि गंगानदीवालिकोपमा लोकधातवो महतावभासेन स्फुटा अभूवन्॥ पश्चिमायां दिशि गंगानदीवालिकोपमा लोकधातवो महतावभासेन स्फुटा अभूवन्॥ उत्तरस्यां दिशि गंगानदीवालिकोपमा लोकधातवो महतावभासेन स्फुटा अभूवन्॥ उत्तरपूर्वस्यां दिशि गंगानदीवालिकोपमा लोकधातवो महतावभासेन स्फुटा अभूवन्॥ पूर्वदक्षिणस्यां दिशि गंगानदीवालिकोपमा लोकधातवो महतावभासेन स्फुटा अभूवन्॥ दक्षिणपश्चिमायां दिशि गंगानदीवालिकोपमा लोकधातवो महतावभासेन स्फुटा अभूवन्॥ पश्चिमोत्तरस्यां दिशि गंगानदीवालिकोपमा लोकधातवो महतावभासेन स्फुटा अभूवन्॥ अधस्ताद्दिशि गंगानदीवालिकोपमा लोकधातवो महतावभासेन स्फुटा अभूवन्॥ उपरिष्टाद्दिशि गंगानदीवालिकोपमा लोकधातवो महतावभासेन स्फुटा अभूवन्॥ ये च सत्वैः सोऽवभासो दृष्टो यच्च तेनावभासेन स्पृष्टास्ते सर्वे नियता अभूवन्॥ अनुत्तरायां सम्यक्सम्बोधौ॥ अथ खलु भगवान् पुनरपि या सा तथागतस्य प्रकृतिप्रभा तया प्रभयायं त्रिसाहस्रमहासाहस्रं लोकधातुं महतावभासेन स्फरन्ति स्म॥ पूर्वस्यां दिशि गंगानदीवालुकोपमां लोकधातूंस्तेन महतावभासेन स्फरन्ति स्म॥ दक्षिणस्यां दिशि गंगानदीवालिकोपमां लोकधातूंस्तेन महतावभासेन स्फरन्ति स्म॥ पश्चिमायां दिशि गंगानदीवालिकोपमां लोकधातूंस्तेन महतावभासेन स्फरन्ति स्म॥ उत्तरस्यां दिशि गंगानदीवालिकोपमां लोकधातूंस्तेन महतावभासेन स्फरन्ति स्म॥ उत्तरपूर्वस्यां दिशि गंगानदीवालिकोपमां लोकधातूंस्तेन महतावभासेन स्फरन्ति स्म॥ पूर्वदक्षिणस्यां दिशि गंगानदीवालिकोपमां लोकधातूंस्तेन महतावभासेन स्फरन्ति स्म॥ दक्षिणपश्चिमा

३

यां दिशि गंगानदीवालुकोपमां लोकधातूंस्तेन महतावभासेन स्फरन्ति स्म॥ पश्चिमोत्तरस्यां दिशि गंगानदीवालुकोपमां लोकधातूंस्तेन महतावभासेन स्फरन्ति स्म॥ अधस्ताद्दिशि गंगानदीवालिकोपमां लोकधातूंस्तेन महतावभासेन स्फरन्ति स्म॥ उपरिष्टाद्दिशि गंगानदीवालिकोपमां लोकधातूंस्तेन महतावभासेन स्फरन्ति स्म॥ ये च सत्वैः सोऽवभासो दृष्टो यच्च तेनावभासेन स्पृष्टास्ते सर्वे नियता अभूवन्॥ अनुत्तरायां सम्यक्सम्बोधौ॥ अथ खलु भगवान् मुखद्वाराज्जिह्वेन्द्रियं निर्णाम्य इमं सर्वावन्तमिमं त्रिसाहस्रमहासाहस्रं लोकधातुं जिह्वेन्द्रियेण स्फुरित्वा स्मितं प्रादुष्कार्षीत्॥ ततश्च जिह्वेन्द्रियादनेकानि नानावर्णानि रश्मिकोटीनियुतशतसहस्राणि निश्चरन्ति स्म॥ सर्वेषु च रश्मीषु नानारत्नमयानि सुवर्णनिर्भासानि सहस्रपत्राणि पद्मानि संतिष्ठन्ते स्म॥ चित्राणि दर्शनीयानि मनापानि सुवर्णानि सुगन्धीनि मृदूनि काचिलिन्दिकसुखसंस्पर्शानि॥ तत्र च पद्मेषु तथागतविग्रहा निषण्णा धर्मं देशयन्ति स्म॥ यदुत इमामेव षट्पारमिताप्रतिसंयुक्तां धर्मदेशनां॥ ते पूर्वस्यां दिशि गंगानदीवालिकोपमां लोकधातुं गच्छन्ति स्म॥ तत्रापि गत्वा धर्मं देशयन्ति स्म॥ यदुतेमामेव षट्पारमिताप्रतिसंयुक्तां धर्मदेशनां। दक्षिणस्यां दिशि गंगानदीवालिकोपमां लोकधातुं गच्छन्ति स्म। तत्रापि गत्वा धर्मं देशयन्ति स्म। यदुतेमामेव षट्पारमिताप्रतिसंयुक्तां धर्मदेशनां। पश्चिमायां दिशि गंगानदीवालिकोपमां लोकधातुं गच्छन्ति स्म। तत्रापि गत्वा धर्मन्देशयन्ति स्म॥ यदुतेमामेव षट्पारमिताप्रतिसंयुक्तान्धर्मदेशनां। उत्तरस्यां दिशि गंगानदीवालिकोपमां लोकधातुं गच्छन्ति स्म। तत्रापि गत्वा धर्मन्देशयन्ति स्म॥ यदुतेमामेव षट्पारमिताप्रतिसंयुक्तां धर्मदेशनां उत्तरपूर्वस्यां दिशि गंगानदीवालिकोपमां लोकधातुं गच्छन्ति स्म॥ तत्रापि गत्वा धर्मं देशयन्ति स्म। यदुतेमामेव षट्पारमिताप्रतिसंयुक्तां धर्मदेशनां॥ पूर्वदक्षिणस्यां दिशि गंगानदीवालिकोपमां लोकधातुं गच्छन्ति स्म॥ तत्रापि गत्वा धर्मं देशयन्ति स्म॥ यदुतेमामेव षट्पारमिताप्रतिसंयुक्तां धर्मदेशनां॥ दक्षिणपश्चिमायां दिशि गंगानदीवालिकोपमां लोकधातुं गच्छन्ति स्म॥ तत्रापि ग

प्रथमखण्ड

त्वा धर्म्मं देशयन्ति स्म॥ यद्भूयसा मामेव षट्पारमिताप्रतिसंयुक्तां धर्म्मदेशनां॥ पश्चिमायां दिशि गंगानदीवालिकोपमां लोकधातुं गच्छ
न्ति स्म॥ तत्रापि गत्वा धर्म्मं देशयन्ति यद्भूयसा मामेव षट्पारमिताप्रतिसंयुक्तां धर्म्मदेशनां॥ अधस्ताद्दिशि गंगानदीवालिकोपमां लोकधातुं ग
च्छन्ति स्म॥ तत्रापि गत्वा धर्म्मं देशयन्ति स्म॥ यद्भूयसा मामेव षट्पारमिताप्रतिसंयुक्तां धर्म्मदेशनां॥ उपरिष्टाद्दिशि गंगानदीवालिकोपमां लो
कधातुं गच्छन्ति स्म॥ तत्रापि गत्वा धर्म्मं देशयन्ति स्म॥ यद्भूयसा मामेव षट्पारमिताप्रतिसंयुक्तां धर्म्मदेशनां॥ ये च सत्त्वाः स धर्म्मः श्रुतस्ते सर्व्वे
नियता अभूवन्॥ अनुत्तरायां सम्यक्संबोधौ॥ अथ खलु भगवांस्तस्मिन्नेव सिंहासने निषण्णः सिंहविक्रीडितं नाम बुद्धसमाधिं समापद्य तथा
ऋद्ध्यभिसंस्कारमभिसंस्करोति स्म॥ यथा ऋद्ध्यभिसंस्कारेण ऋद्धिसंस्कृतेनायं त्रिसाहस्रमहासाहस्रो लोकधातुः षड्विकारं प्रकम्पितः
प्राकम्पत संप्राकम्पत॥ अवेधत प्रावेधत संप्रावेधत्॥ अचलत् प्राचलत् संप्राचलत्॥ अक्षुभ्यत् प्राक्षुभ्यत् संप्राक्षुभ्यत्॥ अगर्जत् प्रागर्जत् संप्राग
र्जत्॥ अरणत् प्रारणत् संप्रारणत्॥ अन्ते उन्नमति स्म मध्येऽवनमति स्म मध्य उन्नमति स्म अन्तेऽवनमति स्म मृदुकः स्निग्धः सूक्ष्मः सर्व्वस
त्त्वहितसुखजननानन्दकरः॥ अथ तेन खलु समयेनास्मिंस्त्रिसाहस्रमहासाहस्रे लोकधातौ नैरयिकतिर्य्यग्योनियमलौकाक्ष
णापायदुर्गतिविनिपातास्ते सर्व्वे समुच्छिन्ना अभूवन्॥ सर्व्वे च ते सत्त्वा मनुष्याणां सभागतायामुपपन्ना अभूवन्॥ सर्व्वे च ते सत्त्वयिकानां देवा
नां त्रायस्त्रिंशानां यामानां तुषितानां निर्म्माणरतीनां परनिर्म्मितवशवर्त्तिनां देवानां सभागतायामुपपन्ना अभूवन्॥ अथ ते मनुष्याश्च दे
वाश्च तेनैव प्रीतिप्रसादप्रामोद्येन पौर्व्विकीं जातिं समनुस्मरन्ति स्म समनुस्मृत्य प्रीतिप्रसादप्रामोद्यप्रतिलब्धा येन भगवांस्तेनोपसंक्रामन्ति स्म उपसं
क्रम्य भगवन्तं नमन्ति स्म॥ अथ तेन खलु समयेन पूर्व्वस्यां दिशि गंगानदीवालिकोपमेषु लोकधातुषु सर्व्वे नैरयिकाः सर्व्वे तिर्य्यग्योनयः सर्व्वे य
मलौकिकाः समुच्छिन्नाः॥ सर्व्वाक्षणाश्च समिता अभूवन्॥ सर्व्वे च ते सत्त्वा मनुष्याणां देवानां सभागतायामुपपन्ना अभूवन्॥ अथ ते मनुष्याश्च देवा
श्च तेनैव प्रीतिप्रसादप्रामोद्येन पौर्व्विकीं जातिं समनुस्मरन्ति स्म समनुस्मृत्य प्रीतिप्रसादप्रामोद्यप्रतिलब्धाः स्वकस्वकेषु बुद्धक्षेत्रेषु यत्र तथा

४

गता अर्हन्तः सम्यक्संबुद्धास्तिष्ठन्ति तानुपसंक्रामन्ति स्म॥ उपसंक्रम्य पादौ वन्दित्वा प्राञ्जलीभूतास्तांस्तथागतानर्हन्तः सम्यक्संबुद्धान्नमस्यन्ति स्म॥ अ
थ तेन खलु समयेन दक्षिणस्यां दिशि गंगानदीवालुकोपमेषु लोकधातुषु सर्व्वे नैरयिकाः सर्व्वे तिर्य्यग्योनयः सर्व्वे यमलौकिकाः समुच्छिन्नाः सर्व्वा
क्षणाश्च समिता अभूवन्॥ सर्व्वे च ते सत्त्वा मनुष्याणां च देवानां च सभागतायामुपपन्ना अभूवन्॥ अथ ते मनुष्याश्च देवाश्च तेनैव प्रीतिप्र
सादप्रामोद्येन पौर्व्विकीं जातिं समनुस्मरन्ति स्म॥ समनुस्मृत्य प्रीतिप्रसादप्रामोद्यप्रतिलब्धाः स्वकस्वकेषु बुद्धक्षेत्रेषु यत्र तथागता अर्ह
न्तः सम्यक्संबुद्धास्तिष्ठन्ति तानुपसंक्रामन्ति स्म॥ उपसंक्रम्य पादौ वन्दित्वा प्राञ्जलीभूतास्तांस्तथागतानर्हन्तः सम्यक्संबुद्धान्नमस्यन्ति स्म॥ अ
थ तेन खलु समयेन पश्चिमायां दिशि गंगानदीवालुकोपमेषु लोकधातुषु सर्व्वे नैरयिकाः सर्व्वे तिर्य्यग्योनयः सर्व्वे यमलौकिकाः सम
च्छिन्नाः सर्व्वाक्षणाश्च समिता अभूवन्॥ सर्व्वे च ते सत्त्वा मनुष्याणाञ्च देवानाञ्च सभागतायामुपपन्ना अभूवन्॥ अथ ते मनुष्याश्च देवा
श्च तेनैव प्रीतिप्रसादप्रामोद्येन पौर्व्विकीं जातिं समनुस्मरन्ति स्म समनुस्मृत्य प्रीतिप्रसादप्रामोद्यप्रतिलब्धाः स्वकस्वकेषु बुद्धक्षे
त्रेषु यत्र तथागता अर्हन्तः सम्यक्संबुद्धास्तिष्ठन्ति तानुपसंक्रामन्ति स्म॥ उपसंक्रम्य पादान्वन्दित्वा प्राञ्जलीभूतास्तांस्तथागतानर्हन्तः
सम्यक्संबुद्धान्नमस्यन्ति स्म॥ अथ तेन खलु समयेन उत्तरस्यां दिशि गंगानदीवालिकोपमेषु लोकधातुषु सर्व्वे नैरयिकाः सर्व्वे तिर्य्य
ग्योनयः सर्व्वे यमलौकिकाः समुच्छिन्नाः सर्व्वाक्षणाश्च समिता अभूवन्॥ सर्व्वे च ते सत्त्वा मनुष्याणाञ्च देवानाञ्च सभागतायामुपपन्ना अ
भूवन्॥ अथ ते मनुष्याश्च देवाश्च तेनैव प्रीतिप्रसादप्रामोद्येन पौर्व्विकीं जातिं समनुस्मरन्ति स्म समनुस्मृत्य प्रीतिप्रसादप्रामो
द्यप्रतिलब्धाः स्वकस्वकेषु बुद्धक्षेत्रेषु यत्र तथागता अर्हन्तः सम्यक्संबुद्धास्तिष्ठन्ति तानुपसंक्रामन्ति स्म॥ उपसंक्रम्य पादान्वन्दित्वा प्रा
ञ्जलीभूतास्तांस्तथागतानर्हन्तः सम्यक्संबुद्धान्नमस्यन्ति स्म॥ अथ तेन खलु समयेनोत्तरपूर्व्वस्यां दिशि गंगानदीवालिकोपमे
षु लोकधातुषु सर्व्वे नैरयिकाः सर्व्वे तिर्य्यग्योनयः सर्व्वे यमलौकिकाः समुच्छिन्नाः सर्व्वाक्षणाश्च समिता अभूवन्। सर्व्वे च ते सत्त्वा मनु

प्रथमखण्ड

ष्याश्चं देवानाञ्च सभागतायाउपपन्ना अभूवन्। अथ ये मनुष्यास्तेन्व देवास्ते नैव प्रीतिप्रसादप्रामोद्यजातमनपोर्व्विक्रीडितं समनुस्मरन्ति स्म समनुस्मृत्य प्रीतिप्रसादप्रामोद्यप्रतिलब्धाः॥ स्वकस्वकेषु लोकधातुषु बुद्धक्षेत्रेषु ये तथागता अर्हन्तः संम्यक्सम्बुद्धास्तिष्ठन्ति तानुपसंक्रामन्ति स्म। उपसंक्रम्य पादान्वन्दित्वा प्राञ्जलीभूतास्तांस्तथागतानर्हतः संम्यक्सम्बुद्धान्नमस्यन्ति स्म॥ अथ येन कुशलवमूलेन पूर्वदक्षिणस्यान्दिशि गंगानदीवालिकोपमेषु लोकधातुषु सर्वे नरकाः सर्वतिर्य्यग्योनयः सर्वयमलोकाः समुच्छिन्नाः सर्वाकुशलाश्चाक्षमिता अभूवन्॥ सर्वेन्च ये सत्वा मनुष्याश्चं देवानान्च सभागतायाउपपन्ना अभूवन्। अथ ये मनुष्यास्तेन्व देवास्ते नैव प्रीतिप्रसादप्रामोद्यजातमनपोर्व्विक्रीडितं समनुस्मरन्ति स्म समनुस्मृत्य प्रीतिप्रसादप्रामोद्यप्रतिलब्धाः स्वकस्वकेषु बुद्धक्षेत्रेषु ये तथागता अर्हन्तः सम्यक्सम्बुद्धास्तिष्ठन्ति तानुपसंक्रामन्ति स्म उपसंक्रम्य पादान्वन्दित्वा प्राञ्जलीभूतास्तांस्तथागतानर्हतः सम्यक्सम्बुद्धान्नमस्यन्ति स्म॥ अथ येन कुशलवमूलेन दक्षिणपश्चिमायान्दिशि गंगानदीवालिकोपमेषु लोकधातुषु सर्वे नरकाः सर्वतिर्य्यग्योनयः सर्वयमलोकाः समुच्छिन्नाः सर्वाकुशलाश्चाक्षमिता अभूवन्॥ सर्वेन्च ये सत्वा मनुष्याश्चं देवानाञ्च सभागतायाउपपन्ना अभूवन्॥ अथ ये मनुष्यास्तेन्व देवास्ते नैव प्रीतिप्रसादप्रामोद्यजातमनपोर्व्विक्रीडितं समनुस्मरन्ति स्म समनुस्मृत्य प्रीतिप्रसादप्रामोद्यप्रतिलब्धाः स्वकस्वकेषु बुद्धक्षेत्रेषु ये तथागता अर्हन्तः सम्यक्सम्बुद्धास्तिष्ठन्ति तानुपसंक्रामन्ति स्म। उपसंक्रम्य पादान्वन्दित्वा प्राञ्जलीभूतास्तांस्तथागतानर्हतः सम्यक्सम्बुद्धान्नमस्यन्ति स्म॥ अथ येन कुशलवमूलेन पश्चिमोत्तरस्यां दिशि गंगानदीवालिकोपमेषु लोकधातुषु सर्वे नरकाः सर्वतिर्य्यग्योनयः सर्वयमलोकाः समुच्छिन्नाः सर्वाकुशलाश्चाक्षमिता अभूवन्॥ सर्वेन्च ये सत्वा मनुष्याश्चं देवानाञ्च सभागतायाउपपन्ना अभूवन्॥ अथ ये मनुष्यास्तेन्व देवास्ते नैव प्रीतिप्रसादप्रामोद्यजातमनपोर्व्विक्रीडितं समनुस्मरन्ति स्म समनुस्मृत्य प्रीतिप्रसादप्रामोद्यप्रतिलब्धाः स्वकस्वकेषु बुद्धक्षेत्रेषु ये तथागता अर्हन्तः सम्यक्सम्बुद्धास्तिष्ठन्ति तानुपसंक्रामन्ति स्म॥ उपसंक्रम्य पादान्वन्दि

५

त्वा प्राञ्जलीभूतास्तांस्तथागतानर्हन्तः सम्यक्सम्बुद्धान्नमस्यन्ति स्म॥ अथ येन कुशलवमूलेनाधस्ताद्दिशि गंगानदीवालिकोपमेषु लोकधातुषु सर्वे नरकाः सर्वतिर्य्यग्योनयः सर्वयमलोकाः समुच्छिन्नाः सर्वाकुशलाश्चाक्षमिता अभूवन्॥ सर्वेन्च ये सत्वा मनुष्याश्चं देवानाञ्च सभागतायाउपपन्ना अभूवन्॥ अथ ये मनुष्यास्तेन्व देवास्ते नैव प्रीतिप्रसादप्रामोद्यजातमनपोर्व्विक्रीडितं समनुस्मरन्ति स्म समनुस्मृत्य प्रीतिप्रसादप्रामोद्यप्रतिलब्धाः स्वकस्वकेषु बुद्धक्षेत्रेषु ये तथागता अर्हन्तः सम्यक्सम्बुद्धास्तिष्ठन्ति तानुपसंक्रामन्ति स्म॥ उपसंक्रम्य पादान्वन्दित्वा प्राञ्जलीभूतास्तांस्तथागतानर्हन्तः सम्यक्सम्बुद्धान्नमस्यन्ति स्म॥ अथ येन कुशलवमूलेनउपरिष्टाद्दिशि गंगानदीवालिकोपमेषु लोकधातुषु सर्वे नरकाः सर्वेतिर्य्यग्योनयः सर्वयमलोकाः समुच्छिन्नाः सर्वाकुशलाश्चाक्षमिता अभूवन्॥ सर्वेन्च ये सत्वा मनुष्याश्चं देवानाञ्च सभागतायाउपपन्ना अभूवन् अथ ये मनुष्यास्तेन्व देवास्ते नैव प्रीतिप्रसादप्रामोद्यजातमनपोर्व्विक्रीडितं समनुस्मरन्ति स्म समनुस्मृत्य प्रीतिप्रसादप्रामोद्यप्रतिलब्धाः स्वकस्वकेषु बुद्धक्षेत्रेषु ये तथागता अर्हन्तः सम्यक्सम्बुद्धास्तिष्ठन्ति तानुपसंक्रामन्ति स्म॥ उपसंक्रम्य पादान्वन्दित्वा प्राञ्जलीभूतास्तांस्तथागतानर्हन्तः सम्यक्सम्बुद्धान्नमस्यन्ति स्म॥ अथ खलु येन तत्क्षणेनैव ये अस्मिंस्त्रिसाहस्रमहासाहस्रे लोकधातौ जात्यन्धाः सत्वास्तेपि सर्वेन्च रूपाणि पश्यन्ति स्म॥ बधिराः श्रोत्रशब्दां शृण्वन्ति स्म॥ उन्मत्ताः स्मृतिं प्रतिलभन्ते स्म विक्षिप्तचित्ताः॥ अविक्षिप्तचित्ततां प्रतिलभन्ते स्म॥ नग्नाश्चीवराणि प्रतिलभन्ते स्म॥ दरिद्रा धनानि प्रतिलभन्ते स्म॥ जिघत्सिता भोजनानि प्रतिलभन्ते स्म॥ पिपासिताः पानीयं प्रतिलभन्ते स्म॥ रोगस्पृष्टा अरोगा अभूवं॥ हीनकाया विकलेन्द्रियाः परिपूर्णकायेन्द्रिया अभूवं॥ क्लान्तकाया अक्लान्तकाया अभूवं॥ अविनताकुशलकायवाङ्मनस्कर्म्मकारी विविगता कुशलकायवाङ्मनस्कर्म्मकारी वाभवन्ति स्म॥ सर्वसत्वाश्च सर्वसत्वेषु समचित्ता अभवन् यद्यथा मातापितृष्वानुरागिनो मित्रज्ञातिसहायसमचित्ताः सर्वसत्वाश्च कुशलकर्म्मपथसमन्वागता अभूवं॥ ब्रह्मचारिणः शुचयो निरागन्धाः सर्वाकुशलवितर्कविगताः सर्वसत्वाश्च तस्मिंसमये सर्वसुखसमर्प्पिता अभूवन्॥ एवंरूपसुखसमन्वागता॥ तद्यथा

प्रथमखण्ड

पिनामरत्नीयाध्यानसमापन्नस्थिताः सुखंसर्वसत्त्वा अस्मिंसमये एवंरूपयाघद्ध्यासमन्वागता अभूवन्॥यदेवंजानन्तिस्म॥साधु दानं
साधु धर्म्मः साधुसंयमः साधुसम्प्रंसाध्वप्रमादः साधुमैत्री साधुकरुणा साध्वविहिंसा साधुसर्वप्राणिरतंयक्षु॥अथभगवांस्तस्मिन्न
वसिंहासननिषण्णोऽनेकैमंत्रिसाहस्रेमहासाहस्रेलोकधातुंसमन्तेनकवाडंसदेवकंसनंसेन्द्रकंसेन्द्रसूर्येठावक्रिकंसदेवदानवकायेस्
प्रस्तकंसगुह्यावासमभित्स्थितस्मिन्तः(ठेरतगरासनंगपतिविनान्वनं॥आरुयावर्ठोनगंऊसाठ्रिया॥तद्यथापिनामवल्लवान्दिवाकनः
पनिश्रुद्गगननलपीठौ मास्योचन्द्रमलुलंयथाभगवानिमंत्रिसाहस्रमहासाहस्रंलोकधातुंमतिरत्यस्मिन्तः(ठेरतगरासनंगपति
विनान्वनं॥आरुयावर्ठोनगंऊसाठ्रिया॥एवंपूर्वस्यांदिठिगंगानदीवालिकापमांलोकधातूनतिरत्यस्मिन्तः सारतगरासनंगपतिविना
न्वनं॥आरुयावर्ठोनगंऊसाठ्रिया॥एवंदक्षिणस्यांदिठिगंगानदीवालिकापमांलोकधातुनतिरत्यस्मिन्तः(ठेरतगरासनंगपति
विनान्वनं॥आरुयावर्ठोनगंऊसाठ्रिया॥एवंपठ्रिमायांदिठिगंगानदीवालिकापमांलोकधातुनतिरत्यस्मिन्तः(ठेरतगरासनंग
पतिविनान्वनं आरुयावर्ठोनगंऊसाठ्रिया॥एवम्पठ्रिमाउनस्यांदिठिगंगानदीवालिकापमांलोकधातूनतिरत्यस्मिन्त८॥(ठेर
तगरासनंगयतिविनान्वनं।आरुयावर्ठोनगंऊसाठ्रिया॥एवमधस्ताद्दिठिगंगानदीवालिकापमांलोकधातूनतिरत्यस्मिन्तः(ठे
रतगरासनंगपतिविनान्वनं॥आरुयावर्ठोनगंऊसाठ्रिया॥एवमुपनिष्टाद्दिठिगंगानदीवालिकापमांलोकधातुनतिरत्यस्मिन्तः
(ठेरतगरासनंगपतिविनान्वनं॥आरुयावर्ठोनगंऊसाठ्रिया॥तद्यथापिनामसुमेरुःपर्वतराजःसर्वास्त्रोठ्रयांकालपर्वतानत
तिरत्यस्मिन्तः(ठेरतगरासनंगपतिविनान्वनं।आरुयावर्ठोनगंऊसाठ्रिया॥तद्यथापिनामचन्द्रमण्डलंसर्वतारारूपाण्यतिरत्य
स्मिन्तं(ठेरतगरासनंगपतिविनान्वनं आरुयावर्ठोनगंऊसाठ्रिया॥तद्यथापिनामसूर्य्यमण्डलंसर्वास्कृदन्यानचरासानतिरत्यस्मिन्तं
(ठेरतगरासनंगपतिविनान्वनं आरुयावर्ठोनगंऊसाठ्रिया॥एवमेवभगवांदशसुदिक्षुसदेवकंलोकंलोकंसन्तकंसब्रह्मकंठुरा

वासमतिरत्यस्मिन्तः(ठेरतगरासनंगपति विनान्वनं आरुयावर्ठोनगंऊसाठ्रियो॥अथभगवांपूनरपियाद्द(ठेभगवनःप्रकृमात्म
भावः नाद्दठोमिमेत्रिसाहस्रमहासाहस्रलोकधातावूपदठोयतिस्म॥अथयावन्तोऽस्मिंस्त्रिसाहस्रमहासाहस्रेलोकधातौठुद्धावासका
यिकादेवानिकायाआरोस्वरावक्षकायिकापरनिर्म्मितवसवर्त्तिनोनिर्म्माणरतयःतुषितायामाम्हायस्त्रिंठाश्चातुर्म्महाराऊकायि
कादेवनिकायास्तेसर्वेसिंहासननिषण्णंतथागतमर्हन्तंसम्यक्सम्बुद्धंपठ्यन्तिस्म॥तेतुष्टाउदग्राआत्तमनस्काःप्रमुदिताःप्रीतिसौमन
स्यजाताद्दिव्यानिपुष्पाण्यादायदिव्यानिमाल्यानिदिव्यानिगन्धानिदिव्यानिविलेपनानिदिव्यानिचूर्णानिदिव्यांवासोदिव्यान्युत्पलकुम
दपुण्डरीकनलिनसौगन्धिकानिकेठरतमालपत्राणिदिव्यानिवस्त्रानिदिव्यान्याभरणानिदिव्यानिछत्राणिदिव्याध्वजादिव्याःपता
कागृहीत्वायनभगवांस्तेनोपसंक्रामन्तिस्मउपसंक्रम्यतेः पूष्पैर्माल्यैर्गन्धैर्विलेपनेश्चूर्णैर्वासैरुत्पलपद्मकुमुदपुण्डरीकनलिनसौ
गन्धिकैः केठरतमालपत्रैर्वस्त्रैराभरणैःछत्रैर्ध्वजैःपताकाभिर्भगवन्तमवकिरन्तिस्म॥अभ्यवकिरन्तिस्म॥अभिप्राकिरन्तिस्म॥य
स्मिंहत्रिसाहस्रमहासाहस्रेलोकधातौमनुष्याविनयारागाऊनोरगास्तेऊलऊस्थलजानिपुष्पाणिगृहीत्वायनभगवांस्तेनोपसंक्रामन्तिस्मः॥
उपसंक्रम्यभगवन्तमभिपूजयन्तिस्म॥सर्वाणिचतानिपुष्पमाल्यगन्धविलेपनचूर्णचीवरवस्त्राभरणछत्रध्वजपताकाद्यसमनन्तर
मेवभगवताधिस्थानेनत्रिसाहस्रमहासाहस्रलोकधातुप्रमाण(ठेनभगवतउपरिवैहायसमर्वरत्नमहापुष्पादिकूटागारसंस्थितोभूत
ध्वकूटागारोदिव्यानिपुष्पाणिपुष्पपट्टदामानिलम्बन्तेस्मप्रलम्बन्तेस्म॥अभिप्रलम्बन्तेस्म॥तेश्चपुष्पपट्टदामाभिरयंत्रिसाहस्रमहा
साहस्रोलोकधातुरतिठोभतेस्म॥तेनचखलुपुनःसमयेनभगवतःप्रभावरासैनास्पर्थि(ठेरतगरासनंगपतिविनान्वनंस्म॥यथाच
यंत्रिसाहस्रमहासाहस्रोलोकधातुरेवंपूर्वस्यांदिठिगंगानदीवालिकापमांलोकधातवस्तेनभगवतःप्रभावरासैनस्फुटाअभूवन्॥
दक्षिणस्यांदिठिगंगानदीवालिकापमालोकधातवस्तेनभगवतःप्रभावरासेनस्फुटाअभूवन्॥पठ्रिमायांदिठिगंगानदीवालिकाप(

प्रथमखंड

मालीकधागवर्स्कनरगावगः प्रतानरासनस्कृटाञ्रवना॥ उरूनस्यांदिशि गंगानदीवालिकापमालीकधागवर्स्कनरगावगः प्रतावरा
सनस्कृटाञ्रवना॥ उरूनपूर्वस्यांदिशि गंगानदीवालिकापमालीकधागवर्स्कनरगावगः प्रतावरासनस्कृटाञ्रवना॥ पूर्वदक्षि
स्यांदिशि गंगानदीवालिकापमालीकधागवर्स्कनरगावगः प्रतावरासनस्कृटाञ्रवना॥ दक्षिणपश्चिमायांदिशि गंगानदीवालिका
पमालीकधागवर्स्कनरगावगः प्रतावरासनस्कृटाञ्रवना॥ पश्चिमोत्तरस्यांदिशि गंगानदीवालिकापमालीकधागवर्स्कनरगावगः प्र
तावरासनस्कृटाञ्रवना॥ अधस्यांदिशि गंगानदीवालिकापमालीकधागवर्स्कनरगावगः प्रतावरासनस्कृटाञ्रवना॥ उपरिस्यांदि
शि गंगानदीवालिकापमालीकधागवर्स्कनरगावगः प्रतावरासनस्कृटाञ्रवना॥ मत्रजाम्बूद्वीपकानामनुष्याणांतथागतस्यासनक
दर्शनमात्रलावंदनान्नतदददस्माकंपूनतस्थागतानियत्धर्मेन्द्रशयति॥ यथात्रजाम्बूद्वीपकानांमनुष्याणामेवं(अदानीयानां
मनुष्याणांतथागतस्यासनकदर्शनमात्रलावंदनान्नतदददस्माकंपूनतः तथागतानियत्धर्मेन्द्रशयतीति॥ पोर्वविदेहकानांम
नुष्याणांतथागतस्यासनकदर्शनमात्रलावंदनान्नतदस्माकंपूनतस्थागतानियत्धर्मेन्द्रशयतीति॥ उत्तरकौरवाणांमनु
ष्याणांतथागतस्यासनकदर्शनमात्रलावंदनान्नतदददस्माकंपूनतस्थागतानियत्धर्मेन्द्रशयतीति॥ चातुर्महाराजका
यिकानांदेवानांतथागतस्यासनकदर्शनमात्रलावंदनान्नतदददस्माकंपूनतः तथागतानियत्धर्मेन्द्रशयतीति॥ त्रायस्त्रिंश
नांदेवानांतथागतस्यासनकदर्शनमात्रलावंदनान्नतदददस्माकंपूनतस्थागतानियत्धर्मेन्द्रशयतीति॥ यामानांदेवानां
तथागतस्यासनकदर्शनमात्रलावंदनान्नतदददस्माकंपूनतस्थागतानियत्धर्मेन्द्रशयतीति॥ तुषितानांदेवानांतथागतस्या
सनकदर्शनमात्रलावंदनान्नतदददस्माकंपूनतस्थागतानियत्धर्मेन्द्रशयतीति॥ निर्माणरतीनांदेवानांतथागतस्यासन
दर्शनमात्रलावंदनान्नतदददस्माकंपूनतस्थागतानियत्धर्मेन्द्रशयतीति॥ परनिर्मितवसवर्तिनांदेवानांतथागतस्यास

चनकदर्शनमात्रलावंदनान्नतदस्माकंपूनतस्थागतानियत्धर्मेन्द्रशयतीती॥ ब्रह्मकायिकानांदेवानांतथागतस्यासन
नकदर्शनमात्रलावंदनान्नतदददस्माकंपूनतस्थागतानियत्धर्मेन्द्रशयतीति॥ ब्रह्मपुरोहितानांदेवानांतथागतस्या
सनकदर्शनमात्रलावंदनान्नतदददस्माकंपूनतस्थागतानियत्धर्मेन्द्रशयतीति॥ ब्रह्मपार्षद्यानांदेवानांतथागत
स्यासनकदर्शनमात्रलावंदनान्नतदददस्माकंपूनतस्थागतानियत्धर्मेन्द्रशयतीति॥ महाब्रह्मणांदेवानांतथाग
तस्यासनकदर्शनमात्रलावंदनान्नतदददस्माकंपूनतस्थागतानियत्धर्मेन्द्रशयती॥ आभानांदेवानांतथागतस्यास
नकदर्शनमात्रलावंदनान्नतदददस्माकंपूनतस्थागतानियत्धर्मेन्द्रशयतीति॥ परीत्ताभानांदेवानांतथागत
स्यासनकदर्शनमात्रलावंदनान्नतदददस्माकंपूनतस्थागतानियत्धर्मेन्द्रशयतीति॥ अप्रमाणाभानांदेवानांत
थागतस्यासनकदर्शनमात्रलावंदनान्नतदस्मोरदेकंपूनतस्थागतानियत्धर्मेन्द्रशयतीति॥ आभास्वराणांदेवाना
तंतथागतस्यासनकदर्शनमात्रलावंदनान्नतदददस्मापूनतस्थागतानियत्धर्मेन्द्रशयतीति॥ शुभानांदेवानांत
थागतस्यासनकदर्शनमात्रलावंदनान्नतदददस्माकंपूनतस्थागतानियत्धर्मेन्द्रशयतीति॥ परीत्तशुभानांदेवाना
तंतथागतस्यासनकदर्शनमात्रलावंदनान्नतदददस्माकंपूनतस्थागतानियत्धर्मेन्द्रशयतीति॥ अप्रमाणशुभा
नांदेवानांतथागतस्यासनकदर्शनमात्रलावंदनान्नतदददस्माकंपूनतस्थागतानियत्धर्मेन्द्रशयतीति॥ शुभ
कृत्स्नानांदेवानांतथागतस्यासनकदर्शनमात्रलावंदनान्नतदददस्माकंपूनतस्थागतानियत्धर्मेन्द्रशय
तीति॥ बृहानांदेवानांतथागतस्यासनकदर्शनमात्रलावंदनान्नतदददस्माकंपूनतस्थागतानियत्धर्म
न्द्रशयतीति॥ अप्रमाणबृहानांदेवानांतथागतस्यासनकदर्शनमात्रलावंदनान्नतदददस्माकंपूनतस्थागता

निषद्य धर्मन्देशयतीति ॥ बृहत्फलानां देवानां तथागतस्यासेवनकदर्शनमात्मसरावं दृष्ट्वा एवं ददन्त अस्माकं पूनतस्त
थागतो निषद्य धर्मन्देशयतीति ॥ अवृहाणां देवानां तथागतस्यासेवनकदर्शनमात्मसरावं दृष्ट्वा एवं ददन्त दस्माकं पूनत(
स्तथागतो निषद्य धर्मन्देशयतीति ॥ अतेपाणां देवानां तथागतस्यासेवनकदर्शनमात्मसरावं दृष्ट्वा एवं ददन्त दस्माकं पूनतस्त
थागतो निषद्य धर्मन्देशयतीति ॥ सुदृशानां देवानां तथागतस्यासेवनकदर्शनमात्मसरावं दृष्ट्वा ददन्तपस्माकं पूनतस्तथाग
तो निषद्य धर्मन्देशयतीति ॥ सुदर्शनानां देवानां तथागतस्यासेवनकदर्शनमात्मसरावं दृष्ट्वा एवं ददन्त दस्माकं पूनतस्तथागतो(
निषद्य धर्मन्देशयतीति ॥ अकनिष्ठानां देवानां तथागतस्यासेवनकदर्शनमात्मसरावं दृष्ट्वा एवं ददन्त दस्माकं पूनतस्तथाग
तो निषद्य धर्मन्देशयतीति ॥ एवं साहस्रलोकधातौ सर्वमनुष्याणां सर्वदेवानां तथागतस्यासेवनदर्शनमात्मसरावं दृष्ट्वा एवं
ददन्त दस्माकं पूनतस्तथागतो निषद्य धर्मन्देशयतीति ॥ द्विसाहस्रलोकधातु सर्वमनुष्याणां सर्वदेवानां तथागतस्यास
वनदर्शनमात्मसरावं दृष्ट्वा एवं ददन्त दस्माकं पूनतस्तथागतो निषद्य धर्मन्देशयतीति ॥ एवं त्रिसाहस्रमहासाहस्रलोक(
धातौ सर्वमनुष्याणां सर्वदेवानां तथागतस्यासेवनकदर्शनमात्मसरावं दृष्ट्वा एवं ददन्त दस्माकं पूनतस्तथागतो(
निषद्य धर्मन्देशयतीति ॥ अथ भगवांस्तस्मिन्नेव सिंहासने निषण्णः पूनरप्येवरूपं प्रामक्षय्यया प्रव्या पूनर्भगवा
यं त्रिसाहस्रमहासाहस्रलोकधातुन् वलोकितवान् ॥ पूर्वस्यां दिशि गंगानदीवालुकोपमा लोकधातवो अवलोकिता
अभूवन् ॥ दक्षिणस्यां दिशि गंगानदीवालुकोपमा लोकधातवो अवलोकिता अभूवन् ॥ पश्चिमायां दिशि गंगानदीवालुकोपमा
लोकधातवो अवलोकिता अभूवन् ॥ उत्तरस्यां दिशि गंगानदीवालुकोपमा लोकधातवो अवलोकिता अभूवन् ॥
सर्वापि तत्र धर्मन्देशयन्ति स्म ॥ यत्र च मागधव्याभिनाशप्रतिसंयुक्तां धर्मदेशनां ये श्रुत्वा सत्त्वाः सर्वे [illegible] निर्वाणमभूवन् ॥ अथ

२७

अथ भग[illegible]न्नेव सिंहासने निषण्णः सिंहविक्रीडितं नाम समाधिं समापद्यते । तथानूपन्नश्चेरिसंस्थानमहिस्तकमागतिस्म । यथानूपदश[illegible]
येनाहि संरत्न तायत्रिसाहस्रमहासाहस्रलोकधातुः षड्विकारं कम्पत प्राकम्पत संप्राकम्पत । अचलत् प्राचलत् संप्राचलत् । अवेधत् प्रावेधत् संप्रावेधत्
अक्षुभ्यत् प्राक्षुभ्यत् संप्राक्षुभ्यत् । अगर्जत् प्रागर्जत् संप्रागर्जत् । अन्ते उन्नमति मध्ये अवनमति मध्ये उन्नमति अन्ते अवनमति । मृदुकस्निग्धसत्त्व
सत्त्वजननात् ॥ अथ खलु तेन क्षणलवमुहूर्तेन यः त्रिसाहस्रमहासाहस्रलोकधातौ नैरयिका तिर्यग्योनयो यमलौकिकाः सर्वे सत्त्वाः सुखिता
अभूवन् । सर्वाकुशलकर्मक्षीणा अभूवन् । सर्वसत्त्वा नरकगतितिर्यग्योनियमलोकगतिप्रच्युताः सर्वे तेनैव प्रीतिप्रामोद्येन मनुष्याणां सभाग
तायामुपपन्ना अभूवन् । एवं चातुर्महाराजिकानां देवानां त्रयस्त्रिंशानां यामानां तुषितानां निर्माणरतीनां परनिर्मितवशवर्तिनां देवानां सभागतायामुपप
न्ना अभूवन् ॥ अथ खलु ते मनुष्याश्च देवाश्च भगवतो बुद्धानुभावेन पूर्वजन्मान्यनुस्मरन्ति स्म चातुर्महाराजिकानां यामानां तुषितानां निर्माणरतीनां परनिर्मितवशवर्ति
किस्म । ते न स्वकतया तेनैव प्रीतिप्रामोद्येन येन भगवांस्तेनोपसंक्रान्ताः । उपसंक्रम्य भगवतः पादौ शिरसाभिवन्द्य भगवन्तं प्राञ्जलयो नमस्यमान
न्ति स्म ॥ एवं पूर्वस्यां दिशि गंगानदीवालुकोपमेषु लोकधातुषु दक्षिणस्यां पश्चिमायामुत्तरस्यां विदिक्षु अधः ऊर्ध्वं समन्ताद्दशसु दिक्षु एकैकस्मिन् दिग्भाग
गंगानदीवालुकोपमेषु लोकधातुषु सर्वे नैरयिकाः सत्त्वाः तिर्यग्योनयः सर्वे यमलौकिकाः सर्वे सुखिता अभूवन् । सर्वाकुशलकर्मक्षीणा अभूवन् । ये च सत्त्वाः सर्वा
नरकगतितिर्यग्योनियमलोकगतिप्रच्युताः सर्वे देवमनुष्येषूपपद्यन्ते स्म । ते देवमनुष्या यथा भगवन्तं समनुस्मरन्तः पूर्वनिवासमनुस्मरन्ति स्म । अन्
तेनैव प्रीतिप्रामोद्येन स्वकस्वकेषु बुद्धक्षेत्रेषु यत्र बुद्धा भगवन्त उपपन्ना [illegible] तेनोपसंक्रान्ताः उपसंक्रम्य च तेषां बुद्धानां भगवतां पादौ
वन्दित्वा सर्वे प्राञ्जलयस्तान् बुद्धान् भगवतो नमस्यन्ति स्म । अथ खलु यः त्रिसाहस्रमहासाहस्रलोकधातौ सर्वमनुष्या जात्यन्धा रूपाणि पश्य
न्ति स्म बधिराः शब्दान् शृण्वन्ति उन्मत्ताः स्मृतिं प्रतिलभन्ते नग्नाः विक्षिप्तचित्ता ॥ कायचित्ता लघवः किस्म ॥ जिघत्सिता [illegible] भवन्ति स्म
क्षुधिता विगतपिपासा भवन्ति स्म । रोगस्पृष्टा निरोगा भवन्ति स्म । हीनेन्द्रिया परिपूर्णेन्द्रिया भवन्ति स्म । अविनिहिता कृपणका यवावन्तस्तस्मि

५४

पञ्चविंशति
६

नाडीनाडिभिः कुशलकायकालान[illegible]काश्वरवकिरत सर्वं स्वावभासमानाविहसमविरात्वकिन्नाजानदि गिनी समस्विशाभिताभाव
निसानाडिभ्यसमद्भिस्ततः ग कुशलकायपथश्चविनाश्वरवकिरत अमत्यानिश्रः शुभयानिनामसुप्रवः सर्वसत्वाश्च[illegible]सर्वेणा[illegible]संस्थ
घनितास्त्यानामव्यापितामहत्वौवयानसमापन्नसंदर्शिताः॥ तस्मिन्नेव च समये [illegible] यदन्तर्बुद्धक्षेत्रकबु
द्धा एवं च [illegible] साधुदनाः साधुगन्धमाला धूपसंस्कृतः साधु चित्त[illegible] सर्वे वा सत्त्वाः [illegible] विहिंसिताः॥ [illegible]
गतांक्षि न च क्षिप्तसमतिग[illegible] साहस्रमहासाहस्रलोकधातुमतिरोच्य तिष्ठति स्म तस्य [illegible] यावद् [illegible]
पूर्वस्यां दिशि दक्षिणस्यां पश्चिमायामुत्तरस्यामधस्तादूर्ध्वं दिग्विदिक्षु गंगानदीवालुकोपमा लोकधातवः [illegible] तिष्ठति स्म तथागतस्य [illegible]
गवानिर्विनीचस्म: [illegible] यावद् दशदिग्यायां ज्ञाता च तथापि नाम सुमेरुः पर्वतराजः सर्वपर्वतानतिरोच्य तिष्ठति [illegible]
यावद् दशदिग्यायां ज्ञाता च॥ एवमेव भगवान् सर्वलोकधातूनतिरोच्य तिष्ठति स्म [illegible] यावद् दशदिग्यायां ज्ञाता च॥ अथ खलु भग
वान् पुनरेव या दक्षिणसाहस्रमहासाहस्रलोकधातौ सत्त्वानां समन्वक्ष्यमानमात्मभावं प्रकृतमुपदर्शयामास॥ अथ खलु ये त्रिसाहस्रमहा
साहस्रलोकधातौ शुद्धावासकायिका देवाः [illegible] ब्रह्मकायिका देवाः परनिर्मितवशवर्तिनः निर्माणरतयः तुषिता यामास्त्रायस्त्रिं
शाश्चातुर्महाराजकायिकाश्च देवास्ते तथागतस्यासनं [illegible] दृष्ट्वा दिव्याः पुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरछत्रध्वजपताका वैजय
न्तीः गृहीत्वा दिव्यानि उत्पलकुमुदसौगन्धिकपुण्डरीकपद्मानि गृहीत्वा यानि [illegible] पत्राणि गृहीत्वा येन तथागतस्यासनं तेनाग्र
वक्तु [illegible]॥ ये च त्रिसाहस्रमहासाहस्रलोकधातौ मनुष्याः [illegible] तथागतस्यासनं [illegible] पुष्पाणि गृहीत्वा य
तथागतस्यासनं [illegible]॥ अथ खलु ते देवाश्च मनुष्याश्च दिव्यानि पुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरछत्र
ध्वजपताकावैजयन्ती [illegible] पूर्वक्रमेण तथागतस्यासनमवकिरन्ति स्म॥ अवकिरन्ति स्म॥ अथ खलु ये ते पुष्पधूपग

न्धमाल्यविलेपनचूर्णचीवरछत्रध्वजपताकावैजयन्ती [illegible] गगनतले [illegible] कीर्णकनिवर्त्तितानि उपर्यन्तरीक्षे गगनतलेऽवति
ष्ठमाना त्रिसाहस्रमहासाहस्रलोकधातुप्रमाणमेककूटागारं संस्थितमभूत् [illegible] नानारत्नानि [illegible] पुष्पदामानि पट्टदामानि [illegible]
[illegible] पुष्पदामानि पट्टदामानि [illegible] त्रिसाहस्रमहासाहस्रलोकधातुं [illegible] सुवर्णवर्णेन [illegible]
दिक्षु [illegible] गंगानदीवालुकोपमा लोकधातवः [illegible]
[illegible] त्रिसाहस्रमहासाहस्रलोकधातौ सर्व[illegible]
[illegible]॥ अथ खलु भगवान् [illegible]
[illegible] साहस्रमहासाहस्रलोकधातुः [illegible] यावद् दशसु दिक्षु गंगानदीवालुको
[illegible] त्रिसाहस्रमहासाहस्रलोकधातौ सत्त्वाः सर्वे पूर्वस्यां दिशि गंगानदीवालुकोपमा लोकधातवः
[illegible] तथागतस्य [illegible] गंगानदीवालुकोपमा लोकधातुषु सत्त्वाः [illegible] महालोकधातु [illegible]
गंगानदीवालुकोपमेषु लोकधातुषु [illegible] एवं दक्षिणस्यां दिशि पश्चिमायामुत्तरस्यामधस्तादूर्ध्वं दिग्विदिक्षु [illegible]
[illegible] सहालोकधातु [illegible] एकसंघाताः [illegible] गंगानदीवालुकोपमेषु लोकधातुषु सत्त्वा
[illegible] तथागतस्य [illegible] अथ खलु पूर्वस्यां दिशि गंगानदीवालुकोपमा लोकधातून्
[illegible] सर्वे [illegible] लोकधातु [illegible] धर्मं देशयति॥ अथ [illegible]
[illegible] भगवान् [illegible] दृष्ट्वा [illegible]
[illegible] भगवतः [illegible]

पंचविंशति

गस्यासत्वनस्तथताववद्दर्शनाय॥ एवमुक्ते रत्नाकरस्तथा[illegible]बोधिसत्वमेतदवोचत्। अस्ति कुलपुत्र इतः पश्चिमायां दिशि गंगानदीवालुकोपमाल्लोक-
धातूनतिक्रम्य सहा नाम लोकधातुस्तत्र शाक्यमुनिर्नाम तथागतो[illegible] सम्यक्संबुद्धस्तिष्ठति ध्रियते यापयति बोधिसत्वानां महासत्वानां प्रज्ञापारमि-
तां संप्रकाशयति तस्यायमीदृशोऽनुभावः। गच्छ त्वं कुलपुत्र [illegible] गमिष्याम्यहं भगवंस्तां सहां लोकधातुं शाक्य-
मुनिं तथागतं दर्शनाय वन्दनाय पर्युपासनाय तांश्च बोधिसत्वान्महासत्वान्कुमारभूतान्धारणीप्रतिलब्धान्समाधिप्रतिलब्धान्समाधिनिर्हारकुशलान्
सर्वसमाधिवशिपारमिताप्राप्तान्॥ स भगवानाह॥ गच्छ त्वं कुलपुत्र यस्येदानीं कालं मन्यसे॥ अथ खलु रत्नाकरस्तथागतो नानारत्नमयानि सुवर्णवर्ण-
र्णानि सहस्रपत्राणि पद्मानि समन्तरश्मये बोधिसत्वाय प्रादात्। एभिस्त्वं कुलपुत्र पद्मैः शाक्यमुनिं तथागतमवकिरेः। एवं च वद॥ रत्नाकरस्तथाग-
तो भगवन्तमल्पाबाधतां परिपृच्छत्यल्पातङ्कतां लघूत्थानतां यात्रां बलं सुखस्पर्शविहारतां परिपृच्छति। इमानि च भगवन्रत्नाकरस्तथागत-
स्तोऽर्हन्सम्यक्संबुद्धः पद्मानि प्रहिणोति भगवतो [illegible]। संप्रजानकारी च त्वं कुलपुत्र तत्र बुद्धक्षेत्रे चरेः। तत्कस्य हेतोः। दुरासदा हि ते बोधिसत्वा ये तत्र
सहायां लोकधातावुपपन्नाः॥ अथ खलु समन्तरश्मिर्बोधिसत्वो रत्नाकरस्य तथागतस्य सकाशात्तानि रत्नमयानि पद्मानि गृहीत्वा [illegible] सह
[illegible]बोधिसत्वकोटिनियुतशतसहस्रैः प्रव्रजितैर्गृहस्थैर्दारकैर्दारिकाभिश्च सार्द्धं [illegible] पूर्वस्यां दिशि गंगान-
दीवालुकोपमान्लोकधातून्बुद्धान्भगवतः [illegible] पुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरच्छत्रध्वजपताकावैजयन्तीभि-
र्येन सहा लोकधातुर्येन च शाक्यमुनिस्तथागतस्तेनोपसंक्रान्तः। उपसंक्रम्य भगवतः पादौ शिरसा वन्दित्वा एकान्तेऽस्थात्। एकान्तस्थितः
समन्तरश्मिर्बोधिसत्वो भगवन्तमेतदवोचत्। रत्नाकरो भगवंस्तथागतो भगवन्तमल्पाबाधतां परिपृच्छत्यल्पातङ्कतां
लघूत्थानतां यात्रां बलं सुखस्पर्शविहारतां च परिपृच्छति। इमानि च भगवन्रत्नाकरस्तथागतो नानारत्नमयानि सुवर्णनिर्भासानि सहस्र-
पत्राणि पद्मानि प्रहिणोति। अथ खलु भगवान्शाक्यमुनिस्तथागतस्तानि पद्मानि गृहीत्वा येन पूर्वस्यां दिशि गंगानदीवालुकोपमा लोकधातवः

[illegible]

१०

[illegible]क्षिपत्। [illegible] पद्मवद्बुद्धविग्रहा निषण्णाः। ते च बुद्धविग्रहा धर्मं देशयन्ति यदुत नाम षट्पारमिताप्रतिसं-
युक्तं [illegible]॥ ये ते सत्वा धर्मं शृण्वन्ति ते नियता अनुत्तरायां सम्यक्संबोधौ। अथ खलु ते बोधिसत्वा गृहस्थाः प्रव्रजिताश्च दारक-
दारिकाश्च [illegible] समन्तरश्मिना बोधिसत्वेन महासत्वेन सार्द्धमागताः स्वकस्वकैः कुशलमूलैर्भगवन्तं शाक्यमुनिं सत्कृत्य [illegible]
[illegible]॥ अथ खलु दक्षिणस्यां दिशि गंगानदीवालुकोपमां लोकधातूनतिक्रम्य [illegible] लोकधातुः सर्वशोकापगता नाम तत्राशोक-
श्रीर्नाम तथागतोऽर्हन्सम्यक्संबुद्धस्तिष्ठति ध्रियते यापयति प्रज्ञापारमितां बोधिसत्वानां धर्मं देशयति। अथ तत्र लोकधातौ विगतशोको नाम बोधि-
सत्वो महासत्वो महावभासं दृष्ट्वा इमं च महान्तं पृथिवीचालं [illegible] दृष्ट्वा येन भगवानशोकश्रीस्तथागतस्ते-
नोपसंक्रान्त उपसंक्रम्य भगवतः [illegible] भगवन्तमेतदवोचत्। को भगवन्हेतुः कः प्रत्ययोऽस्य महतोऽवभासस्य लोके प्रादुर्भा-
वाय अस्य च महतः पृथिवीचालस्य अस्य च तथागतस्य [illegible]संदर्शनाय। एवमुक्तेऽशोकश्रीस्तथागतो विगतशोकं बोधिसत्वमेतदवो-
चत्। अस्ति कुलपुत्र इत उत्तरस्यां दिशि गंगानदीवालुकोपमाल्लोकधातूनतिक्रम्य सहा नाम लोकधातुस्तत्र शाक्यमुनिर्नाम तथागतोऽर्हन्सम्यक्सं-
बुद्धस्तिष्ठति ध्रियते यापयति बोधिसत्वानां महासत्वानां प्रज्ञापारमितां संप्रकाशयति। तस्यायमीदृशोऽनुभावः॥ अथ खलु विगतशोको बोधि-
सत्वोऽशोकश्रियं तथागतमेतदवोचत्। गमिष्याम्यहं भगवंस्तां सहां लोकधातुं तं च शाक्यमुनिं तथागतं दर्शनाय वन्दनाय पर्युपासनाय
तांश्च बोधिसत्वान्महासत्वान्कुमारभूतानेकजातिप्रतिबद्धान्धारणीप्रतिलब्धान्समाधिनिर्हारकुशलान्सर्वसमाधिवशिपारमिताप्राप्तान्॥ स भगवानाह॥ गच्छ
त्वं कुलपुत्र यस्येदानीं कालं मन्यसे॥ अथ खलु अशोकश्रीस्तथागतो नानारत्नमयानि सुवर्णवर्णावभासानि सहस्रपत्राणि पद्मानि विगतशोकाय बोधि-
सत्वाय प्रादात्। एभिस्त्वं कुलपुत्र पद्मैः शाक्यमुनिं तथागतमभ्यवकिरेः। एवं च वद॥ अशोकश्रीर्भगवान्भगवन्तमल्पाबाधतां परिपृच्छत्यल्पा-
तङ्कतां लघूत्थानतां यात्रां बलं सुखस्पर्शविहारतां परिपृच्छति। इमानि च भगवन्नशोकश्रीस्तथागतोऽर्हन्सम्यक्संबुद्धः पद्मानि प्रहि-

पञ्चविंशति

नानि भगवतः प्रेषितानि॥ संप्रजानकारी च त्वं कुलपुत्र तत्र बुद्धक्षेत्रे चरेः॥ तत्कस्य हेतोः॥ दुरासदा हि ते बोधिसत्त्वा ये तत्र सहायां लोकधातावुपपन्नाः॥
अथ खलु विगतशोको बोधिसत्त्वो ऽशोकश्रियस्तथागतस्य सकाशात्तानि नानारत्नमयानि पद्मानि गृहीत्वा स्वर्णनिर्भासानि सहस्रपत्राणि अनेकैर्बोधि
सत्त्वकोटीनियुतशतसहस्रैर्गृहस्थैः प्रव्रजितैर्दारकैर्दारिकाभिः सार्धं पविष्टः पुनस्ततो दक्षिणस्यां दिशि गंगानदीवालुकोपमान् लो
कधातुषु बुद्धान्भगवतः सत्कुर्वन्गुरुकुर्वन्मानयन्पूजयन्पुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरच्छत्रध्वजपताकाभिर्येनैषा सहा लोक
धातुस्तेन संप्राप्ताः॥ येन च भगवाञ्छाक्यमुनिस्तथागतस्तेनोपसंक्रान्त उपसंक्रम्य भगवतः पादौ शिरसाभिवन्द्य एकान्तेऽस्थात् स्थितो विगतशो
को बोधिसत्त्वो भगवन्तमेतदवोचत्॥ अशोकश्रीर्भगवान्भगवन्तमल्पाबाधतां परिपृच्छति अल्पातङ्कतां लघूत्थानतां यात्रां बलं सुखं स्पर्श
विहारतां च परिपृच्छति॥ इमानि च तेन भगवता अशोकश्रिया तथागतेन नानारत्नमयानि स्वर्णनिर्भासानि सहस्रपत्राणि पद्मानि प्रेषितानि
भगवतः॥ अथ खलु भगवाञ्छाक्यमुनिस्तथागतस्तानि पद्मानि गृहीत्वा येन दक्षिणस्यां दिशि गंगानदीवालुकोपमा लोकधातवस्तेन प्रा
क्षिपत्॥ ये च पद्मेषु लोकधातुषु सर्वे ते पद्मेषु बुद्धविग्रहा निषण्णास्ते च बुद्धविग्रहा धर्मं देशयन्ति स्म। यदुत प्र
ज्ञापारमिताप्रतिसंयुक्तं धर्मं देशयन्ति स्म। यं धर्मं श्रुत्वा बहवः सत्त्वा नियता अभूवन्ननुत्तरायां सम्यक्संबोधौ॥ अथ खलु ते बोधिसत्त्वाः
गृहस्थाः प्रव्रजिताश्च दारकाश्च दारिकाश्च सर्वशोकापगताया लोकधातोर्विगतशोकेन बोधिसत्त्वेन महासत्त्वेन सार्धमागतास्ते
स्वकस्वकैः कुशलमूलैर्भगवन्तं शाक्यमुनिं सत्कृत्य गुरुकृत्य मानयित्वा संपूज्य एकान्ते न्यषीदन्॥ अथ खलु पश्चिमायां दिशि गंगानदीवालुकोप
मान्लोकधातूनतिक्रम्य उपशान्ता नाम लोकधातुस्तत्र रत्नार्चिर्नाम तथागतो ऽर्हन्सम्यक्संबुद्धस्तिष्ठति ध्रियते यापय
ति स बोधिसत्त्वानां प्रज्ञापारमितां बोधिसत्त्वानां धर्मं देशयति॥ अथ तत्र लोकधातौ चारित्रमतिर्नाम बोधिसत्त्वो महासत्त्वः स तं महान्तमवभासं दृष्ट्वा तं च
महान्तं पृथिवीचालं तं च भगवतो येन भगवान्रत्नार्चिस्तथागतोऽर्हन्सम्यक्संबुद्धस्तेनोपसंक्रान्त उपसंक्रम्य भगवतः

११

पादौ शिरसाभिवन्द्य येन रत्नार्चिस्तथागतस्तेनाञ्जलिं प्रणम्य भगवन्तमेतदवोचत्॥ को भगवन् हेतुः कः प्रत्ययो ऽस्य महतो ऽवभासस्य लोके प्रादुर्भावाय अस्य च महतः पृथिवीचाल
स्य॥ एवमुक्ते रत्नार्चिस्तथागतश्चारित्रमतिं बोधिसत्त्वमेतदवोचत्॥ अस्ति कुलपुत्र इतः पूर्वस्यां दिशि गंगा
नदीवालुकोपमान्लोकधातूनतिक्रम्य सहा नाम लोकधातुस्तत्र शाक्यमुनिर्नाम तथागतो ऽर्हन्सम्यक्संबुद्धस्तिष्ठति ध्रियते यापयति। स बोधिसत्त्वा
नां महासत्त्वानां प्रज्ञापारमितां प्रकाशयति तस्यायमीदृशो ऽनुभावः॥ अथ खलु चारित्रमतिर्बोधिसत्त्वो रत्नार्चिषं तथागतमेतदवोचत्॥ गमिष्याम्य
हं भगवंस्तां लोकधातुं तं च भगवन्तं शाक्यमुनिं तथागतं द्रष्टुं वन्दितुं पर्युपासितुं तांश्च बोधिसत्त्वान्महासत्त्वानेकजातिप्रतिबद्धान्कुमारभूतान्धारणी
प्रतिलब्धान्समाधिनिर्हारकुशलान्सर्वसमाधिवशिपारमिताप्राप्तान्॥ स भगवानाह॥ गच्छ त्वं कुलपुत्र यस्येदानीं कालं मन्यसे॥ अथ खलु र
त्नार्चिस्तथागतो नानारत्नमयानि स्वर्णनिर्भासानि सहस्रपत्राणि पद्मानि चारित्रमतये बोधिसत्त्वाय प्रादात्॥ एभिस्त्वं कुलपुत्र पद्मैः शाक्य
मुनिं तथागतमभिकिरेः॥ एवं च वदेः॥ रत्नार्चिस्तथागतो भगवन्तमल्पाबाधतां परिपृच्छति अल्पातङ्कतां लघूत्थानतां यात्रां बलं सुखं स्पर्श
विहारतां च परिपृच्छति॥ इमानि च तेन भगवता रत्नार्चिषा तथागतेनार्हता सम्यक्संबुद्धेन पद्मानि प्रेषितानि भगवतः॥ संप्र
जानकारी च त्वं कुलपुत्र तत्र बुद्धक्षेत्रे चरेः॥ तत्कस्य हेतोः॥ दुरासदा हि ते बोधिसत्त्वा ये तस्यां सहायां लोकधातावुपपन्नाः॥ अथ खलु चारित्र
मतिर्बोधिसत्त्वो रत्नार्चिषस्तथागतस्य सकाशात्तानि नानारत्नमयानि पद्मानि गृहीत्वा स्वर्णनिर्भासानि सहस्रपत्राणि अनेकैर्बोधि
सत्त्वकोटीनियुतशतसहस्रैर्गृहस्थैः प्रव्रजितैर्दारकैर्दारिकाभिः सार्धं पविष्टः पुनस्ततः पश्चिमायां दिशि गंगानदीवालु
कोपमान्लोकधातुषु बुद्धान्भगवतः सत्कुर्वन्गुरुकुर्वन्मानयन्पूजयन्पुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरच्छत्रध्वजपताकाभि
र्येनैषा सहा लोकधातुस्तेन संप्राप्ताः॥ येन च भगवाञ्छाक्यमुनिस्तथागतस्तेनोपसंक्रान्त उपसंक्रम्य भगवतः पादौ शिरसा

पंचविंशति

साहित्वा एकान्तेऽस्थात्॥ एकान्तस्थितश्चारित्रमतिर्बोधिसत्वो भगवन्तं शाक्यमुनिमेतदवोचद्रत्नार्चिर्भगवं तथागतो भगवन्तमल्पाबाधतां परिपृच्छत्य-
ल्पातङ्कतां लघूत्थानतां यात्रां बलं सुखस्पर्शविहारतां च परिपृच्छति। इमानि च भगवन् तेन भगवता रत्नार्चिषा तथागतेन नानारत्नमयानि सुवर्णनिर्भासा-
नि सहस्त्रपत्राणि पद्मानि प्रहितानि भगवतः॥ अथ खलु भगवान् शाक्यमुनिस्तथागतस्तानि पद्मानि गृहीत्वा पश्चिमायां दिशि गंगानदी-
वालुकोपमाल्लोकधातूनवकिरति स्म। तेषु पद्मेषु लोकधातवः स्फुटा अभूवन्। तेषु च पद्मेषु बुद्धविग्रहा निषण्णाः षट्पारमिताप्रतिसंयुक्तां धर्म्मं
मां देशयन्ति यदुत इमामेव प्रज्ञापारमिताप्रतिसंयुक्तां धर्म्मदेशनां॥ यैश्च सत्वैः स धर्म्मः श्रुतः ते नियता अनुत्तरायां सम्यक्संबोधौ
॥ अथ खलु चारित्रमतिर्बोधिसत्वो गृहस्थैश्च प्रव्रजितैश्च दारकदारिकाभिश्च यावत् शाक्यमुनिस्तथागतस्तेनोपसंक्रान्ता चारित्रमतिना बोधिसत्वेन
महासत्वेन सार्द्धं भगवन्तं एकैकः कुशलमूलैर्भगवन्तं शाक्यमुनिं तथागतं सत्कृत्य गुरुकृत्य मानयित्वा पूजयित्वा एकान्ते न्यषीदन्॥ अथ खलु उ-
त्तरस्यां दिशि गंगानदीवालुकोपमां लोकधातूनतिक्रम्य चरमो यः सर्वावसानिको लोकधातुर्जया नाम तत्र जयेन्द्रो नाम तथागतोऽर्हन्सम्य-
क्संबुद्धस्तिष्ठति ध्रियते यापयति स इमामेव प्रज्ञापारमितां बोधिसत्वानां धर्म्मं देशयति। तत्र लोकधातौ जयदत्तो नाम बोधिसत्वो महासत्व-
स्तं महावभासं दृष्ट्वा तं महान्तं पृथिवीचालं तं च भगवतो रूपं दृष्ट्वा येन भगवान् जयेन्द्रस्तथागतोऽर्हन्सम्यक्संबुद्धस्तेनोपसंक्रम्य
तस्य भगवतः पादौ शिरसाभिवन्द्य जयेन्द्रं तथागतमेतदवोचत् को भगवन् हेतुः कः प्रत्ययोऽस्य महतोऽवभासस्य लोके प्रादुर्भावायास्य
च महतः पृथिवीचालस्य अस्य च तथागतस्य आत्मभावस्य सन्दर्शनाय॥ एवमुक्ते जयेन्द्रस्तथागतो जयदत्तं बो-
धिसत्वं महासत्वमेतदवोचत् अस्ति कुलपुत्र इतो दक्षिणस्यां दिशि गंगानदीवालुकोपमां लोकधातूनतिक्रम्य सहा नाम लोकधातुस्तत्र भ-
गवान् शाक्यमुनिर्नाम तथागतोऽर्हन्सम्यक्संबुद्धस्तिष्ठति ध्रियते यापयति स बोधिसत्वानां महासत्वानां प्रज्ञापारमितां संप्रकाशयति तस्यायमनु-

१२

मीदृशेनानुभावेन॥ अथ खलु जयदत्तो बोधिसत्वो जयेन्द्रं तथागतमेतदवोचद्गमिष्याम्यहं भगवन् तां सहां लोकधातुं तं च भगवन्तं शाक्यमुनिं तथागतं द्र-
ष्टुं वन्दनाय पर्युपासनाय तांश्च बोधिसत्वान् महासत्वान् एकजातिप्रतिबद्धान् कुमारभूतान् धारणीप्रतिलब्धान् समाधिनिर्हारप्रतिलब्धान् समाधि-
वशिपारमिताप्राप्तान्। भगवानाह। गच्छ त्वं कुलपुत्र यस्येदानीं कालं मन्यसे॥ अथ खलु जयेन्द्रस्तथागतो नानारत्नमयानि सुवर्णनिर्भासानि सहस्र-
पत्राणि पद्मानि जयदत्ताय बोधिसत्वाय प्रादात्॥ गच्छ त्वं कुलपुत्र यत्र भगवान् शाक्यमुनिस्तथागतस्तमेवं वदेः॥ जयेन्द्रो हि भगवान् भगवन्तमल्पाबा-
धतां परिपृच्छत्यल्पातङ्कतां लघूत्थानतां यात्रां बलं सुखस्पर्शविहारतां च परिपृच्छति॥ इमानि च भगवन् तेन भगवता जयेन्द्रेण तथागतेनार्हता सम्य-
क्संबुद्धेन पद्मानि प्रहितानि भगवतः। संप्रजानकारी च त्वं कुलपुत्र तत्र बुद्धक्षेत्रे चरेः। तत्कस्य हेतोः। दुरासदा हि बोधिसत्वास्तत्र
सहायां लोकधातावुपपन्नाः॥ अथ खलु जयदत्तो बोधिसत्वो जयेन्द्रस्य तथागतस्य सकाशात् तानि नानारत्नमयानि पद्मानि गृहीत्वा सुवर्ण-
निर्भासानि सहस्रपत्राणि अनेकैर्बोधिसत्वकोटीनियुतशतसहस्रैर्गृहीभिश्च प्रव्रजितैश्च दारकदारिकाभिश्च सार्द्धं [illegible]
गच्छन्नुत्तरस्यां दिशि गंगानदीवालुकोपमेषु लोकधातुषु बुद्धान् भगवतः सत्कुर्वन् गुरुकुर्वन् मानयन् पूजयन् पुष्पधूपगन्धमाल्यविलेप-
नच्छत्रध्वजपताकाभिर्येन सहा लोकधातुस्तेन संप्राप्तः। येन च भगवान् शाक्यमुनिस्तथागतस्तेनोपसंक्रान्त उपसंक्र-
म्य भगवतः पादौ शिरसाभिवन्द्य कालक्रमेणैकान्तेऽस्थात्॥ एकान्तस्थितो जयदत्तो बोधिसत्वो भगवन्तं शाक्यमुनिमेतदवोचत् जयेन्द्रो भगवान् भगवन्त-
मल्पाबाधतां परिपृच्छत्यल्पातङ्कतां लघूत्थानतां यात्रां बलं सुखस्पर्शविहारतां च परिपृच्छति॥ इमानि च तेन भगवता जयेन्द्रेण तथागते-
न नानारत्नमयानि सुवर्णनिर्भासानि सहस्रपत्राणि पद्मानि प्रहितानि भगवतः॥ अथ खलु भगवान् शाक्यमुनिस्तथागतस्तानि पद्मानि प्र-
गृहीत्वा येनोत्तरस्यां दिशि गंगानदीवालुकोपमा लोकधातवस्तेन प्राक्षिपत्। तैः पद्मैर्लोकधातवः स्फुटा अभूवन्। तेषु च पद्मेषु बुद्धवि-
ग्रहा निषण्णाः ते च बुद्धविग्रहाः षड्धर्म्मं देशयन्ति यदुत इमामेव प्रज्ञापारमिताप्रतिसंयुक्तां धर्म्मदेशनां। ये च सत्वैः

पंचविंशति

त्वधर्मैः ऋणकनियता ञ्हत्तवत्तनुत्तरायां संम्यक्संबोधौ ॥ ञ्यथखलु ते बोधिसत्वाः केचगृहस्थाः केचप्रव्रजिताः केचदारकाः दारिकाः
गाउयायालोकधातोर्जयदष्टानबोधिसत्वानसार्द्धमागताः स्वकैः कुशलमूलैर्भगवन्तं ञ्भ्यवकिरन्ति सत्कुर्वन्ति सन्मानयन्ति पूजयन्ति ० काः
केनमपौद्गल्या ञ्यथखलुउत्तरस्यांदिशि गंगानदीवालुकोपमाँल्लोकधातूनतिक्रम्य सर्वावसानिका लोकधातुः सम[illegible]
ह्मगानामगत्र समाधिहस्त्युत्तरश्रीर्नामतथागतोऽर्हन्सम्यक्संबुद्धस्तिष्ठति ध्रियते यापयति स मामव प्रज्ञापारमितां बोधिसत्वानां
धर्मं देशयति ॥ ञ्यथ तत्र लोकधातौ विजयविक्रामी नाम बोधिसत्वो महासत्वकं महान्तं ञ्वभासं दृष्ट्वा तं महान्तं पृथिवीचालं [illegible]गवतो
सचनकमालंहावदृष्ट्वा येन भगवान्समाधिहस्त्युत्तरश्रीस्तथागतोऽर्हन्सम्यक्संबुद्धस्तेनोपसंक्रान्तः उपसंक्रम्य भगवतः पादौ शि
वन्दित्वा भगवन्तं तथागतं समाधिहस्त्युत्तरश्रियमेतदवोचत् । को भगवन्हेतुकः प्रत्ययो महतोऽवभासस्य लोके प्रादुर्भावाय ञ्यं
स्य च महतः पृथिवीचालस्य ञस्य चाशेषवनकस्य तथागतानां व्याहारावभासनदर्शनाय ॥ एवमुक्ते भगवान्समाधिहस्त्युत्तरश्रीस्तथागतो विजयवि
क्रामिणं बोधिसत्वमेतदवोचत् । ञस्ति कुलपुत्र इतो दक्षिणपश्चिमायां दिशि गंगानदीवालुकोपमान्लोकधातूनतिक्रम्य सहानाम लोक
धातुः तत्र शाक्यमुनिर्नाम तथागतोऽर्हन्सम्यक्संबुद्धस्तिष्ठति ध्रियते यापयति स बोधिसत्वानां महासत्वानां प्रज्ञापारमितां संप्रकाशयति । तस्य
यमीदृशोऽनुभावः ॥ ञ्यथखलु विजयविक्रामी बोधिसत्वः समाधिहस्त्युत्तरश्रियं तथागतमेतदवोचत् । गमिष्याम्यहं भगवन्तां सहां लोक
धातुं शाक्यमुनिं तथागतं दर्शनाय वन्दनाय पर्युपासनाय तांश्च बोधिसत्वान्महासत्वान्कुमारभूतान्धारणीप्रतिलब्धान्समा
धिप्रतिलब्धान्समाधिवशिपारमिताप्राप्तान् । गच्छ त्वं कुलपुत्र यस्येदानीं कालं मन्यसे ॥ ञ्यथखलु समाधिहस्त्युत्तरश्री
स्तथागतो नानानलमयानि सुवर्णवर्णानि सहस्रपत्राणि पद्मानि विजयविक्रामिणे बोधिसत्वाय प्रादात् । एभिस्त्वं कुलपुत्र पद्मैः शाक्यमुनि
तथागतमवकिरेः ॥ एवं च वदः समाधिहस्त्युत्तरश्रीर्भगवान्भगवन्तमल्पाबाधतां पृच्छत्यल्पातंकतां लघुत्थानतां यात्रां बलं सुखस्प

१०

गंविन्नतानवरिष्ठकुलोत्पन्नितिवर्षेण भगवान्समाधिहस्त्युत्तरश्रियस्तथागतस्यान्तिकात्संम्यक्संबुद्धेन पद्मानि प्रहितानि भगवतो ऽन्तिकं संप्रेषितानि काचेः
वलंकनपुत्रतत्र वहत्कुलेहययशकस्पगाः ऽहन्नामततोहि बोधिसत्वा यतत्र सहा या लोकधातौ वृपत्रपादा ञ्यथ विजयविक्रामी बोधिसत्वस्तेः स
माधिहस्त्युत्तरश्रिय तथागतस्य सकाशात्तानि नानानलमयानि पद्मानि गृहीत्वा सुवर्णनिर्भासानि सहस्रपत्राणि अनेकैर्बोधिसत्वकोटिनियु
तशतसहस्रैः सार्द्धं प्रव्रजितैर्गृहस्थैर्दारकैर्दारिकाभिश्च सार्द्धं पतिहितपद्मपत्रस्तुतउत्तरपूर्वस्यां दिशि गंगानदीवालुकोपमप्रलोकधातु प्रवृद्धा भगवं
तःसत्कुर्वन्गुरुकुर्वन्मानयन्पूजयन्पुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरच्छत्रध्वजपताकाभिर्जयन्तीभिर्येनेयं सहालोकधातुर्येनेनसं
शाक्यमुनिस्तथागतोऽर्हन्सम्यक्संबुद्धस्तेनोपसंक्रान्तः उपसंक्रम्य भगवतः पादौ शिरसाभिवन्द्य एकान्तेऽस्थात् एकान्तस्थितः
च विजयविक्रामी बोधिसत्वो भगवन्तं शाक्यमुनिमेतदवोचत् । समाधिहस्त्युत्तरश्रीर्भगवान्भगवन्तमल्पाबाधतां पृच्छति अल्पातंकतां ल
घूत्थानतां यात्रां बलं सुखस्पर्शविहारतां च । इमानि च भगवता समाधिहस्त्युत्तरश्रिया तथागतेन नानानलमयानि सुवर्णनिर्भासा
नि सहस्रपत्राणि पद्मानि प्रेषितानि भगवतः ॥ ञ्यथखलु भगवान्शाक्यमुनिस्तथागतस्तानि पद्मानि गृहीत्वा पूर्वदक्षिणस्यां दिशि गंगानदीवालुको
पमान्लोकधातून्प्राक्षिपत् ॥ यैः पद्मैः स लोकधातुः स्फुटोऽभूत् । तेषु च पद्मेषु बुद्धविग्रहा निषण्णाः बुद्धा बुद्धाः षट्पारमिताप्रतिसंयुक्तं धर्मं देशय
न्ति यदुत इमामेव प्रज्ञापारमिताप्रतिसंयुक्तां धर्मदेशनां ॥ ये च सत्वे स धर्मैः ऋणकनियता ञ्हत्तवत्तनुत्तरायां संम्यक्संबोधौ ॥ ञ्यथखलु ते
बोधिसत्वाः केचगृहस्थाः केचप्रव्रजिताः केचदारकाः केचदारिकाः समाधि[illegible] विजयविक्रामिणा बोधिसत्वेन महासत्वेन
सार्द्धमागताः स्वकस्वकैः कुशलमूलैर्भगवन्तं शाक्यमुनिं सत्कुर्वन्ति गुरुकुर्वन्ति सन्मानयन्ति संपूजयन्ति ० ॥ ञ्यथखलु पूर्वदक्षिणस्यां दिशि गं
गानदीवालुकोपमाँल्लोकधातूनतिक्रम्य तत्र सर्वावसानिका लोकधातुर्बोधिमण्डलंकारसुचि नाम तत्र पद्मोत्तरश्रीर्नाम तथागतो



१४



पंचविंश

[illegible]

[illegible]

गवन्तकुलदिसंब्रह्मनकारीःतं कूलपुत्रगवबुद्धक्षेत्रदृश्यागन्कस्यहर्गाईनामदाहिर्गबोधिसत्वाधनेतुसहस्रायांलोकधातौउपपन्नो भगवन्तानुमाबोधिस
त्वेउककुस्वगथागगस्यसत्कारानुनिमानानत्वमस्यानिपप्रानिगृहीत्वासुवर्णनिर्भासानिसहस्रपत्राणिनकेर्बोधिसत्वकोटीनियुतगतसहस्रैर्गृहस्थैः
कैःप्रव्रजितैश्चदारकैर्दारिकाभिश्चसार्द्धंयतिग्रहणःपूर्वस्यादिशिमहान्तम्चिदिन्तपूर्वंगंगानदीवालुकोपमान्पूर्वलोकधातुन्पूःपूर्वाह्णेभगवतःसत्कृत्यगुरु
कुर्वन्मानयन्पूजयन्पुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरछत्रध्वजपताकावैजयन्तीभिर्येनचसहालोकधातुस्तेनसंप्राप्ताःयेनचभगवान्शाक्यमुनिस्तथाग
तःईहंसम्यक्संबुद्धस्तेनोपसंक्रान्तउपसंक्रम्यभगवतःपादौशिरसावन्दित्वाएकान्तेऽस्थात्एकान्तस्थितःसनरोमाबोधिसत्वोभगवन्तंशाक्यमुनिमेत
दवोचत्रक्नशीलगोभगवान्भगवन्तमल्पाबाधतांपरिपृच्छतिअल्पातङ्कतांलघूत्थानतांयात्रांबलंसुखस्पर्शविहारतांचपरिपृच्छति।इमानिचभगवन्
वर्णकनकृनकाभागतनानालमयानिसुवर्णनिर्भासानिसहस्रपत्राणिपद्मानिप्रहिणोतिभगवतः॥अथखलुभगवान्शाक्यमुनिस्तथागतस्तानिपद्मा
निगृहीत्वायच्छतिगंगानदीवालुकोपमालोकधातवस्तेनप्राक्षिपत्तेष्वपिपद्मेषुलोकधातवःस्फुटाअभूवन्।तेषुचपद्मपद्मेषुबुद्धाः
विग्रहानिषण्णाःकारुण्यचबुद्धक्षेत्रधर्म्मंदेशयन्ति॥यदुतइमामेवप्रज्ञापारमितांप्रमुक्ताःधर्म्मदेशनाम्॥येसत्वेषुसधर्म्मःश्रुत्वानियतागा
नुत्तरवन्नन्तुग्राचासंन्यक्संबोधौध्रुवम्अथखलुतेबोधिसत्वास्तस्मात्पद्मसञ्जितास्तदानिकास्तदानीकाकल्पस्यगीतावान्यलोकधातोनतानुग
नबोधिसत्वेनमहासत्वेनसार्द्धमागता॥स्वकस्वकेषुक्षेत्रेषुलेभगवन्तंशाक्यमुनिंसत्कुर्वन्तस्तस्मान्यसंपूर्णकान्तस्यदीदृशाअथखलुधर्म्मादिशि
गंगानदीवालुकोपमालोकधातून्व्यतिक्रम्यसर्वापश्चिमासुलोकधातुःपश्चिमानामतत्रयेनतायानाम्तथागतोर्हंसम्यक्संबुद्धस्तिष्ठतिध्रियतेयापयतिसद्धर्म्म
देशयतितस्यबोधिसत्वानांमहासत्वानांपद्मपाणिर्नामबोधिसत्वोमहासत्वतत्रासनदर्शनस्यकल्पमहाप्रतिष्ठितबाल
व्यवलोकयनकमाभ्यवंच्छायनभगवन्तरत्नार्चिषंतथागतमेवाहअर्हंसम्यक्संबुद्धस्तेनोपसंक्रान्तउपसंक्रम्यभगवतःपादौवन्दित्वानकथा
गतंपप्रच्छवमगदवोचत्कोहेतुःकःप्रत्ययोऽयमपीदृशसत्वलोकप्रादुर्भावायेनन्द्यचमहत्पृथिवीचालस्यास्यावभासश्चलोकस्यगच्छेल

लोकस्यसन्दर्शनायाःबोकवेहगवानपश्चिमस्यांदिशिन्दबोधिसत्वेहदवोवत्र्याकस्मिन्कूलपुत्रउत्तरस्यांदिशिगंगानदीवालुकोपमान्लोक
धातुन्व्यतिक्रम्यसहानामलोकधातुस्तत्रशाक्यमुनिर्नामतथागतोर्हंसम्यक्संबुद्धस्तिष्ठतिध्रियतेयापयतिसबोधिसत्वानांमहासत्वानांप्रज्ञापारमितां
संप्रकाशयतितस्यायमीदृशोऽनुभावःअथखलुपद्मपाणिर्बोधिसत्वोऽयंपद्मोत्तरंतथागतमेतदवोचत्॥गमिष्याम्यहंभगवंस्तांसहालोकधातुंत
शाक्यमुनिंतथागतंद्रष्टुंवन्दनायपर्युपासनायतांश्चबोधिसत्वान्महासत्वान्धारणीप्रतिलब्धान्समाधिप्रतिलब्धान्पारमिताप्राप्तान्
भगवानाहगच्छकुलपुत्रयस्येदानींकालंमन्यसे।एवंचकुलपुत्रवदभगवान्शाक्यमुनिस्तथागतसमन्तभद्रोभगवानतारत्नार्चिस्तथागतः
सलोकस्यसादरा॥येबोधिसत्वाःकुलपुत्रपद्मोत्तरःशाक्यमुनिस्तथागतमल्पाबाधंपरिपृच्छतिअल्पातङ्कतांलघूत्थानतांयात्रांबलंसुखस्पर्शविहारतांचपरिपृच्छति
स्यहर्गाईनासहितेनबोधिसत्वाधनेतुसहस्रायांलोकधातावुपपन्नाअथपद्मपाणिर्बोधिसत्वःपद्मोत्तरस्यतथागतस्यसकाशात्सुवर्णनिर्भासानिसहस्रपत्राणिपद्मा
निगृहीत्वासुवर्णनिर्भासानिसहस्रपत्राणिपद्मानिनकेर्बोधिसत्वकोटीनियुतगतसहस्रैर्गृहस्थैःप्रव्रजितैश्चदारकैर्दारिकाभिश्चसार्द्धंयतिगृह्णन्पश्चिमस्यांदिशि
गंगानदीवालुकोपमान्लोकधातुन्पूर्वंबुद्धान्भगवतःसत्कुर्वन्गुरुकुर्वन्मानयन्पूजयन्पुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरछत्र
ध्वजपताकाभिर्वैजयन्तीभिर्येनचसहालोकधातुस्तेनसंप्राप्तःयेनचभगवान्शाक्यमुनिस्तथागतोर्हंसम्यक्संबुद्धस्तेनोपसंक्रान्तःउपसंक्रम्यभगवतःपा
दौशिरसाभिवन्द्यैकान्तेऽस्थात्एकान्तस्थितश्चपद्मपाणिर्बोधिसत्वोभगवन्तंशाक्यमुनिमेतदवोचत्॥पद्मोत्तरोभगवान्भगवन्तमल्पाबाधतांपरिपृच्छ
त्यल्पातङ्कतांलघूत्थानतांयात्रांबलंसुखस्पर्शविहारतांचपरिपृच्छति।इमानिचभगवन्पद्मोत्तरस्तथागतोहंसम्यक्संबुद्धोऽनानारत्नम
यानिसुवर्णनिर्भासानिसहस्रपत्राणिपद्मानिप्रहिणोतिभगवतः॥अथखलुभगवान्शाक्यमुनिस्तथागतस्तानिपद्मानिगृहीत्वापश्चिमायांदिशिगं
गानदीवालुकोपमालोकधातवस्तेनप्राक्षिपत्तेष्वपिपद्मेषुलोकधातवःस्फुटाअभूवन्।तेषुचपद्मपद्मेषुबुद्धविग्रहानिषण्णाःकारुण्यचबुद्ध
क्षेत्रधर्म्मंदेशयन्ति॥यदुतइमामेवप्रज्ञापारमितांप्रतिसंयुक्तांधर्म्मदेशनाम्॥येसत्वेषुसधर्म्मःश्रुत्वानियताअनुत्तरवन्न

पंचविंशति
११

नं नाजानमवकुवाधो॥ अथखलु गं बोधिसत्वा कं हस्तकैच प्रव्रजितैश्च दानिकाश्च दानिकाभिश्च स्तुउपप्रायालोकधातोरुपगम्य बोधिस
त्वोमहासत्वेन सार्द्धमागमत्॥ स्वकस्वकैश्च कुशलमूलैर्भगवन्तं अभ्यकिरनि संख्येयगुणस्य सम्मान्य संपूज्य एकान्ते न्यषीदत्॥ अथखलु पश्चिमायां
दिशि गंगानदीवालुकोपमान् लोकधातूनतिक्रम्य नैऋत्यः सर्वावसानिका लोकधातुर्न्त्यानाम तत्र नन्दश्रीनाम तथागत सर्वमहांतं पृथिवी
हस्तम्यकं वृष्ठति तिष्ठति ध्रियते यापयति॥ स चैभ्यः प्रज्ञापारमितां बोधिसत्वानां धर्मं देशयति॥ अथखलु तत्र लोकधातौ नन्द नाम बोधिसत्वो
महासत्वो महान्तमवभासं दृष्ट्वा महान्तं पृथिवीचालनं भगवतो वचनकामामलवलव्रष्ठा येन भगवान्नन्दश्रीस्तथागतो हस्तम्यकं वृ:
कत्प्रसंक्रान्तः। उपसंक्रम्य भगवतः पादाभिवन्द्य नन्दश्रियं तथागतमेतदवोचत्॥ को भगवन् हेतुः कः प्रत्यय स्य महतोऽवभा
स्य लोके प्रादुर्भावाय। अयं च महान् पृथिवीचालः स्यात् चास्य नैकस्य तथागतात् भवत्यसन्दर्शनाय। एवमुक्ते भगवान्नन्दश्रीस्तथागतो
नन्ददत्तं बोधिसत्वं महासत्वमेतदवोचत्॥ अस्ति कुलपुत्र इतः पूर्वस्यां दिशि गंगानदीवालुकोपमान् लोकधातूनतिक्रम्य
सहा नाम लोकधातुः तत्र शाक्यमुनिर्नाम तथागतो हस्तम्यकं वृष्ठति तिष्ठति ध्रियते यापयति स बोधिसत्वानां महासत्वानां प्रज्ञापारमितां संप्र
काशयति तस्यायमीदृशोऽनुभावः॥ अथखलु नन्ददत्तो बोधिसत्वो नन्दश्रियं तथागतमेतदवोचत्॥ गमिष्याम्यहं भगवन् तां सहां लोकधा
तुं तं च शाक्यमुनिं तथागतं दर्शनाय वन्दनाय पर्युपासनाय तांश्च बोधिसत्वान् महासत्वान् तच्च यत्र बोधिसत्वाः कुमारभूताः अन्यतीप्रतिलब्धान्समा
धिनि तीरगतान्सर्वसमाधिवशिपारमिप्राप्तान्॥ भगवानाह॥ गच्छ त्वं कुलपुत्र यस्येदानीं कालं मन्यसे॥ अथखलु नन्दश्रीस्तथागतो
नानारत्नमयानि सुवर्णनिर्भासानि सहस्रपत्राणि पद्मानि नन्ददत्ताय बोधिसत्वाय प्रादात्॥ एवं चावदत् कुलपुत्र मम वचनेन भगवन्त
शाक्यमुनिं अल्पाबाधतां पृच्छ अल्पातङ्कतां लघुत्थानतां यात्रां बलं सुखस्पर्शविहारतां च पृच्छ इमानि च पद्मानि तस्य भगवतः प्रेष
यस्व॥ इमानि च त्वया भगवानन्दश्रियास्तथागतेनार्हता सम्यक्संबुद्धेन पद्मानि प्रहितानि भगवतः। त्वं पि कुलपुत्र सम्प्रजानकारी चरेत्कुल

११

नेतन्त्र पद्धसुत्रुसाज्ञागकव्यहन्ता ईनासदाहि बोधिसत्वा येगत्व महान्तं लोकधातुरूपवत्रो॥ अथ नन्ददत्तो बोधिसत्वो नन्दश्रियं तथागतमसका
गतोऽभिनानारत्नमयानि पद्मानि गृहीत्वा सुवर्णनिर्भासानि सहस्रपत्राणि अनेकैर्बोधिसत्वकोटिनियुतशतसहस्रैर्गृहस्थैः प्रव्रजितैर्दानकैर्दानिका
श्च सार्द्धं परिवृतः पुरस्कृतः उपनिश्रित्य दिशि गंगानदीवालुकोपमपमलु लोकधातुपर्यवहारगच्छन् सर्वत्र बुद्धान् भगवतः सत्कुर्वन् गुरुकुर्वन् मानयन् पूजयन्
मात्यविलेपनचूर्णचीवरच्छत्रध्वजपताकादेवश्च यक्षोर्थेन यं सहालोकधातुर्येनसंप्रापायेन च शाक्यमुनिस्तथागतो हस्तम्यकं वृष्ठस्तेनोपसंक्रान्त
उपसंक्रम्य भगवतः पादौ शिरसाभिवन्द्य एकान्तेऽस्थात्॥ एकान्तस्थितो नन्ददत्तो बोधिसत्वो भगवन्तं शाक्यमुनिमेतदवोचत्॥ नन्दश्रीर्भगवान्भगवन्तमल्पा
बाधतां पृच्छति अल्पातङ्कं लघुत्थानतां यात्रां बलं सुखस्पर्शविहारतां च पृच्छति॥ इमानि च भगवान्नन्दश्रियास्तथागतस्यार्हतः सम्यक्संबुद्ध
स्य नानारत्नमयानि सुवर्णनिर्भासानि सहस्रपत्राणि पद्मानि प्रहितानि भगवतः॥ अथखलु भगवान् शाक्यमुनिस्तथागतस्तानि पद्मानि गृहीत्वा यस्यां उपरिष्टा
दिशि गंगानदीवालुकोपमान् लोकधातुष्वक्षिपत्॥ तेषु पद्मेषु लोकधातवः स्थिता अभूवन्। तेषु च पद्मेषु बुद्धा निषण्णाः पर्यङ्कं बद्ध्वा
तु धर्मं देशयन्ति॥ यदुत इमामेव प्रज्ञापारमितामारभ्य बोधिसत्वानां धर्मं देशयन्ति ये च सत्वास्तेषु धर्मेषु श्रुत्वा नियता अभूवन्ननुत्तरायां सम्यक्संबोधौ॥ अथख
लु नन्ददत्तो बोधिसत्वश्च गृहस्थैश्च प्रव्रजितैश्च दारकैश्च दारिकाभिश्च स्कन्धानन्दायालोकधातोर्नन्ददत्तेन बोधिसत्वेन महासत्वेन सार्द्धमागमन्॥ स्वकस्व
कैः कुशलमूलैर्भगवन्तं अभ्यकिरन् असंख्येयगुणं सम्मान्य संपूज्य एकान्ते न्यषीदन्॥ अथखलु तेन कालेन तेन समयेन त्रिसाहस्रमहासाहस्रलोकधातुः सपद्मन
न यथा संस्थिता पुष्पाभिकीर्णा अवसक्तपट्टदामकलापा उच्छ्रितच्छत्रध्वजपताका नानालङ्कारवृक्षोपशोभिता [illegible] स्तम्भोपशोभि
ता हता॥ तद्यथापि नाम पद्मावती लोकधातुः समन्तकुसुमस्य तथागतस्य बुद्धक्षेत्रं मञ्जुश्रीकुमारभूतस्य च प्रतिवसति भगवतिस्य बोधिसत्व
अन्ये च महौजस्का महौजस्का बोधिसत्वास्तथा सदेवकं लोकं सब्रह्मकं समारकं सश्रमणब्राह्मणिकां प्रजां सदेवमानुषासुरां बोधिस
त्वाः कुमारभूतान्॥ ॥सतखलु स्तत्र भगवान् आगत्य निषद्य सामन्तकासनं [illegible] निषद्य तस्मिन् धर्मे न विशेषादुपलभन् बोधिसत्वेन महा

पंचविंशति
१८

सत्वेन प्रज्ञापारमितायां योगः करणीयः॥ इति समासतः सर्वाधिकारमनसिकारसहगतं [illegible]॥ एवमुक्ते आयुष्मान् शारिपुत्रो भगवन्तमेतदवोचत् क
थं भगवन् बोधिसत्वेन महासत्वेन सर्वाकारं सर्वधर्मानभिसंबोद्धुकामेन प्रज्ञापारमितायां योगः करणीयः॥ एवमुक्ते भगवानायुष्मन्तं शारिपुत्रमेतदवोचत्। इ
ह शारिपुत्र बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां स्थित्वा न स्थानयोगेन दानपारमिता परिपूरयितव्या। अपरित्यागयोगेन दायकप्रतिग्राहकानुपलब्धिता
मुपादाय शीलपारमिता परिपूरयितव्या। आपत्त्यनापत्त्यनध्यापत्तितामुपादाय क्षान्तिपारमिता परिपूरयितव्या। अक्षोभणतामुपादा
य वीर्यपारमिता परिपूरयितव्या। कायचित्तवीर्यासंसनतामुपादाय ध्यानपारमिता परिपूरयितव्या। अनास्वादनतामुपादाय
प्रज्ञापारमिता परिपूरयितव्या। प्रज्ञादौष्प्रज्ञानुपलब्धितामुपादाय॥ इति त्यागतः स्वभावलक्षणतः सहगतं [illegible]॥ पुनरपरं शा
रिपुत्र [illegible] यः दशदिक्षु गंगानदीवालुकोपमलोकधातुषु सत्वास्तान् सर्वान् निरुपधिशेषे निर्वाणधातौ प्रतिष्ठापयितुकामेन बोधि
सत्वेन महासत्वेन प्रज्ञापारमितायां शिक्षितव्यं॥ इति समासतः परार्थसम्पन्न[illegible]॥ एवमस्य एतस्मात् चित्तोत्पादेन प्रतिष्ठापयितुकाम
नेन [illegible] यावत् [illegible] विविक्तविहारासमर्थः [illegible] प्रतिष्ठापयितुकामेन बोधिसत्वेन महासत्वेन प्रज्ञापारमि
तायां शिक्षितव्यं॥ इति [illegible] परार्थसम्पन्न[illegible]॥ पुनरपरं शारिपुत्र सर्वाकारं सर्वधर्मानभिसंबोद्धुकामेन बोधिसत्वेन महासत्वेन प्रज्ञा
पारमितायां योगः करणीयः॥ इति [illegible]॥ एवमिह शारिपुत्र बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां स्थित्वा [illegible]
दानपारमिता परिपूरयितव्या॥ [illegible] शीलपारमिता क्षान्तिपारमिता वीर्यपारमिता ध्यानपार
मिता प्रज्ञापारमिता परिपूरयितव्या। प्रज्ञादौष्प्रज्ञानुपलब्धितामुपादाय॥ इति [illegible]॥ एवं प्रज्ञापारमितायां प
रिपूर्य [illegible] बोधिसत्वेन महासत्वेन [illegible] परिपूरयितव्यानि चत्वारि स्मृत्युपस्थानानि [illegible] ऋद्धिपादाः पंचेन्द्रियाणि पं
च बलानि [illegible] मार्गः परिपूरयितव्यः। शून्यतासमाधिर्भावयितव्यः। आनिमित्तः समाधिर्भावयितव्यः। अप्रणिहितः समा
धिर्भावयितव्यः॥ एवं चत्वारि ध्यानानि चत्वार्यप्रमाणानि चतस्र आरूप्यसमापत्तयः। अष्टौ विमोक्षा नवानुपूर्वविहारसमापत्तयः। अन

शुभसंज्ञा भावयितव्या। [illegible] आध्मातकसंज्ञा विपूयकसंज्ञा विलोहितकसंज्ञा विनीलकसंज्ञा विखादितकसंज्ञा [illegible]
ज्ञा विदग्धकसंज्ञा [illegible] संज्ञा भावयितव्या। बुद्धानुस्मृतिर्भावयितव्या। धर्मानुस्मृतिर्भावयितव्या। संघानुस्मृतिर्भावयितव्या। शीलानु
स्मृतिर्भावयितव्या। त्यागानुस्मृतिर्भावयितव्या। देवतानुस्मृतिर्भावयितव्या। आनापानानुस्मृतिर्भावयितव्या। [illegible]नुस्मृतिर्भावयितव्या।
मरणानुस्मृतिर्भावयितव्या। अनित्यसंज्ञा भावयितव्या। दुःखसंज्ञा भावयितव्या। अनात्मसंज्ञा भावयितव्या। अशुभसंज्ञा भावयित
व्या। मरणसंज्ञा भावयितव्या। सर्वलोके अनभिरतिसंज्ञा भावयितव्या। आहारे प्रतिकूलसंज्ञा भावयितव्या। निरोधसंज्ञा भावयि
तव्या। क्षयसंज्ञा भावयितव्या॥ यथाभूतसंज्ञा भावयितव्या॥ सवितर्कः सविचारः समाधिर्भावयितव्यः। अवितर्को विचारमात्रः समा
धिर्भावयितव्यः। अवितर्कोऽविचारः समाधिर्भावयितव्यः। अनाज्ञातमाज्ञास्यामीन्द्रियं भावयितव्यं। आज्ञेन्द्रियं भावयितव्यं। आज्ञातावीन्द्रियं भावयित
व्यं। अशुभध्यानं भावयितव्यं। [illegible] ज्ञानं भावयितव्यं॥ संज्ञानं भावयितव्यं। शमथविपश्यना भावयितव्या। तिस्रो विद्या भावयितव्याः। चतस्रः प्रतिसं
विदो भावयितव्याः॥ बलानि वैशारद्यानि भावयितव्यानि। [illegible] भावयितव्या॥ [illegible]पारमिता भावयितव्या॥ महाकरुणा भावयि
तव्या॥ महामुदिता भावयितव्या॥ महोपेक्षा भावयितव्या॥ इति [illegible]॥ सर्वज्ञतां ज्ञानं दर्शनं चावलोक
यितुकामेन बोधिसत्वेन महासत्वेन प्रज्ञापारमिता भावयितव्या॥ मार्गज्ञतां परिपूरयितुकामेन सर्वाकारज्ञतामनुप्राप्तुकामेन स
र्ववासनानुसन्धि[illegible] परिपूरयितुकामेन [illegible] ध्यानयितुकामेन बोधिसत्वेन महासत्वेन प्रज्ञापा
रमितायां योगः करणीयः॥ एवं बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां शिक्षितव्यं। बोधिसत्वन्याममवक्रमितुकामेन श्रावकप्रत्येकबुद्ध
भूमिमतिक्रमितुकामेन अविनिवर्तनीयभूमौ स्थातुकामेन षडभिज्ञतां [illegible] सर्वसत्वचित्त
चरितविस्यन्दितानि विज्ञातुकामेन सर्वश्रावकप्रत्येकबुद्धानां ज्ञानमभिभवितुकामेन धारणीसमाधिमुखं प्रतिलब्धुकामेन॥ इति प्रय

गसहगतो ज्वलनोपमः॥ मत्सरिणः सत्त्वान्दाने प्रतिष्ठापयितुकामेन सर्वश्रावकप्रत्येकबुद्धेभ्यो दानानि रोचयमानानि एकेनानुमोदनासहगतेन चित्तेना-
भिभवितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं॥ इति दानपारमितासहगतो महानिधानोपमः॥ दुःशीलान् शीले प्रतिष्ठा-
पयितुकामेन सर्वश्रावकप्रत्येकबुद्धानां शीलमेकेनानुमोदनासहगतेन चित्तेनाभिभवितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमिता-
यां शिक्षितव्यं। इति शीलपारमितासहगतो रत्नाकरोपमः॥ व्यापन्नचित्तान्क्षान्तौ प्रतिष्ठापयितुकामेन सर्वश्रावकप्रत्येकबुद्धानां क्षान्तिमेके-
नानुमोदनासहगतेन चित्तेनाभिभवितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं॥ इति क्षान्तिसहगतो महार्णवोपमः॥
कुसीदान्वीर्ये प्रतिष्ठापयितुकामेन सर्वश्रावकप्रत्येकबुद्धानां वीर्यमेकेनानुमोदनासहगतेन चित्तेनाभिभवितुकामेन बोधिसत्त्वेन महास-
त्त्वेन प्रज्ञापारमितायां शिक्षितव्यं॥ इति वीर्यसहगतो वज्रोपमः॥ विक्षिप्तचित्तान्ध्याने प्रतिष्ठापयितुकामेन सर्वश्रावकप्रत्येकबुद्धानां ध्यानमे-
केनानुमोदनासहगतेन चित्तेनाभिभवितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं॥ इति ध्यानसहगतः पर्वतोपमः॥
दुष्प्रज्ञान्सत्त्वान्प्रज्ञायां प्रतिष्ठापयितुकामेन सर्वश्रावकप्रत्येकबुद्धानां प्रज्ञामेकेनानुमोदनासहगतेन चित्तेनाभिभवितुकामेन बोधिसत्त्वे-
न महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं॥ इति प्रज्ञासहगतो महाभैषज्योपमः॥ एकमपि कुशलचित्तोत्पादं सर्वाकारज्ञतायामुपायकौशल-
न परिणामयन्नपरिमितमप्रमेयमसंख्येयं कर्तुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं॥ अल्पमपि दानं ददता॥ अल्पमपि शीलं रक्षता अल्प-
मपि क्षान्तिं भावयता अल्पमपि वीर्यमारभमाणेन अल्पमपि ध्यानं समापद्यमानेनाल्पामपि प्रज्ञां भावयता सर्वसत्त्वेभ्यः सर्वाकारज्ञतामुपा-
यकौशल्येन परिणामयतानन्तमपरिमितमप्रमेयमसंख्येयं कर्तुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं॥ पुनरपरं शारिपुत्र बोधि-
सत्त्वेन महासत्त्वेन दानपारमितायां चरता प्रज्ञापारमितायां शिक्षितव्यं॥ एवं शीलपारमितायां चरता क्षान्तिपारमितायां चरता वीर्यपा-
रमितायां चरता ध्यानपारमितायां चरता प्रज्ञापारमितायां चरता बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं॥ सर्वसत्त्वाना-
[illegible] यमवलोकयितुं दुःखोद्धर्तुकामेन कल्पशतसहस्रमपि शीलं सत्त्वापकृष्टुकामेन बुद्धकुले उपपत्तुका-

मेनाशीत्यनुव्यञ्जनानि द्वात्रिंशन्महापुरुषलक्षणानि च निष्पादयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं॥ इत्युपायसहग-
तोपमः॥ ॥पुनरपरं शारिपुत्र बुद्धकायं निष्पादयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं॥ बुद्धभूमिमाक्रमितुकामे-
न प्रज्ञापारमितायां शिक्षितव्यं॥ ॥बुद्धबोधिसत्त्वैर्विहारैर्विहर्तुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं॥ पुनरपरं
शारिपुत्र बोधिसत्त्वेन महासत्त्वेन एकेन स्वरेण पूर्वस्यां दिशि गङ्गानदीवालुकोपमान्लोकधातून्विज्ञापयितुकामेन प्रज्ञापारमितायां शिक्षि-
तव्यं॥ एवं दक्षिणस्यां पश्चिमायामुत्तरस्यां विदिक्ष्वधस्तादूर्ध्वमेकेन स्वरेण गङ्गानदीवालुकोपमाल्लोकधातून्विज्ञापयितुकामेन प्रज्ञापार-
मितायां शिक्षितव्यं॥ पुनरपरं शारिपुत्र बोधिसत्त्वेन महासत्त्वेन त्रिरत्नवंशस्यानुपच्छेदाय स्थातुकामेन प्रज्ञापारमितायां शिक्षितव्यं॥ पुनरप-
रं शारिपुत्र बोधिसत्त्वा ये महासत्त्वा ये कुशलमूलेनाकाङ्क्षन्ति तथागतानर्हतः सम्यक्संबुद्धान्सत्कर्तुं गुरुकर्तुं मानयितुं पूजयितुं तानि तानि मम कु-
शलमूलानि समृध्यन्त्विति बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं॥ इति प्रणिधिसहगतश्चिन्तामणिसदृशः॥ ॥पुनरपरं
शारिपुत्र बोधिसत्त्वेन महासत्त्वेन सर्वसत्त्वानां मनोरथान्परिपूरयितुकामेन अन्नपानवस्त्रगन्धमाल्यविलेपनचूर्णचीवरशयनासनगृ-
हधनधान्यालंकाररत्नमणिमुक्तावैडूर्यशंखशिलाप्रवालजातरूपरजतयानवाह्यादिभिरुपकरणैः प्रज्ञापारमितायां शिक्षितव्यं॥
पुनरपरं शारिपुत्र बोधिसत्त्वेन महासत्त्वेन धर्मधातुपरमानाकाशधातुपर्यवसानान्सर्वसत्त्वान्दानपारमितायां प्रतिष्ठापयितुका-
मेन शीलपारमितायां क्षान्तिपारमितायां वीर्यपारमितायां ध्यानपारमितायां प्रज्ञापारमितायां प्रतिष्ठापयितुकामेन प्रज्ञापारमि-
तायां शिक्षितव्यं॥ ॥पुनरपरं शारिपुत्र बोधिसत्त्वेन महासत्त्वेन एकमपि कुशलचित्तोत्पादमक्षयं कर्तुकामेन यावद्बोधिमण्डे संबो-
धविति प्रज्ञापारमितायां शिक्षितव्यं॥ ॥पुनरपरं शारिपुत्र यद्दशसु दिक्षु बुद्धा भगवन्तो मम वर्णं भाषेरन्निति बोधिसत्त्वेन महासत्त्वेन
प्रज्ञापारमितायां शिक्षितव्यं॥ ॥इति बलसहगत आदित्योपमः॥ ॥पुनरपरं शारिपुत्र बोधिसत्त्वेन महासत्त्वेन [illegible]

पंचविंशति
२०

तायां प्रतिष्ठितुकामेन प्रज्ञापारमितायां शिक्षितव्यं॥ एवं हि शून्यतायां अध्यात्मशून्यतायां शून्यताशून्यतायां महाशून्यतायां परमार्थशून्यता-
यां संस्कृतशून्यतायां असंस्कृतशून्यतायां अत्यन्तशून्यतायां अनवराग्रशून्यतायां अनवकारशून्यतायां प्रकृतिशून्यतायां सर्वधर्मशून्यतायां स्वलक्षणशून्यतायां
अनुपलंभशून्यतायां अभावशून्यतायां भावशून्यतायां स्वभावशून्यतायां परभावशून्यतायां प्रतिष्ठितुकामेन बोधिसत्वेन महा-
सत्वेन प्रज्ञापारमितायां शिक्षितव्यं॥ ॥पुनरपरं शारिपुत्र बोधिसत्वेन महासत्वेन सर्वधर्मतथतामवबोद्धुकामेन प्रज्ञापारमितायां शिक्षि-
तव्यं॥ ॥एवं धर्मधातुतथतामवबोद्धुकामेन बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां शिक्षितव्यं॥ ॥सर्वभूतकोटिमवबो-
द्धुकामेन बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां शिक्षितव्यं॥ ॥एवं हि शारिपुत्र बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां शिक्षितव्यं
॥ ॥पुनरपरं शारिपुत्र त्रिसाहस्रमहासाहस्रे लोकधातौ ये पृथिव्यप्तेजोवायुपरमाणवस्तान्गणयितुकामेन बोधिसत्वेन महासत्वेन प्रज्ञापार-
मितायां शिक्षितव्यं॥ ॥पुनरपरं शारिपुत्र बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां एवं ज्ञातानि। एवं दानं ददन्महाफलं भवति। एवं
दानं ददन् क्षत्रियमहाशालकुलेषूपपद्यते। ब्राह्मणमहाशालकुलेषूपपद्यते। एवं दानं ददन् तुषितेषूपपद्यते। एवं दानं ददन् निर्माण-
रतिषूपपद्यते। एवं दानं ददन् परनिर्मितवशवर्त्तिदेवेषूपपद्यते। एवं दानं ददन् प्रथमध्यानप्रतिलाभाय संवर्त्तते। एवं दानं ददन् द्वि-
तीयध्यानप्रतिलाभाय संवर्त्तते। एवं दानं ददन् तृतीयध्यानप्रतिलाभाय संवर्त्तते। एवं दानं ददन् चतुर्थध्यानप्रतिलाभाय संवर्त्तते। एवं दानं द-
दन्नाकाशानन्त्यायतनसमापत्तिप्रतिलाभाय संवर्त्तते। एवं दानं ददन् विज्ञानानन्त्यायतनसमापत्तिप्रतिलाभाय संवर्त्तते। एवं दानं
ददन्नाकिंचन्यायतनसमापत्तिप्रतिलाभाय संवर्त्तते। एवं दानं ददन् नैवसंज्ञानासंज्ञायतनसमापत्तिप्रतिलाभाय संवर्त्तते। एवं दानं
ददन् [illegible] प्रतिलाभाय संवर्त्तते। एवं दानं ददन् स्रोतआपत्तिफलप्रतिलाभाय संवर्त्तते। एवं दानं ददन् सकृदागा-
मिफलप्रतिलाभाय संवर्त्तते। एवं दानं ददन् अनागामिफलप्रतिलाभाय संवर्त्तते। एवं दानं ददन् अर्हत्वप्रतिलाभाय संवर्त्तते। एवं दानं दद-

गुरुः
२०

महत्त्वं प्रतिलाभाय संवर्त्तते। एवं दानं ददन् प्रतिलाभाय संवर्त्तते। एवं दानं ददन् सम्यक्संबुद्धत्वप्रतिलाभाय संवर्त्तते॥ पुनरपरं शारिपुत्र बोधिसत्वेन महास-
त्वेन प्रज्ञापारमितायां चरता एवमुपायकौशलेन दानं ददन् दानपारमितां परिपूरयति। एवं दानं ददन् शीलपारमितां परिपूरयति। एवं दा-
नं ददन् क्षान्तिपारमितां परिपूरयति। एवं दानं ददन् वीर्यपारमितां परिपूरयति। एवं दानं ददन् ध्यानपारमितां परिपूरयति। एवं दानं ददन् प्र-
ज्ञापारमितां परिपूरयति॥ एवमुक्ते आयुष्मान् शारिपुत्रो भगवन्तमेतदवोचत्॥ कथं भगवन् बोधिसत्वेन महासत्वेन कथं दानं ददता दानपारमिता परि-
पूरिता भवति॥ कथं दानं ददता शीलपारमिता परिपूरिता भवति। कथं दानं ददता क्षान्तिपारमिता परिपूरिता भवति। कथं दानं ददता वीर्यपार-
मितां परिपूरयति॥ कथं दानं ददता ध्यानपारमितां परिपूरयति। कथं भगवन् बोधिसत्वेन महासत्वेन दानं ददता प्रज्ञापारमिता परिपूरिता भ-
वति॥ भगवानाह॥ अनुपलम्भयोगेन दायकस्य ग्राहकस्य च दानपारमितां परिपूरिता भवति। आपत्त्यनापत्त्यनध्यापत्तितः शीलपारमिता
परिपूरिता भवति॥ अक्षोभितः क्षान्तिपारमिता परिपूरिता भवति। कायचेतसिकवीर्यासंसनाद्वीर्यपारमिता परिपूरिता भव-
ति। अविक्षेपासंकल्पनतामुपादाय ध्यानपारमिता परिपूरिता भवति। सर्वधर्मप्रज्ञानानुपलम्भयोगेन प्रज्ञापारमिता परिपूरिता भवति। एवं बो-
धिसत्वेन महासत्वेन दानं ददता षट्पारमिता परिपूरिता भवन्ति॥ एवं शीलपारमितायां सर्वाः ६ पारमिताः परिपूरयन्ते। एवं क्षान्तिपारमितायां
सर्वाः ६ पारमिताः परिपूरयन्ते॥ एवं वीर्यपारमितायां सर्वाः ६ पारमिताः परिपूरयन्ते। एवं ध्यानपारमितायां सर्वाः ६ पारमिताः परिपूरयन्ते।
एवं प्रज्ञापारमितायां सर्वाः ६ पारमिताः परिपूरयन्ते। [illegible]॥ पुनरपरं शारिपुत्र बोधिसत्वेन महासत्वेन एकचि-
त्तोत्पादेन पूर्वस्यां दिशि गंगानदीवालुकोपमान् लोकधातून् समतिक्रमितुकामेन॥ एवं दक्षिणपश्चिमायामुत्तरस्यामधऊर्ध्वं विदिक्षु गंगा-
नदीवालुकोपमान् लोकधातून् समतिक्रमितुकामेन बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां शिक्षितव्यं॥ पुनरपरं शारिपुत्र त्रिसाहस्रमहासाहस्रे लो-
कधातौ यो महासमुद्रेषु उदकस्कन्धो महानदीषु सरस्सु तडागेषु पल्वलेषु तं सर्वं एकवालाग्रकोट्यापनेतुकामेन न च तत्र जातानां विहे-
ठयितुकामेन बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां शिक्षितव्यं॥ पुनरपरं शारिपुत्र बोधिसत्वेन महासत्वेन त्रिसाहस्रमहासाहस्रे लोकधातुः

पंचविंशति
२१

कल्पोद्दाहाग्निप्रदीप्तमेकेन मुखवातेन प्रशमयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं॥ पुनरपरं शारिपुत्र बोधिसत्वेन महासत्वेन या त्रिसाहस्रे लोकधातौ महावातमण्डलीया
गसम्बर्त्तावर्त्तमाला यां बालमेरु महामेरुं चक्रवाडमहाचक्रवाडान्वा सर्वपर्वतमहापृथिवी विध्वंसनोति विकिरति निर्मथ्य विकरोति तां विक्षो
भ्यावातमण्डलीमङ्गुलिपर्वाग्रेण छादयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं॥ पुनरपरं शारिपुत्र बोधिसत्वेन महासत्वेन त्रिसाहस्रमहासा
हस्रे लोकधातौ यं सुमेरुं महासुमेरुं चक्रवाडमहाचक्रवाडान्यावान्कालपर्वतान् सर्वमेकेन पर्यङ्केनाक्रमितुकामेन प्रज्ञापारमितायां शिक्षितव्यं॥ पुनरपरं शा
रिपुत्र बोधिसत्वेन महासत्वेन त्रिसाहस्रमहासाहस्रलोकधातौ यः सुमेरुमहासुमेरुचक्रवाडमहाचक्रवाडादयः पर्वतास्तानेकवालेन वल्लार्त्तसंख्ये
यानप्रमाणान् लोकधातूनतिक्रामयितुं क्षिपयमिति प्रज्ञापारमितायां शिक्षितव्यं॥ पुनरपरं शारिपुत्र बोधिसत्वेन महासत्वेन दशसु दिक्ष्वेकैकस्यां दि
ष्ठन्तु बुद्धा भगवन्तः दिव्येन चक्षुषा द्रष्टुकामेन तेषां धर्म्मदेशनां दिव्येन श्रोत्रेण श्रोतुकामेन सर्वसत्वचित्तचरितानि च ज्ञातुकामेन सर्वेषां
पूर्वनिवासमनुस्मर्तुकामेन आश्रवक्षयज्ञानाभिज्ञामभिनिर्हर्तुकामेन चहेतिकादिसाक्षात्कर्तुकामेन प्रज्ञापारमितायां शिक्षितव्यं॥ षडभिज्ञाविहारसह
गतो महानागोपमः॥ पुनरपरं शारिपुत्र बोधिसत्वेन महासत्वेन दशसु दिक्ष्वेकैकस्यां गंगानदीवालुकोपमेषु लोकधातुषु बुद्धा भगवन्तस्त
श्रावकबोधिसत्वसंघानेकेन पिण्डपातेन प्रतिपादयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं॥ पुनरपरं शारिपुत्र बोधिसत्वेन महासत्वेन पूर्वस्यां
दिशि गंगानदीवालुकोपमेषु लोकधातुषु ये सत्वास्तान् शीलस्कन्धे प्रतिष्ठापयितुकामेन समाधिस्कन्धे प्रतिष्ठापयितुकामेन प्रज्ञास्कन्धे प्रतिष्ठापयितुकामेन विमु
क्तिस्कन्धे प्रतिष्ठापयितुकामेन विमुक्तिज्ञानदर्शनस्कन्धे प्रतिष्ठापयितुकामेन स्रोतापत्तिफले प्रतिष्ठापयितुकामेन सकृदागामिफ
ले प्रतिष्ठापयितुकामेन अर्हत्वे प्रतिष्ठापयितुकामेन प्रत्येकबोधौ प्रतिष्ठापयितुकामेन यावदनुपधिशेषे निर्वाणधातौ प्रतिष्ठापयितुकामेन प्रज्ञापार
मितायां शिक्षितव्यं॥ यथा पूर्वस्यां दिशि। एवं दक्षिणस्यां दिशि पश्चिमायामुत्तरस्यां विदिक्षु अधस्तादूर्ध्वं गंगानदीवालुकोपमेषु लोकधातुषु ये सत्वा
स्तान्यावदनुपधिशेषे निर्वाणधातौ प्रतिष्ठापयितुकामेन बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां शिक्षितव्यं॥ शारिपुत्र पूर्वस्मिन् [illegible]
॥ ॥पुनरपरं शारिपुत्र बोधिसत्वेन महासत्वेन अतीतानागतप्रत्युत्पन्नानां बुद्धानां भगवतां बुद्धगुणान् प्राप्तुकामेन प्रज्ञापारमितायां शिक्षितव्यं॥ पुनरप
रं शारिपुत्र बोधिसत्वेन महासत्वेन सर्वकुशलमूलानां [illegible] पारगन्तुकामेन प्रज्ञापारमितायां शिक्षितव्यं॥ पुनरपरं शारिपुत्र बोधिसत्वेन महास

गुरु:
२१

[illegible]तां धर्म्मतां महतीं नागपक्षत्वज्ञानाकथनमवबोद्धुकामेन धर्म्मता। मनुष्यादिदिमनुष्याप्तुकामेन प्रज्ञापारमितायां शिक्षितव्यं॥ पुनरपरं शारि
पुत्र बोधिसत्वेन महासत्वेन सर्वश्रावकप्रत्येकबुद्धानां पूर्वङ्गमेन भवितुकामेन प्रज्ञापारमितायां शिक्षितव्यं॥ पुनरपरं शारिपुत्र बोधिसत्वेन महासत्वेन:
बुद्धानां भगवतामुपस्थायकेन भवितुकामेन प्रज्ञापारमितायां शिक्षितव्यं॥ पुनरपरं शारिपुत्र बोधिसत्वेन महासत्वेन बुद्धानां भगवतामाभ्यन्तरपरिवारेण भवितुका
मेन प्रज्ञापारमितायां शिक्षितव्यं॥ पुनरपरं शारिपुत्र बोधिसत्वेन महासत्वेन महापरिवारेण भवितुकामेन बोधिसत्वपरिवारं प्रतिलब्धुकामेन प्रज्ञापारमितायां शिक्षि
तव्यं॥ पुनरपरं शारिपुत्र बोधिसत्वेन महासत्वेन दक्षिणीयतां परिशोधयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं॥ पुनरपरं शारिपुत्र बोधिसत्वेन महासत्वेन
मात्सर्यचित्तं निग्रहीतुकामेन प्रज्ञापारमितायां शिक्षितव्यं॥ पुनरपरं शारिपुत्र बोधिसत्वेन महासत्वेन दौःशील्यचित्तं नोत्पादयितुकामेन प्रज्ञापारमिता
यां शिक्षितव्यं॥ पुनरपरं शारिपुत्र बोधिसत्वेन महासत्वेन व्यापादचित्तं नोत्पादयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं॥ पुनरपरं शारिपुत्र बोधिसत्वेन म
हासत्वेन कौसीद्यचित्तं नोत्पादयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं॥ पुनरपरं शारिपुत्र बोधिसत्वेन महासत्वेन विक्षेपचित्तं निग्रहीतुकामेन प्रज्ञा
पारमितायां शिक्षितव्यं॥ पुनरपरं शारिपुत्र बोधिसत्वेन महासत्वेन दौःप्रज्ञचित्तमप्रपातयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं॥ पुनर
परं शारिपुत्र बोधिसत्वेन महासत्वेन सर्वसत्वान्दानमयपुण्यक्रियावस्तुनि प्रतिष्ठापयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं॥ शीलमयपुण्यक्रि
यावस्तुनि प्रतिष्ठापयितुकामेन भावनामयपुण्यक्रियावस्तुनि प्रतिष्ठापयितुकामेन। वैयावृत्यसहगतेनौपधिके पुण्यक्रियावस्तुनि प्रतिष्ठापयि
तुकामेन प्रज्ञापारमितायां शिक्षितव्यं॥ पुनरपरं शारिपुत्र बोधिसत्वेन महासत्वेन पंचचक्षूंष्युत्पादयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं
॥ कतमानि पंच यदुत मांसचक्षु दिव्यचक्षु२ प्रज्ञाचक्षु३ धर्म्मचक्षु४ बुद्धचक्षूंष्युत्पादयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं॥ पुनरपरं शारिपु
त्र बोधिसत्वेन महासत्वेन पूर्वस्यां दिशि दिव्येन चक्षुषा गंगानदीवालुकोपमान् बुद्धान्भगवतो द्रष्टुकामेन प्रज्ञापारमितायां शिक्षितव्यं॥ एवं दक्षिणस्यां दिशि दि
व्येन चक्षुषा गंगानदीवालुकोपमान्बुद्धान्भगवतो द्रष्टुकामेन प्रज्ञापारमितायां शिक्षितव्यं॥ पश्चिमायां दिशि दिव्येन चक्षुषा गंगानदीवालुकोपमान्बुद्धान्भगवतो द्र
ष्टुकामेन प्रज्ञापारमितायां शिक्षितव्यं॥ उत्तरस्यां दिशि दिव्येन चक्षुषा गंगानदीवालुकोपमान्बुद्धान्भगवतो द्रष्टुकामेन प्रज्ञापारमितायां शिक्षितव्यं॥ उत्तरपूर्वस्यां
दिशि दिव्येन चक्षुषा गंगानदीवालुकोपमान्बुद्धान्भगवतो द्रष्टुकामेन प्रज्ञापारमितायां शिक्षितव्यं॥ दक्षिणपूर्वस्यां दिशि दिव्येन चक्षुषा गंगानदीवालुकोपमा



पंचविंशति

२२

पंचविंशति

[illegible] गंगानदीवालुकोपमेषु लोकधातुषु [illegible]
[illegible] प्रज्ञापारमितायां शिक्षितव्यं॥ [illegible] दिशि गंगानदीवालुकोपमेषु लोकधातुषु [illegible]
[illegible] बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां शिक्षितव्यं॥ पुनरपरं शारिपुत्र बोधिसत्वेन महासत्वेन पूर्व्वस्यां दिशि गंगानदीवालुकोपमेषु
लोकधातुषु सत्वान्नानाबुद्धक्षेत्रोपपन्नांस्तान् बुद्धं गच्छं धर्म्मं गच्छं संघं गच्छं संश्रावयितुकामेन तांश्च सत्वान् सम्यग्दृष्टौ प्रतिष्ठापयितुकामेन प्रज्ञापारमि
तायां शिक्षितव्यं॥ यः दक्षिणस्यां दिशि गंगानदीवालुकोपमेषु लोकधातुषु सत्वान्नानाबुद्धक्षेत्रोपपन्नांस्तान् बुद्धं गच्छं संघं गच्छं संश्रावयितुकामेन तांश्च
सत्वान् सम्यग्दृष्टौ प्रतिष्ठापयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं॥ य उत्तरस्यां दिशि गंगानदीवालुकोपमेषु लोकधातुषु सत्वान्नानाबुद्धक्षेत्रोपपन्नांस्तान्
बुद्धं गच्छं धर्म्मं गच्छं संघं गच्छं संश्रावयितुकामेन तांश्च सत्वान् सम्यग्दृष्टौ प्रतिष्ठापयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं॥ य उत्तरपूर्व्वस्यां दिशि गंगानदीवालुक
ोपमेषु लोकधातुषु सत्वान्नानाबुद्धक्षेत्रोपपन्नांस्तान् बुद्धं गच्छं धर्म्मं गच्छं संघं गच्छं संश्रावयितुकामेन तांश्च सत्वान् सम्यग्दृष्टौ प्रतिष्ठापयितुकामेन प्रज्ञापा
रमितायां शिक्षितव्यं॥ य पूर्व्वदक्षिणस्यां दिशि गंगानदीवालुकोपमेषु लोकधातुषु सत्वान्नानाबुद्धक्षेत्रोपपन्नांस्तान् बुद्धं गच्छं धर्म्मं गच्छं संघं गच्छं संश्रावयि
तुकामेन तांश्च सत्वान् सम्यग्दृष्टौ प्रतिष्ठापयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं॥ य दक्षिणपश्चिमायां दिशि गंगानदीवालुकोपमेषु लोकधातुषु सत्वा
न्नानाबुद्धक्षेत्रोपपन्नांस्तान् बुद्धं गच्छं धर्म्मं गच्छं संघं गच्छं संश्रावयितुकामेन तांश्च सत्वान् सम्यग्दृष्टौ प्रतिष्ठापयितुकामेन प्रज्ञापारमितायां शि
क्षितव्यं॥ पश्चिमोत्तरस्यां दिशि गंगानदीवालुकोपमेषु लोकधातुषु सत्वान्नानाबुद्धक्षेत्रोपपन्नांस्तान् बुद्धं गच्छं धर्म्मं गच्छं संघं गच्छं संश्रावयितुकामेन
तांश्च सत्वान् सम्यग्दृष्टौ प्रतिष्ठापयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं॥ य अधस्ताद्दिशि गंगानदीवालुकोपमेषु लोकधातुषु सत्वान्नानाबुद्धक्षेत्रो
पपन्नांस्तान् बुद्धं गच्छं धर्म्मं गच्छं संघं गच्छं संश्रावयितुकामेन तांश्च सत्वान् सम्यग्दृष्टौ प्रतिष्ठापयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं॥ य उ
परिष्टाद्दिशि गंगानदीवालुकोपमेषु लोकधातुषु सत्वान्नानाबुद्धक्षेत्रोपपन्नांस्तान् बुद्धं गच्छं धर्म्मं गच्छं संघं गच्छं संश्रावयितुकामेन तांश्च सत्वान् सम्
यग्दृष्टौ प्रतिष्ठापयितुकामेन बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां शिक्षितव्यं॥ एवं धर्म्मदानसहगतमानन्दगथापमः॥ पुनरपरं शारिपुत्र बोधि

२२

सत्वेन महासत्वेन पूर्व्वस्यां दिशि गंगानदीवालुकोपमेषु लोकधातुषु सर्व्वबुद्धक्षेत्रेषु ये सत्वा अन्धास्ते ममानुभावेन चक्षुषा रूपाणि द्रक्ष्यन्तीति प्रज्ञापारमिताया
ं शिक्षितव्यं॥ एवं बधिराः श्रोत्रेण शब्दान् श्रोष्यन्तीति। उन्मत्ताः स्मृतिं प्रतिलप्स्यन्त इति। नग्नाश्चेलानि प्रतिलप्स्यन्त इति॥ जिघत्सिताः सत्वाः पूर्णगात्रा भ
विष्यन्तीति। पिपासिता विगतपिपासा भविष्यन्तीति। अपायोपपन्नाश्च सत्वाः सर्व्वापायेभ्यो विमुक्ता मनुष्यात्मभावं प्रतिलप्स्यन्तीति। दुःशीलान् शीलस्कन्धे प्रति
ष्ठापयिष्यामीति। असमाहितान् समाधिस्कन्धे प्रतिष्ठापयिष्यामीति। दुष्प्रज्ञान् प्रज्ञास्कन्धे प्रतिष्ठापयिष्यामीति। अविमुक्तान् विमुक्तिस्कन्धे प्रतिष्ठापयिष्या
मीति। अविमुक्तिज्ञानदर्शनान् विमुक्तिज्ञानदर्शनस्कन्धे प्रतिष्ठापयिष्यामीति। अदृष्टसत्यान् स्रोतआपत्तिफले प्रतिष्ठापयिष्यामीति॥ सकृदागामिफले प्रतिष्ठा
पयिष्यामीति। अनागामिफले प्रतिष्ठापयिष्यामीति। अर्हत्वे प्रतिष्ठापयिष्यामीति। प्रत्येकबोधौ प्रतिष्ठापयितुकामेन। अनुत्तरायां सम्यक्संबोधौ प्रतिष्ठा
पयिष्यामीति। बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां शिक्षितव्यं॥ य दक्षिणस्यां दिशि गंगानदीवालुकोपमेषु लोकधातुषु सर्व्वबुद्धक्षेत्रेषु सत्वा अन्धा
स्ते ममानुभावेन चक्षुषा रूपाणि द्रक्ष्यन्तीति। प्रज्ञापारमितायां शिक्षितव्यं। एवं बधिराः श्रोत्रेण शब्दान् श्रोष्यन्तीति। उन्मत्ताः स्मृतिं प्रतिलप्स्यन्तीति। न
ग्नाश्चेलानि प्रतिलप्स्यन्तीति। जिघत्सिताः सत्वाः पूर्णगात्रा भविष्यन्तीति। पिपासिताः सत्वा विगतपिपासा भविष्यन्तीति। अपायोपपन्नाश्च सत्वाः
सर्व्वापायेभ्यो विमुक्ता मनुष्यात्मभावं प्रतिलप्स्यन्तीति। दुःशीलान् शीलस्कन्धे प्रतिष्ठापयिष्यामीति। असमाहितान् समाधिस्कन्धे प्रतिष्ठापयिष्यामीति॥
दुष्प्रज्ञान् प्रज्ञास्कन्धे प्रतिष्ठापयिष्यामीति। अविमुक्तान् विमुक्तिस्कन्धे प्रतिष्ठापयिष्यामीति। अविमुक्तिज्ञानदर्शनान् विमुक्तिज्ञानदर्शनस्कन्धे प्रतिष्ठापयिष्या
मीति। अदृष्टसत्यान् स्रोतआपत्तिफले प्रतिष्ठापयिष्यामीति॥ सकृदागामिफले प्रतिष्ठापयिष्यामि। अर्हत्वे प्रतिष्ठापयिष्यामीति। प्रत्येकबोधौ प्रतिष्ठापयि
ष्यामीति। अनुत्तरायां सम्यक्संबोधौ प्रतिष्ठापयिष्यामीति। बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां शिक्षितव्यं॥ य पश्चिमायां दिशि गंगानदीवालु
कोपमेषु लोकधातुषु सत्वा अन्धास्ते ममानुभावेन चक्षुषा रूपाणि द्रक्ष्यन्तीति। प्रज्ञापारमितायां शिक्षितव्यं॥ एवं बधिराः श्रोत्रेण शब्दान् श्रोष्यन्ती
ति। उन्मत्ताः स्मृतिं प्रतिलप्स्यन्त इति। नग्नाश्चेलानि प्रतिलप्स्यन्त इति। जिघत्सिताः सत्वाः पूर्णगात्रा भविष्यन्तीति। पिपासिताः सत्वा विगतपिपासा भवि
ष्यन्तीति॥ अपायोपपन्नाः सत्वाः सर्व्वापायेभ्यो विमुक्ता मनुष्यात्मभावं प्रतिलप्स्यन्त इति। दुःशीलान् शीलस्कन्धे प्रतिष्ठापयिष्यामीति। असमाहि

तान्समाधिस्कन्धे प्रतिष्ठापयिष्यामीति। दुःप्रज्ञान्प्रज्ञास्कन्धे प्रतिष्ठापयिष्यामीति। अविमुक्तान्विमुक्तिस्कन्धे प्रतिष्ठापयिष्यामीति। अविमुक्तिज्ञानदर्शनान्विमुक्तिज्ञानदर्शनस्कन्धे प्रतिष्ठापयिष्यामीति। अदृष्टसत्यान्स्रोतआपत्तिफले प्रतिष्ठापयिष्यामीति। सकृदागामिफले अनागामिफले अर्हत्वे प्रतिष्ठापयिष्यामीति। प्रत्येकबोधौ प्रतिष्ठापयिष्यामीति। अनुत्तरायां सम्यक्संबोधौ प्रतिष्ठापयिष्यामीति। बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां शिक्षितव्यं॥ यः पूर्वस्यां दिशि गंगानदीवालुकोपमेषु लोकधातुषु सर्वबुद्धक्षेत्रेषु सत्वानन्धकमानान् तावन चक्षुषानुपातितुमिच्छति प्रज्ञापारमितायां शिक्षितव्यं॥ एवं बधिराः श्रोत्रेण शब्दान् श्रोष्यन्तीति। उन्मत्ताः स्मृतिं प्रतिलप्स्यन्तेति। नग्नाश्चैलानि प्रतिलप्स्यन्तेति। जिघत्सिताः सत्वाः पूर्णगात्रा भविष्यन्तीति। पिपासिताः सत्वा विगतपिपासा भविष्यन्तीति। अपायोपपन्नाः सत्वाः सर्वापायेभ्यो विमोक्ष्य मनुष्यात्मभावं प्रतिलप्स्यन्तेति। दुःशीलान्शीलस्कन्धे प्रतिष्ठापयिष्यामीति। असमाहितान्समाधिस्कन्धे प्रतिष्ठापयिष्यामीति। दुःप्रज्ञान्प्रज्ञास्कन्धे प्रतिष्ठापयिष्यामीति। अविमुक्तान्विमुक्तिस्कन्धे प्रतिष्ठापयिष्यामीति। अविमुक्तिज्ञानदर्शनान्विमुक्तिज्ञानदर्शनस्कन्धे प्रतिष्ठापयिष्यामीति। अदृष्टसत्यान्स्रोतआपत्तिफले प्रतिष्ठापयिष्यामीति। सकृदागामिफले अनागामिफले अर्हत्वे प्रतिष्ठापयिष्यामीति। प्रत्येकबोधौ प्रतिष्ठापयिष्यामीति। अनुत्तरायां सम्यक्संबोधौ प्रतिष्ठापयिष्यामीति। बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां शिक्षितव्यं॥ यद्दक्षिणपश्चिमायां दिशि गंगानदीवालुकोपमेषु लोकधातुषु बुद्धक्षेत्रेषु सत्वानन्धकमानान् तावन चक्षुषानुपातितुमिच्छति प्रज्ञापारमितायां शिक्षितव्यं॥ एवं बधिराः श्रोत्रेण शब्दान् श्रोष्यन्तीति। उन्मत्ताः स्मृतिं प्रतिलप्स्यन्तेति। नग्नाश्चैलानि प्रतिलप्स्यन्तेति। जिघत्सिताः सत्वाः पूर्णगात्रा भविष्यन्तीति। पिपासिताः सत्वा विगतपिपासा भविष्यन्तीति। अपायोपपन्नाः सत्वाः सर्वापायेभ्यो विमोक्ष्य मनुष्यात्मभावं प्रतिलप्स्यन्तेति। दुःशीलान्शीलस्कन्धे प्रतिष्ठापयिष्यामीति। असमाहितान्समाधिस्कन्धे प्रतिष्ठापयिष्यामीति। दुःप्रज्ञान्प्रज्ञास्कन्धे प्रतिष्ठापयिष्यामीति। अविमुक्तान्विमुक्तिस्कन्धे प्रतिष्ठापयिष्यामीति। अविमुक्तिज्ञानदर्शनान्विमुक्तिज्ञानस्कन्धे प्रतिष्ठापयिष्यामीति। अदृष्टसत्यान्स्रोतआपत्तिफले प्रतिष्ठापयिष्यामीति। सकृदागामिफले प्रतिष्ठापयिष्यामीति। अनागामिफले अर्हत्वे प्रतिष्ठापयिष्यामीति। प्रत्येकबोधौ प्रतिष्ठापयिष्यामीति। अनुत्तरायां सम्यक्संबोधौ प्रतिष्ठापयिष्यामीति। बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां शिक्षितव्यं॥ यः पश्चिमोत्तरस्यां दिशि गंगानदीवालुकोपमेषु लोकधातुषु सर्वबुद्धक्षेत्रेषु सत्वानन्धकमानान् तावन चक्षुषानुपातितुमिच्छ-

ति प्रज्ञापारमितायां शिक्षितव्यं॥ एवं बधिराः श्रोत्रेण शब्दान् श्रोष्यन्तीति। उन्मत्ताः स्मृतिं प्रतिलप्स्यन्तेति। नग्नाश्चैलानि प्रतिलप्स्यन्तेति। जिघत्सिताः सत्वाः पूर्णगात्रा भविष्यन्तीति। पिपासिताः सत्वा विगतपिपासा भविष्यन्तीति। अपायोपपन्नाः सत्वाः सर्वापायेभ्यो विमोक्ष्य मनुष्यात्मभावं प्रतिलप्स्यन्तेति। दुःशीलान्शीलस्कन्धे प्रतिष्ठापयिष्यामीति। असमाहितान्समाधिस्कन्धे प्रतिष्ठापयिष्यामीति। दुःप्रज्ञान्प्रज्ञास्कन्धे प्रतिष्ठापयिष्यामीति। अविमुक्तान्विमुक्तिस्कन्धे प्रतिष्ठापयिष्यामीति। अविमुक्तिज्ञानदर्शनान्विमुक्तिज्ञानदर्शनस्कन्धे प्रतिष्ठापयिष्यामीति। अदृष्टसत्यान्स्रोतआपत्तिफले प्रतिष्ठापयिष्यामीति। सकृदागामिफले अनागामिफले अर्हत्वे प्रतिष्ठापयिष्यामीति। प्रत्येकबोधौ प्रतिष्ठापयिष्यामीति। अनुत्तरायां सम्यक्संबोधौ प्रतिष्ठापयिष्यामीति। बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां शिक्षितव्यं॥ योऽधो दिशि गंगानदीवालुकोपमेषु लोकधातुषु सर्वबुद्धक्षेत्रेषु सत्वानन्धकमानान् तावन चक्षुषानुपातितुमिच्छति प्रज्ञापारमितायां शिक्षितव्यं॥ एवं बधिराः श्रोत्रेण शब्दान् श्रोष्यन्तीति। उन्मत्ताः स्मृतिं प्रतिलप्स्यन्तेति। नग्नाश्चैलानि प्रतिलप्स्यन्तेति। जिघत्सिताः सत्वाः पूर्णगात्रा भविष्यन्तीति। पिपासिताः सत्वा विगतपिपासा भविष्यन्तीति। अपायोपपन्नाः सत्वाः सर्वापायेभ्यो विमोक्ष्य मनुष्यात्मभावं प्रतिलप्स्यन्तेति। दुःशीलान्शीलस्कन्धे प्रतिष्ठापयिष्यामीति। अदृष्टसत्यान्स्रोतआपत्तिफले। असमाहितान्समाधिस्कन्धे प्रतिष्ठापयिष्यामीति। दुःप्रज्ञान्प्रज्ञास्कन्धे प्रतिष्ठापयिष्यामीति। अविमुक्तान्विमुक्तिस्कन्धे प्रतिष्ठापयिष्यामीति। अविमुक्तिज्ञानदर्शनान्विमुक्तिज्ञानदर्शनस्कन्धे प्रतिष्ठापयिष्यामीति। अदृष्टसत्यान्स्रोतआपत्तिफले प्रतिष्ठापयिष्यामीति। सकृदागामिफले अनागामिफले अर्हत्वे प्रतिष्ठापयिष्यामीति। प्रत्येकबोधौ प्रतिष्ठापयिष्यामीति। अनुत्तरायां सम्यक्संबोधौ प्रतिष्ठापयिष्यामीति। बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां शिक्षितव्यं॥ य ऊर्ध्वं दिशि गंगानदीवालुकोपमेषु लोकधातुषु सर्वबुद्धक्षेत्रेषु सत्वानन्धकमानान् तावन चक्षुषानुपातितुमिच्छति प्रज्ञापारमितायां शिक्षितव्यं॥ एवं बधिराः श्रोत्रेण शब्दान् श्रोष्यन्तीति। उन्मत्ताः स्मृतिं प्रतिलप्स्यन्तेति। नग्नाश्चैलानि प्रतिलप्स्यन्तेति। जिघत्सिताः सत्वाः पूर्णगात्रा भविष्यन्तीति। पिपासिताः सत्वा विगतपिपासा भविष्यन्तीति। अपायोपपन्नाः सत्वाः सर्वापायेभ्यो विमोक्ष्य मनुष्यात्मभावं प्रतिलप्स्यन्तेति। दुःशीलान्शीलस्कन्धे प्रतिष्ठापयिष्यामीति। असमाहितान्समाधिस्कन्धे प्रतिष्ठापयिष्यामीति। दुःप्रज्ञान्प्रज्ञास्कन्धे प्रतिष्ठापयिष्यामीति। अविमुक्तान्विमुक्तिज्ञानदर्शनान्विमुक्तिज्ञानदर्शनस्कन्धे प्रतिष्ठापयिष्यामीति। अदृष्टसत्यान्स्रोतआपत्तिफले प्रतिष्ठापयिष्यामीति। सकृदागामिफले अनागामिफले अर्हत्वे प्रतिष्ठापयिष्यामीति। प्रत्येकबोधौ प्रतिष्ठापयिष्यामीति। अनुत्तरायां सम्यक्संबोधौ प्रतिष्ठापयिष्यामीति। बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां शिक्षितव्यं॥ [illegible]कायनमा



पंचविंशति

पंचविंशती

न्ना॥ नुत्तरां सम्यक्संबोधिमभिसंबुध्यन्ते। कश्चिद्बोधिसत्त्वो महासत्त्व उपायकौशल्येन पंच कामगुणान् परिभुज्य निष्क्रम्यानुत्तरां सम्यक्संबोधिमभिसंबुध्य-
न्ते। तद्यथापि नाम शारिपुत्र कुशलो मायाकारो वा मायाकारान्तेवासी वा मायया पंच कामगुणान् निर्मिमीते पंचभिश्च कामगुणैः समर्पितः क्रीडेत्
न च पुनः [illegible] मायोपमाः॥ [illegible]॥ [illegible]॥ एवमुक्त आयु-
ष्मान् शारिपुत्रो भगवन्तमेतदवोचत्। कथं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरितव्यं। एवमुक्ते भगवानायुष्मन्तं शारिपुत्रमेतदवोचत्। इह शारिपुत्र बो-
धिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता बोधिसत्त्व एव सन् बोधिसत्त्वं न समनुपश्यति। बोधिसत्त्वनामापि न समनुपश्यति। बोधिसत्त्वचर्यामपि न समनुपश्य-
ति। प्रज्ञापारमितामपि न समनुपश्यति। रूपमपि न समनुपश्यति। एवं वेदनां संज्ञां संस्कारान् विज्ञानमपि न समनुपश्यति। तत्कस्य हेतोः। तथा हि बोधिसत्त्वो
महासत्त्वो बोधिसत्त्वस्वभावेन शून्यः प्रज्ञापारमिता प्रज्ञापारमितास्वभावेन शून्या। तत्कस्य हेतोः। प्रकृतिरस्यैषा। न हि शून्यतया रूपं शून्यं न वेदना न संज्ञा
न संस्कारा न विज्ञानं शून्यतया शून्यं नान्यत्र रूपाच्छून्यता नान्यत्र वेदनायाः शून्यता नान्यत्र संज्ञायाः शून्यता नान्यत्र संस्कारेभ्यः शून्यता नान्यत्र विज्ञानाच्छून्यता। तत्कस्य हेतोः।
रूपमेव शून्यता शून्यतैव रूपं वेदनैव शून्यता शून्यतैव वेदना संज्ञैव शून्यता शून्यतैव संज्ञा संस्कारा एव शून्यता शून्यतैव संस्काराः विज्ञानमेव शून्यता शून्यतैव
विज्ञानं। तत्कस्य हेतोः। तथा हि नाममात्रमिदं यदिदं बोधिसत्त्व इति। नाममात्रमिदं यदिदं प्रज्ञापारमितेति। नाममात्रमिदं रूपं वेदना संज्ञा संस्कारा विज्ञानं।
तथा हि मायोपमं रूपं वेदना संज्ञा संस्कारा विज्ञानं मायायाश्च [illegible] न सदसत् [illegible] दर्शनसममायादर्शनं स्वभावस्य हि नास्ति
नास्ति बोधिः॥ न संक्लेशो न व्यवदानं। एवं प्रज्ञापारमितायां चरन् बोधिसत्त्वो महासत्त्व उत्पादमपि न समनुपश्यति निरोधमपि न समनुपश्यति। संक्लेशमपि न
समनुपश्यति। व्यवदानमपि न समनुपश्यति। तत्कस्य हेतोः। तथा हि [illegible] नामप्रतिधर्मा [illegible] आगन्तुकेन नाम्ना व्यवहारकानि बोधिसत्त्वः प्रज्ञापा-
रमितायां चरन् सर्वनामानि न समनुपश्यति। तस्मान्नाभिनिविशते। पुनरपरं शारिपुत्र बोधिसत्त्वः प्रज्ञापारमितायां चरन्नेवमुपपरीक्षते नाममात्रमिदं
यदिदं बोधिसत्त्व इति। नाममात्रमिदं यदुत बोधिरिति। नाममात्रमिदं यदुत बुद्ध इति। नाममात्रमिदं प्रज्ञापारमितेति। नाममात्रमिदं यदुत प्रज्ञापारमिता-
येति। नाममात्रमिदं यदुत रूपमिति। नाममात्रमिदं यदुत वेदनेति। नाममात्रमिदं यदुत संज्ञेति। नाममात्रमिदं यदुत संस्कारा इति। नाममात्रमिदं यदु-
त विज्ञानमिति। तद्यथापि नाम शारिपुत्र आत्मेत्युच्यते न चात्मोपलभ्यते। न सत्त्वो न जीवो न पोषो न पुरुषो न पुद्गलो न मनुजो न मानवो नोपलभ्यते। अनुपलम्भ-

२९

यकामं पदायां तत्कस्य हेतोः। तथा हि बोधिसत्त्वः काममपि न समनुपश्यति यन्नाहि निषिद्धानि। एवं चरन् बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरति स च शारि-
पुत्र जम्बूद्वीपः परिपूर्णो भवेच्छारिपुत्रमौद्गल्यायनसदृशैर्भिक्षुभिः॥ तद्यथापि नाम नडवनं वा इक्षुवनं वा वेणुवनं वा शरवनं वा शालिवनं वा ति-
लवनं वा या प्रज्ञा प्रज्ञापारमितायां चरतो बोधिसत्त्वस्य प्रज्ञायाः शततमीमपि कलां नोपैति सहस्रतमीमपि शतसहस्रतमीमपि संख्यामपि कलामपि गणनामप्यु-
पमामप्युपनिषदमप्युपनिषदमपि नोपैति। एवं शारिपुत्र प्रज्ञापारमितायां चरन् बोधिसत्त्वो दिवसेनापि या प्रज्ञा सा सर्वश्रावकप्रत्येकबुद्धानां
प्रज्ञामभिभवति। तत्कस्य हेतोः। तथा हि शारिपुत्र या बोधिसत्त्वस्य प्रज्ञा सा सर्वसत्त्वानां निर्वाणाय प्रयुक्ता। तिष्ठतु शारिपुत्र जम्बूद्वीपः परिपूर्णः
शारिपुत्रमौद्गल्यायनसदृशैर्भिक्षुभिः। स च शारिपुत्र यावन्तो बोधिसत्त्वस्यैकदिवसभाविताया प्रज्ञायाः शततमीमपि कलां नोपैति सहस्रतमी-
मपि गणनामपि संख्यामपि कलामपि गणनामप्युपमामप्युपनिषदमप्युपनिषदमपि नोपैति। तिष्ठतु शारिपुत्र त्रिसाहस्रमहासा-
हस्रलोकधातुः परिपूर्णः शारिपुत्रमौद्गल्यायनसदृशैर्भिक्षुभिः। स च शारिपुत्र पूर्वस्यां दिशि गंगानदीवालुकोपमा लोकधातवः परिपूर्णा भवेयुः
शारिपुत्रमौद्गल्यायनसदृशैर्भिक्षुभिः॥ तद्यथापि नाम नडवनं वा इक्षुवनं वा वेणुवनं वा शरवनं वा शालिवनं वा तिलवनं वा या तेषां प्रज्ञा प्रज्ञापारमि-
तायां चरतो बोधिसत्त्वस्यैकदिवसभाविताया प्रज्ञायाः शततमीमपि कलां नोपैति सहस्रतमीमपि शतसहस्रतमीमपि संख्यामपि कलामपि गणनाम-
प्युपमामप्युपनिषदमप्युपनिषदमपि नोपैति। स च शारिपुत्र दक्षिणस्यां दिशि गंगानदीवालुकोपमा लोकधातवः परिपूर्णा भवेयुः शारिपुत्रमौद्ग-
ल्यायनसदृशैर्भिक्षुभिः। तद्यथापि नाम नडवनं वा इक्षुवनं वा वेणुवनं वा शरवनं वा शालिवनं वा तिलवनं वा या तेषां प्रज्ञा प्रज्ञापारमितायां च-
रतो बोधिसत्त्वस्यैकदिवसभाविताया प्रज्ञायाः शततमीमपि कलां नोपैति सहस्रतमीमपि संख्यामपि कलामपि गणनामप्युपमामप्युपनिषदमप्यु-
पनिषदमपि नोपैति। स च शारिपुत्र पश्चिमायां दिशि गंगानदीवालुकोपमा लोकधातवः परिपूर्णा भवेयुः शारिपुत्रमौद्गल्यायनसदृशैर्भिक्षुभिः तद्य-
थापि नाम नडवनं वा इक्षुवनं वा वेणुवनं वा शरवनं वा शालिवनं वा तिलवनं वा या तेषां प्रज्ञा सा प्रज्ञापारमितायां चरतो बोधिसत्त्वस्यैकप्रज्ञायाः
शततमीमपि कलां नोपैति सहस्रतमीमपि शतसहस्रतमीमपि संख्यामपि कलामपि गणनामप्युपमामप्युपनिषदमप्युपनिषदमपि नोपैति। स च शारि-
पुत्र उत्तरस्यां दिशि गंगानदीवालुकोपमा लोकधातवः परिपूर्णा भवेयुः शारिपुत्रमौद्गल्यायनसदृशैर्भिक्षुभिः। तद्यथापि नाम नडवनं वा इक्षुवनं वा

पंचविंशति

इक्षुवनं वा शरवनं वा शालिवनं वा तिलवनं वा न यो या प्रज्ञा प्रज्ञापारमितायां चरतो बोधिसत्वस्यैकदिवसम्भाविताया प्रज्ञायाः शततमीमपि कलां नोपैति सहस्रत-
मीमपि शतसहस्रतमीमपि संख्यामपि कलामपि गणनामप्युपनिषदमप्युपमामपि नोपैति। सचेच्छारिपुत्र दक्षिणस्यां दिशि गंगानदीवालुकोपमा लोकधातवः
परिपूर्णा भवेयुः शारिपुत्रमौद्गल्यायनसदृशैर्भिक्षुभिः। तद्यथापि नाम नडवनं वा वेणुवनं वा इक्षुवनं वा शरवनं वा शालिवनं वा तिलवनं वा न यो या प्रज्ञा प्र-
ज्ञापारमितायां चरतो बोधिसत्वस्य प्रज्ञायाः शततमीमपि कलां नोपैति सहस्रतमीमपि शतसहस्रतमीमपि संख्यामपि कलामपि गणनामप्युप-
मामप्युपनिषदमपि नोपैति। सचेच्छारिपुत्र पश्चिमायां दिशि गंगानदीवालुकोपमा लोकधातवः परिपूर्णा भवेयुः शारिपुत्रमौद्गल्याय-
नसदृशैर्भिक्षुभिः। तद्यथापि नाम नडवनं वा वेणुवनं वा इक्षुवनं वा शरवनं वा शालिवनं वा तिलवनं वा न यो या प्रज्ञा प्रज्ञापारमितायां च-
रतो बोधिसत्वस्य प्रज्ञायाः शततमीमपि कलां नोपैति सहस्रतमीमपि शतसहस्रतमीमपि संख्यामपि कलामपि गणनामप्युपमामप्युप-
निषदमपि नोपैति। सचेच्छारिपुत्र दक्षिणपश्चिमायां दिशि गंगानदीवालुकोपमा लोकधातवः परिपूर्णा भवेयुः शारिपुत्रमौद्गल्यायनसदृशैर्भिक्षुभिः। तद्यथापि
नाम नडवनं वा वेणुवनं वा इक्षुवनं वा शरवनं वा शालिवनं वा तिलवनं वा न यो या प्रज्ञा प्रज्ञापारमितायां चरतो बोधिसत्वस्यैकदिवसं भाविता प्रज्ञा शततमीम-
पि सहस्रतमीमपि संख्यामपि कलामपि गणनामप्युपमामप्युपनिषदमपि नोपैति। सचेच्छारिपुत्र उत्तरस्यां दिशि गंगानदीवालुकोपमा लोकधातवः प-
रिपूर्णा भवेयुः शारिपुत्रमौद्गल्यायनसदृशैर्भिक्षुभिः। तद्यथापि नाम नडवनं वा वेणुवनं वा इक्षुवनं वा शरवनं वा शालिवनं वा तिलवनं वा न यो या प्रज्ञा प्रज्ञापारमि-
तायां चरतो बोधिसत्वस्यैकदिवसमपि भाविताया प्रज्ञायाः शततमीमपि कलां नोपैति सहस्रतमीमपि शतसहस्रतमीमपि संख्यामपि कलामपि गणनामप्युपमामप्युप-
निषदमपि नोपैति। सचेच्छारिपुत्र दशसु दिक्षु गंगानदीवालुकोपमा लोकधातवः परिपूर्णा भवेयुः शारिपुत्रमौद्गल्यायनसदृशैर्भिक्षुभिः। तद्यथापि नाम नडवनं वा वे-
णुवनं वा इक्षुवनं वा शरवनं वा शालिवनं वा तिलवनं वा न यो या प्रज्ञा प्रज्ञापारमितायां चरतो बोधिसत्वस्यैकदिवसमपि भाविता प्रज्ञायाः शततमीमपि कलां नोपैति सह-
स्रतमीमपि शतसहस्रतमीमपि संख्यामपि कलामपि गणनामप्युपमामप्युपनिषदमपि नोपैति॥ [illegible] शारिपुत्र आह। भगवन्तमेतदवोचत्
[illegible] प्रज्ञापारमितासहगतानि [illegible] बोधिसत्वस्य प्रज्ञा [illegible]
प्रज्ञा। [illegible] विविक्ता [illegible] भगवन् [illegible]

२१

नु कथं पुनर्भगवन् बोधिसत्वस्यैकदिवसभाविता प्रज्ञा प्रज्ञापारमितायां चरत एकदिवसभाविता प्रज्ञा प्रज्ञानां प्रज्ञामभिभवति। एवमुक्ते भगवानायुष्म-
न्तं शारिपुत्रमेतदवोचत्॥ ॥ तत्किं मन्यसे शारिपुत्र यत्कार्यं बोधिसत्वस्य महासत्वस्य प्रज्ञापारमितायां चरतः॥ प्रज्ञा सर्वश्रावकप्रत्येक॥ एक-
दिवसभाविता प्रज्ञा प्रज्ञाप्रत्येक [illegible] चरतः सर्वसत्वानामर्थं कुर्वतः सर्वाकारं सर्व[illegible] बुद्धाः सर्वसत्वाः परिनिर्वापयि-
तव्या इति। अपि नु शारिपुत्र तेन सर्वश्रावकप्रत्येकबुद्धानां प्रज्ञाप्रत्यवेक्षिता। शारिपुत्र आह। नो हीदं भगवन्। भगवानाह। तत्किं मन्यसे शारिपुत्र अ-
पि नु सर्वश्रावकप्रत्येकबुद्धानामेवं भवति। अस्माभिरनुत्तरां सम्यक्संबोधिमभिसंबुध्य सर्वसत्वा निरुपधिशेषे निर्वाणधातौ परिनिर्वापयितव्या इ-
ति। शारिपुत्र आह। नो हीदं भगवन्। भगवानाह। तदनेनापि ते शारिपुत्र पर्यायेणैवं वेदितव्यं॥ यत्सर्वश्रावकप्रत्येकबुद्धानां प्रज्ञा बोधिसत्व-
स्य प्रज्ञाया एकदिवसभाविताया शततमीमपि कलां नोपैति। वयं च प्रज्ञापारमितायां चरन्तः सर्वसत्वान्परिपाच्य बुद्धक्षेत्रं परिशोध्य दश तथागतबलानि
परिपूर्य चत्वारि वैशारद्यानि चतस्रः प्रतिसंविदः अष्टादशावेणिकान्बुद्धधर्मान्परिपूर्य अनुत्तरां सम्यक्संबोधिमभिसंबुध्य अप्रमेयानसंख्येयानपरिमाणा-
न्सत्वान्परिनिर्वापयिष्याम इति॥ शारिपुत्र आह। नो हीदं भगवन्। भगवानाह। बोधिसत्वस्य महासत्वस्य पुनः शारिपुत्र एवं भवत्यहं प्रज्ञापारमिता-
यां चरित्वा सत्वान्परिपाच्य बुद्धक्षेत्रं परिशोध्य दशतथागतबलानि परिपूर्य चत्वारि वैशारद्यानि चतस्रः प्रतिसंविदः अष्टादशावेणिकान्बुद्धधर्मान्परिपू-
र्यानुत्तरां सम्यक्संबोधिमभिसंबुध्याप्रमेयानसंख्येयानपरिमाणान्सत्वान्परिनिर्वापयिष्यामीति। तद्यथापि नाम शारिपुत्र न एवं भवति खद्यो-
तकजातस्य ममाभया जंबुद्वीपावभास्यामि। ममाभया जंबुद्वीपः स्फुटो भवेदिति। एवमेव शारिपुत्र सर्वश्रावकप्रत्येकबुद्धानां नैव-
म्भवति। एकस्याप्यहं प्रज्ञापारमितां चरित्वा सत्वान्यनि निर्वापयिष्यामीति। तद्यथापि नाम शारिपुत्र सूर्यमण्डलमुदयत्सर्वं जंबुद्वीपमवभा-
सं स्फुटीकरोति। एवमेव शारिपुत्र बोधिसत्वो महासत्वो। प्रज्ञापारमितां चरित्वा सत्वान्परिपाच्य बुद्धक्षेत्रं परिशोध्य दशतथागतबलानि परि-
पूर्य चत्वारि वैशारद्यानि चतस्रः प्रतिसंविदः अष्टादशावेणिकान्बुद्धधर्मान्परिपूर्यानुत्तरां सम्यक्संबोधिमभिसंबुध्याप्रमेयानसंख्येया-
नपरिमाणान्सत्वान्परिनिर्वापयति। एवमुक्ते आयुष्माञ्छारिपुत्रो भगवन्तमेतदवोचत्। कथं भगवन् बोधिसत्वो महासत्वः सर्वश्रावकप्रत्येक-
बुद्धभूमिमतिक्रम्याविनिवर्तनीयां भूमिमनुप्राप्नोति बोधिमार्गं परिशोधयति। एवमुक्ते भगवानायुष्मन्तं शारिपुत्रमेतदवोचत्। इह

पंचविंशति

शारिपुत्र बोधिसत्वो महासत्वः प्रथमचित्तोत्पादमुपादाय प्रज्ञापारमितासूत्रान्तान् शून्यतानिमित्ताप्रणिहितप्रतिसंयुक्तान् धर्म्मान्प्रत्येति श्रावकप्रत्येकबुद्धभू
मिं न स्पृशति। अविनिवर्तनीयां भूमिमनुप्राप्नोति बोधिमार्गं च परिशोधयति। एवमुक्ते आयुष्मान्शारिपुत्रो भगवन्तमेतदवोचत्। कतमस्यां भगवन् भू
मौ स्थितो बोधिसत्वो महासत्वः सततसमितं सर्वश्रावकबुद्धानां दक्षिणीयो भवति। एवमुक्ते भगवानायुष्मन्तं शारिपुत्रमेतदवोचत्। प्रथमचित्तोत्पादमुपादा
य शारिपुत्र बोधिसत्वो महासत्वः षट्पारमितासु चरन्बोधिमण्डपर्यन्तं सततसमितं सर्वश्रावकप्रत्येकबुद्धानां दक्षिणीयो भवति। तत्कस्य हेतोः
यं हि शारिपुत्र बोधिसत्वं महासत्वमागम्य सर्वे कुशला धर्म्मा लोके प्रादुर्भवन्ति। यदुत दशानां कुशलानां कर्म्मपथानां प्रज्ञायना [illegible] समन्वाग
तस्य चतुर्णां ध्यानानां चतुर्णामप्रमाणानां चतसृणामारूप्यसमापत्तीनां पंचानामभिज्ञानां चतुर्णां स्मृत्युपस्थानानां चतुर्णां सम्यक्प्रहाणानां चतुर्णामृद्धिपादानां पंचानामिन्द्रियाणां
पंचानां बलानां [illegible] बुद्धधर्म्माणां लोके प्रादुर्भावो भवति। तेषां च कुशलानां धर्म्माणां प्रादुर्भावात्क्षत्रियमहाशालकुलानि प्रज्ञायन्ते। ब्राह्मणम
हाशालकुलानि प्रज्ञायन्ते। गृहपतिमहाशालकुलानि प्रज्ञायन्ते। चातुर्महाराजकायिका देवाः प्रज्ञायन्ते। त्रयस्त्रिंशा देवाः प्रज्ञायन्ते। यामा देवाः प्रज्ञा
यन्ते। तुषिता देवाः प्रज्ञायन्ते। निर्म्माणरतयो देवाः प्रज्ञायन्ते। परनिर्म्मितवशवर्त्तिनो देवाः प्रज्ञायन्ते। ब्रह्मकायिका देवाः प्रज्ञायन्ते। ब्रह्मपुरोहिता देवाः प्रज्ञा
यन्ते। महाब्रह्माणो देवाः प्रज्ञायन्ते। परीत्ताभा देवाः प्रज्ञायन्ते। अप्रमाणाभा देवाः प्रज्ञायन्ते। आभास्वरा देवाः प्रज्ञायन्ते। परीत्तशुभा देवाः प्रज्ञायन्ते। अप्रमाणशुभा
देवाः प्रज्ञायन्ते। शुभकृत्स्ना देवाः प्रज्ञायन्ते। अनभ्रका देवाः प्रज्ञायन्ते। पुण्यप्रसवा देवाः प्रज्ञायन्ते। बृहत्फला देवाः प्रज्ञायन्ते। अबृहा देवाः प्रज्ञायन्ते।
अतपा देवाः प्रज्ञायन्ते। सुदृशा देवाः प्रज्ञायन्ते। सुदर्शना देवाः प्रज्ञायन्ते। अकनिष्ठा देवाः प्रज्ञायन्ते। आकाशानन्त्यायतनोपगा देवाः प्रज्ञायन्ते। विज्ञानानन्त्यायतनोपगा
देवाः प्रज्ञायन्ते। आकिंचन्यायतनोपगा देवाः प्रज्ञायन्ते। नैवसंज्ञानासंज्ञायतनोपगा देवाः प्रज्ञायन्ते। स्रोतआपन्ना लोके संदृश्यन्ते। सकृ
दागामिनो लोके संदृश्यन्ते। अनागामिनो लोके संदृश्यन्ते। अर्हन्तो लोके संदृश्यन्ते। प्रत्येकबुद्धा लोके संदृश्यन्ते। बोधिसत्वा लोके संदृश्यन्ते। तथागता अर्हन्तः सम्यक्संबुद्धा
लोके संदृश्यन्ते। एवमुक्ते आयुष्मान्शारिपुत्रो भगवन्तमेतदवोचत्। किं [illegible] बोधिसत्वो महासत्वो दक्षिणां विशोधयति। भगवानाह। अत्यन्तविशुद्धत्वाद्धि शारिपुत्र
बोधिसत्वो महासत्वो दक्षिणां विशोधयति। [illegible] दायकः। शारिपुत्र बोधिसत्वो महासत्वः कस्य दा
यकः। [illegible] कुशलानां धर्म्माणां दायकः। [illegible] कर्म्मपथानां [illegible] समन्वाग
तस्य चतुर्णां ध्यानानां चतुर्णामप्रमाणानां चतसृणामारूप्यसमापत्तीनां पंचानामभिज्ञानां चतुर्णां स्मृत्युपस्थानानां चतुर्णां सम्यक्प्रहाणानां चतु

१८

र्णामृद्धिपादानां पंचानामिन्द्रियाणां पंचानां बलानां सप्तानां बोध्यङ्गानामार्याष्टाङ्गस्य मार्गस्य चतुर्णां वैशारद्यानां चतसृणां प्रतिसंविदां अष्टा
दशानामावेणिकानां बुद्धधर्म्माणां दायकः॥ ॥ इति प्रतिप्रश्नवर्त्तः ४॥ ॥ एवमुक्ते आयुष्मान्शारिपुत्रो
भगवन्तमेतदवोचत्। कथं भगवन्बोधिसत्वो महासत्वः प्रज्ञापारमितायां युक्तो युक्त इति वक्तव्यः। एवमुक्ते भगवानायुष्मन्तं शारिपुत्रमेतदवोचत्। इह शारिपु
त्र बोधिसत्वो महासत्वो रूपशून्यतायां युक्तो युक्त इति वक्तव्यः। वेदनाशून्यतायां युक्तो युक्त इति वक्तव्यः। संज्ञाशून्यतायां युक्तो युक्त इति वक्तव्यः। संस्कारशून्य
तायां युक्तो युक्त इति वक्तव्यः। विज्ञानशून्यतायां युक्तो युक्त इति वक्तव्यः। पुनरपरं शारिपुत्र बोधिसत्वो महासत्वश्चक्षुःशून्यतायां युक्तो युक्त इति
वक्तव्यः। श्रोत्रशून्यतायां युक्तो युक्त इति वक्तव्यः। घ्राणशून्यतायां युक्तो युक्त इति वक्तव्यः। जिह्वाशून्यतायां युक्तो युक्त इति वक्तव्यः। कायशून्यतायां युक्तो युक्त
इति वक्तव्यः। मनःशून्यतायां युक्तो युक्त इति वक्तव्यः। रूपशून्यतायां युक्तो युक्त इति वक्तव्यः। शब्दशून्यतायां युक्तो युक्त इति वक्तव्यः। गन्धशून्यतायां युक्तो युक्त इति व
क्तव्यः। रसशून्यतायां युक्तो युक्त इति वक्तव्यः। स्प्रष्टव्यशून्यतायां युक्तो युक्त इति वक्तव्यः। धर्म्मशून्यतायां युक्तो युक्त इति वक्तव्यः। चक्षुर्विज्ञानशून्यतायां यु
क्तो युक्त इति वक्तव्यः। श्रोत्रविज्ञानधातुशून्यतायां युक्तो युक्त इति वक्तव्यः। घ्राणविज्ञानधातुशून्यतायां युक्तो युक्त इति वक्तव्यः। जिह्वाधातुविज्ञानशू
न्यतायां युक्तो युक्त इति वक्तव्यः। कायविज्ञानधातुशून्यतायां युक्तो युक्त इति वक्तव्यः। मनोविज्ञानधातुशून्यतायां युक्तो युक्त इति वक्तव्यः॥ दुःखशून्यतायां यु
क्तो युक्त इति वक्तव्यः। समुदयशून्यतायां युक्तो युक्त इति वक्तव्यः। निरोधशून्यतायां युक्तो युक्त इति वक्तव्यः। मार्गशून्यतायां युक्तो युक्त इति वक्तव्यः। अवि
द्याशून्यतायां युक्तो युक्त इति वक्तव्यः॥ संस्कारशून्यतायां युक्तो युक्त इति वक्तव्यः। विज्ञानशून्यतायां युक्तो युक्त इति वक्तव्यः। नामरूपशून्यतायां युक्तो युक्त इ
ति वक्तव्यः। षडायतनशून्यतायां युक्तो युक्त इति वक्तव्यः। स्पर्शशून्यतायां युक्तो युक्त इति वक्तव्यः॥ वेदनाशून्यतायां युक्तो युक्त इति वक्तव्यः॥ तृष्णाशून्यता
यां युक्तो युक्त इति वक्तव्यः॥ उपादानशून्यतायां युक्तो युक्त इति वक्तव्यः। भवशून्यतायां युक्तो युक्त इति वक्तव्यः। जातिशून्यतायां युक्तो युक्त इति
वक्तव्यः॥ जरामरणशोकपरिदेवदुःखदौर्मनस्योपायासशून्यतायां युक्तो युक्त इति वक्तव्यः॥ पुनरपरं शारिपुत्र बोधिसत्वो महासत्वः प्रज्ञापारमि
तायामध्यात्मशून्यतायां युक्तो युक्त इति वक्तव्यः॥ बहिर्द्धाशून्यतायां युक्तो युक्त इति वक्तव्यः॥ अध्यात्मबहिर्द्धाशून्यतायां युक्तो युक्त इति वक्तव्यः॥ याव
दभावस्वभावशून्यतायां युक्तो युक्त इति वक्तव्यः॥ एवं हि शारिपुत्र बोधिसत्वो महासत्वः प्रज्ञापारमितायां युक्तो युक्त इति वक्तव्यः। सप्तादिः शून्यताभिर्यु

प्रज्ञा॰पा॰
२९

प्रज्ञापारमितायां चरन् प्रभावद्बोधिसत्त्वो महासत्त्वो युक्त इति वक्तव्यः। तत्कस्य हेतोः। तथा हि न स रूपं न वेदनां न संज्ञां न संस्कारान् न विज्ञानं युक्तमिति वा अयुक्तमिति वा समनु-
पश्यति॥ ०॥ एवं खलु बोधिसत्त्वो युक्त इति वक्तव्यः॥ स न रूपमुत्पादधर्मि वा निरोधधर्मि वा समनुपश्यति। न वेदनामुत्पादधर्मिणीं वा निरोधधर्मिणीं वा समनुपश्यति। न सं-
ज्ञामुत्पादधर्मिणीं वा निरोधधर्मिणीं वा समनुपश्यति। न संस्कारानुत्पादधर्मिणो वा निरोधधर्मिणो वा समनुपश्यति। न विज्ञानमुत्पादधर्मि वा निरोधधर्मि वा
समनुपश्यति। न रूपं संक्लेशधर्मि वा व्यवदानधर्मि वा समनुपश्यति। न वेदनां न संक्लेशधर्मिणीं वा व्यवदानधर्मिणीं वा समनुपश्यति। न संक्लेशसंक्लेशधर्मिणीं
वा व्यवदानधर्मिणीं वा समनुपश्यति। न संस्कारान् संक्लेशधर्मिणो वा व्यवदानधर्मिणो वा समनुपश्यति। न विज्ञानं संक्लेशधर्मि वा व्यवदानधर्मि वा समनुप-
श्यति। पुनरपरं शारिपुत्र बोधिसत्त्वो महासत्त्वो न रूपं वेदनायां समवसरतीति समनुपश्यति। न वेदनां संज्ञायां समवसरतीति समनुपश्यति। न संज्ञां संस्का-
रेषु समवसरतीति समनुपश्यति। न संस्कारान् विज्ञाने इति समनुपश्यति। न विज्ञानं धर्मे समवसरतीति समनुपश्यति। न धर्मः कश्चिद्धर्मे समवसरतीति समनु-
पश्यति। तत्कस्य हेतोः। नहि कश्चिद्धर्मः कश्चिद्धर्मे समवसरतीति समनुपश्यति। प्रकृतिशून्यतामुपादाय। तत्कस्य हेतोः। तथा हि शारिपुत्र या रूपस्य शून्यता न तद्
क्संबुद्धानांश्रावकसंघानांबोधिसत्वसंघानामायव्ययमनुपलभमानःसमनुपश्यन्कतमंबोधिसत्वंकतमस्यांप्रज्ञापारमितायामववदिष्याम्यनु
शासिष्यामि।अपितुखलुपुनर्भगवन्स्कन्धविनामधेयंनस्थितंनास्थितंनविष्ठितंनाविष्ठितं।सर्वधर्माणांतथतायाअहंभगवन्नायव्ययंनोपलभेनसमनु
पश्यामिसोहंभगवन्सर्वधर्मतथतायाआयव्ययमनुपलभमानःसमनुपश्यन्कतमंबोधिसत्वंकतमस्यांप्रज्ञापारमितायामववदिष्याम्यनु
शासिष्यामि।अपितुखलुपुनर्भगवंस्कन्धविनामधेयंनस्थितंनास्थितंनविष्ठितंनाविष्ठितं।तत्कस्यहेतोरविद्यमानत्वात्तस्यनामधेयस्य।एवंतथा
नामधेयंनस्थितंनास्थितंनविष्ठितंनाविष्ठितंसर्वधर्मतथतायास्तुअहंभगवन्नायव्ययंनोपलभेनसमनुपश्यामिसोहंभगवन्सर्वध
र्मतथतायाआयव्ययमनुपलभमानःसमनुपश्यन्कतमंबोधिसत्वंकतमस्यांप्रज्ञापारमितायामववदिष्याम्यनुशासिष्यामि।अपितु
खलुपुनर्भगवन्स्कन्धविनामधेयंनस्थितंनास्थितंनविष्ठितंनाविष्ठितं।तत्कस्यहेतोरविद्यमानत्वात्तस्यनामधेयस्य।एवंबुद्धनामधेयंनस्थितंनास्थि
तंनविष्ठितंनाविष्ठितं॥इतिस[illegible]गतस्थानसमकान्तविशेषणा॥ ॥यत्पुनर्भगवन्नेवमाहसंज्ञाकृतिरेषाधर्मप्रज्ञप्तिर्यदुतबोधिसत्वइति

४८

सानकेनचिद्वचनीयास्कन्धेनवाधातुनावायतनेनवा॥यावदावेणिकेनवाबुद्धधर्मेण।यावद्वैयाधर्मप्रज्ञप्तिः॥तद्यथापिनामभगवन्शीलमितिसमाधिः
रितिप्रज्ञेतिविमुक्तिरितिविमुक्तिज्ञानदर्शनमितिनामनकेनचिद्वचनीयास्कन्धेनवाधातुनावायतनेनवा॥यावदावेणिकेनवाबुद्धधर्मेण।यावदेवा
धर्मप्रज्ञप्तिः॥तद्यथापिनामभगवन्शीलमितिसमाधिरितिप्रज्ञेतिविमुक्तिरितिविमुक्तिज्ञानदर्शनमितिनामनकेनचिद्वचनीया।स्रोतआपन्नइतिना
मनकेनचिद्वचनीयंसकृदागामीतिअनागामीति।अर्हन्नितिप्रत्येकबुद्धइतियावद्बोधिसत्वधर्मइतितथागतइतिबुद्धइतितथतेतिबुद्धधर्मइति
नामनकेनचिद्वचनीयं।कुशलेनवाअकुशलेनवासावद्येनवाअनवद्येनवासाश्रवेणवाअनाश्रवेणवाआत्मनावाअनात्मनावालौकिकेनवाअलौकिकेनः
वाविविक्तेनवाअविविक्तेनवानिमित्तेनवाअनिमित्तेनवाज्ञावनवाअज्ञावनवाइतिसमयमहंभगवन्नर्थवशंप्रतीत्यैवंवदामि।तद्यथाभगवन्बोधिस
त्वंसान्।यदहंसर्वधर्माणामायव्ययमनुपलभमानःसमनुपश्यन्नामधेयमात्रंसायव्ययंवयुक्तयाबोधिसत्वइति॥अपितुखलु
पुनर्भगवंस्कन्धविनामधेयंनास्थितंनास्थितंनविष्ठितंनाविष्ठितं।तत्कस्यहेतोरविद्यमानत्वात्तस्यनामधेयस्य।एवंवक्तनामधेयंनस्थितंनास्थि
तंनविष्ठितंनाविष्ठितं।सचेद्भगवन्नेवंबोधिसत्वस्यमहासत्वस्यप्रज्ञापारमितायांभाष्यमाणायांचित्तंनावलीयतेनसंलीयतेनविप्रति
सारीभवति।मानसंनास्यप्रतिसंत्रस्यतिनसंत्रासमापद्यतेनियतंबोधिसत्वोमहासत्वः।अविनिवर्तनीयायांबोधिसत्वभूमौस्थितोवेदित
व्यः॥स्थितःस्थानयोगेन॥इतिऋद्धिमाज्ञागतस्यालम्बनाकारविशेषः॥पुनरपरंभगवन्बोधिसत्वेनमहासत्वेनप्रज्ञापारमितायांचरतानरू
पेस्थातव्यंनवेदनायांनसंज्ञायांनसंस्कारेषुनविज्ञानेस्थातव्यं।नचक्षुषिस्थातव्यंनश्रोत्रेनघ्राणेनजिह्वायांनकायेनमनसिस्थातव्यं॥नवी
ननरूपेस्थातव्यंनशब्देनगन्धेनरसेनस्प्रष्टव्येनधर्मेषुस्थातव्यं॥नचक्षुर्विज्ञानेस्थातव्यं।नश्रोत्रविज्ञानेघ्राणविज्ञानेजिह्वाविज्ञानेनकायवि
ज्ञानेनमनोविज्ञानेस्थातव्यं॥नचक्षुःसंस्पर्शेस्थातव्यंनचक्षुःसंस्पर्शप्रत्ययवेदयितेस्थातव्यं॥नश्रोत्रसंस्पर्शेनश्रोत्रसंस्पर्शप्रत्ययवेदयि
तेस्थातव्यं॥नघ्राणसंस्पर्शेनघ्राणसंस्पर्शप्रत्ययवेदयितेस्थातव्यं॥नजिह्वासंस्पर्शेनजिह्वासंस्पर्शप्रत्ययवेदयितेस्थातव्यं॥नकायसंस्पर्शे
नकायसंस्पर्शप्रत्ययवेदयितेस्थातव्यं॥नमनःसंस्पर्शेनमनःसंस्पर्शप्रत्ययवेदयितव्यं॥नपृथिवीधातौस्थातव्यं॥नाब्धातौनतेजोधातौनवायु

पंचविंशति

धातोर्नाकाशधातोर्नाकाशधातोर्नविज्ञानधातोरागमोनाविद्यायाआगमोनसंस्काराणांनविज्ञानस्यननामरूपस्यनषडायतनस्यनस्पर्शस्यनवेदनायानतृ
ष्णायानोपादानस्यनभवस्यनजातेर्नजरामरणशोकपरिदेवदुःखदौर्मनस्योपायासानामागमः।तत्कस्यहेतोःतथाहिभगवन्रूपंरूपत्वेनशून्यंवेदना
वेदनात्वेनशून्यासंज्ञासंज्ञात्वेनशून्यासंस्काराःसंस्कारत्वेनशून्याःविज्ञानंविज्ञानत्वेनशून्यं।यावद्भगवन्रूपस्यशून्यतानतद्रूपंनचान्यत्रशून्यताया
रूपंरूपमेवशून्यताशून्यतैवरूपंयाचभगवन्वेदनायाःशून्यतानसावेदनानचान्यत्रशून्यतायावेदनावेदनैवशून्यताशून्यतैववेदना।याचभगव
न्संज्ञायाःशून्यतानसासंज्ञानचान्यत्रशून्यतायाःसंज्ञासंज्ञैवशून्यताशून्यतैवसंज्ञा।याचभगवन्संस्काराणांशून्यतानतेसंस्काराःनचा
न्यत्रशून्यतायाःसंस्काराःसंस्काराएवशून्यताशून्यतैवसंस्काराः॥याचभगवन्विज्ञानस्यशून्यतानतद्विज्ञानंनचान्यत्रशून्यतायाविज्ञा
नंविज्ञानमेवशून्यताशून्यतैवविज्ञानं॥अनेनभगवन्पर्यायेणबोधिसत्वेनमहासत्वेनप्रज्ञापारमितायांचरतानरूपस्कन्धस्यागमोनवेदनायानसंज्ञा
यानसंस्कारस्यनविज्ञानस्कन्धस्यागमोनपृथिवीधातोरागमोनाब्धातोर्नतेजोधातोर्नवायुधातोर्नाकाशधातोर्नविज्ञानधातोरागमोवा।तत्कस्यहेतोःत
थाहिभगवन्पृथिवीधातुःपृथिवीधातुत्वेनशून्यायाचपृथिवीधातुशून्यतानासौपृथिवीधातुर्नचान्यत्रशून्यतायाःपृथिवीधातुःपृथिवीधातुरेवशू
न्यताशून्यतैवपृथिवीधातुः॥एवमब्धातुस्तेजोधातुर्वायुधातुराकाशधातुस्तथाहिभगवन्विज्ञानधातुर्विज्ञानधातुत्वेनशून्यायाचविज्ञानधातु
शून्यतानासौविज्ञानधातुर्नचान्यत्रशून्यतायाविज्ञानधातुर्विज्ञानधातुरेवशून्यताशून्यतैवविज्ञानधातुः।अनेनभगवन्पर्यायेणबोधिसत्वेनमहास
त्वेनप्रज्ञापारमितायांचरतानपृथिवीधातोरागमोनाब्धातोर्नतेजोधातोर्नवायुधातोर्नाकाशधातोर्नविज्ञानधातोरागमोनरूपस्यागमोनशब्दस्यागमोनग
न्धस्यनरसस्यनस्प्रष्टव्यस्यनधर्मस्यागमः।तत्कस्यहेतोःतथाहिभगवन्रूपंरूपत्वेनशून्यंयाचरूपशून्यतानतद्रूपंनचान्यत्रशून्यतायारूपंरूपमेवशून्यताशून्य
तैवरूपं।तथाहिशब्दःशब्दत्वेनशून्योयाचशब्दशून्यतानसशब्दोनचान्यत्रशून्यतायाःशब्दःशब्दएवशून्यताशून्यतैवशब्दः।तथाहिगन्धोगन्ध
त्वेनशून्योयाचगन्धशून्यतानसगन्धोनचान्यत्रशून्यतायागन्धोगन्धएवशून्यताशून्यतैवगन्धः॥तथाहिरसोरसत्वेनशून्योयाचरसशून्यतानसरसो
नचान्यत्रशून्यतायारसोरसएवशून्यताशून्यतैवरसः॥तथाहिस्प्रष्टव्यंस्प्रष्टव्यत्वेनशून्यंयाचस्प्रष्टव्यशून्यतानतत्स्प्रष्टव्यंनचान्यत्रशून्यताया
स्प्रष्टव्यंस्प्रष्टव्यमेवशून्यताशून्यतैवस्प्रष्टव्यं।तथाहिधर्माधर्मत्वेनशून्यायाचधर्मशून्यतानतेधर्मानचान्यत्रशून्यतायाधर्माधर्माएवशू

न्यताशून्यतैवधर्माः॥अनेनभगवन्पर्यायेणबोधिसत्वेनमहासत्वेनप्रज्ञापारमितायांचरतानरूपस्कन्धस्यागमोनगन्धनरसनस्प्रष्टव्यनध
र्मस्कन्धस्यानचक्षुषआगमोनश्रोत्रस्यागमोनघ्राणस्यनजिह्वायानकायस्यनमनसआगमः।तत्कस्यहेतोःतथाहिभगवंश्चक्षुश्चक्षुत्वेनशून्यंयाचचक्षुःशून्य
तानतच्चक्षुर्नचान्यत्रशून्यतायाश्चक्षुश्चक्षुरेवशून्यताशून्यतैवचक्षुः।तथाहिश्रोत्रंश्रोत्रत्वेनशून्यंशून्यतायाश्रोत्रशून्यतानतच्छ्रोत्रंनचान्यत्रशून्यता
याःश्रोत्रंश्रोत्रमेवशून्यताशून्यतैवश्रोत्रं।तथाहिघ्राणंघ्राणत्वेनशून्यंयाचघ्राणशून्यतानतद्घ्राणंनचान्यत्रशून्यतायाघ्राणंघ्राणमेवशून्यताशून्य
तैवघ्राणं॥तथाहिजिह्वाजिह्वात्वेनशून्यायाचजिह्वाशून्यतानसाजिह्वानचान्यत्रशून्यतायाजिह्वाजिह्वैवशून्यताशून्यतैवजिह्वा।तथाहिकायःका
यत्वेनशून्योयाचकायशून्यतानसकायोनचान्यत्रशून्यतायाःकायःकायएवशून्यताशून्यतैवकायः।तथाहिमनोमनस्त्वेनशून्यंयाचमनःशून्यतान
तन्मनोनचान्यत्रशून्यतायामनोमनएवशून्यताशून्यतैवमनः॥अनेनभगवन्पर्यायेणबोधिसत्वेनमहासत्वेनप्रज्ञापारमितायांचरतानचक्षुर्विज्ञा
नस्कन्धस्यागमोनश्रोत्रविज्ञानेनघ्राणविज्ञानेनजिह्वाविज्ञानेनमनोविज्ञानस्कन्धस्याग
मोवा।तत्कस्यहेतोःतथाहिभगवंश्चक्षुर्विज्ञानंचक्षुर्विज्ञानत्वेनशून्यंयाचचक्षुर्विज्ञानशून्यतानतच्चक्षुर्विज्ञानंनचान्यत्रशून्यतायाश्चक्षुर्विज्ञानं
चक्षुर्विज्ञानमेवशून्यताशून्यतैवचक्षुर्विज्ञानं।तथाहिश्रोत्रविज्ञानंश्रोत्रविज्ञानत्वेनशून्यंयाचश्रोत्रविज्ञानशून्यतानतच्छ्रोत्रविज्ञानंनचान्यत्र
शून्यतायाःश्रोत्रविज्ञानंश्रोत्रविज्ञानमेवशून्यताशून्यतैवश्रोत्रविज्ञानं।तथाहिघ्राणविज्ञानंघ्राणविज्ञानत्वेनशून्यंयाचघ्राणविज्ञानशून्यता
नतद्घ्राणविज्ञानंनचान्यत्रशून्यतायाघ्राणविज्ञानंघ्राणविज्ञानमेवशून्यताशून्यतैवघ्राणविज्ञानं।तथाहिजिह्वाविज्ञानंजिह्वाविज्ञानत्वेनशू
न्यंयाचजिह्वाविज्ञानशून्यतानतज्जिह्वाविज्ञानंनचान्यत्रशून्यतायाजिह्वाविज्ञानंजिह्वाविज्ञानमेवशून्यताशून्यतैवजिह्वाविज्ञानं।तथाहि
कायविज्ञानंकायविज्ञानत्वेनशून्यंयाचमनोविज्ञानशून्यतानतन्मनोविज्ञानंनचान्यत्रशून्यतायाःमनोविज्ञानंमनोविज्ञानमेवशून्यताशू
न्यतैवमनोविज्ञानं।अनेनभगवन्पर्यायेणबोधिसत्वेनमहासत्वेनप्रज्ञापारमितायांचरतानचक्षुर्विज्ञानस्यागमोनश्रोत्रविज्ञानस्यनघ्रा
णविज्ञानस्यनजिह्वाविज्ञानस्यनकायविज्ञानस्यनमनोविज्ञानस्यनचक्षुःसंस्पर्शस्यागमोनश्रोत्रसंस्पर्शस्यघ्राणसंस्पर्शस्यनजिह्वासंस्पर्शस्यनकायसंस्पर्श

पंचविं गा

नमनःसंस्पर्शे स्थातव्यं। तत्कस्य हेतोः। कथाहि भगवंश्चक्षुःसंस्पर्शश्चक्षुःसंस्पर्शत्वेन शून्यो या च चक्षुःसंस्पर्शशून्यता न सा चक्षुःसंस्पर्शेन न चान्यत्र शून्य-
ताया चक्षुःसंस्पर्शश्चक्षुःसंस्पर्श एव शून्यता शून्यतैव चक्षुःसंस्पर्शः। एवं श्रोत्रसंस्पर्शः घ्राणसंस्पर्शः जिह्वासंस्पर्शः कायसंस्पर्शः। कथाहि भगवन्म-
नःसंस्पर्शो मनःसंस्पर्शत्वेन शून्यो या च मनःसंस्पर्शशून्यता न सा मनःसंस्पर्शेन न चान्यत्र शून्यताया मनःसंस्पर्शो मनःसंस्पर्श एव शून्यता
शून्यतैव मनःसंस्पर्शः॥ अनेन भगवन्पर्यायेण बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां चरता न चक्षुःसंस्पर्शे स्थातव्यं न श्रोत्रसंस्पर्शे
न घ्राणसंस्पर्शे न जिह्वासंस्पर्शे न कायसंस्पर्शे न मनःसंस्पर्शे न स्थातव्यं। न चक्षुःसंस्पर्शप्रत्ययवेदयिते स्थातव्यं एवं यावन्न मनःसंस्पर्शप्रत्ययवे-
दयिते स्थातव्यं। तत्कस्य हेतोः। कथाहि भगवंश्चक्षुःसंस्पर्शप्रत्ययवेदयितव्यमेव शून्यता शून्यतैव चक्षुःसंस्पर्शप्रत्ययवेदयितं शून्यता न च-
क्षुःसंस्पर्शप्रत्ययवेदयितेन न चान्यत्र शून्यताया चक्षुःसंस्पर्शप्रत्ययवेदयितं चक्षुःसंस्पर्शप्रत्ययवेदयितमेव शून्यता शून्यतैव चक्षुःसंस्पर्श-
प्रत्ययवेदयितं एवं श्रोत्रसंस्पर्शप्रत्ययवेदयितं घ्राणसंस्पर्शप्रत्ययवेदयितं। जिह्वासंस्पर्शप्रत्ययवेदयितं। कायसंस्पर्शप्रत्ययवेदयि-
तं। तत्कथाहि भगवन्मनःसंस्पर्शप्रत्ययवेदयितं मनःसंस्पर्शप्रत्ययवेदयितत्वेन शून्यं। या च मनःसंस्पर्शप्रत्ययवेदयितशून्यता न सा मनःसंस्प-
र्शप्रत्ययवेदयितेन न चान्यत्र शून्यताया मनःसंस्पर्शप्रत्ययवेदयितं मनःसंस्पर्शप्रत्ययवेदयितमेव शून्यता शून्यतैव मनःसंस्पर्शप्रत्ययवेदयि-
तं॥ अनेन भगवन्पर्यायेण बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां चरता न चक्षुःसंस्पर्शप्रत्ययान्नवेदयिते स्थातव्यं श्रोत्रसंस्पर्शप्रत्ययान्नवे-
दयिते। न घ्राणसंस्पर्शप्रत्ययान्नवेदयिते। न जिह्वासंस्पर्शप्रत्ययान्नवेदयिते। न कायसंस्पर्शप्रत्ययान्नवेदयिते। न मनःसंस्पर्शप्रत्ययान्नवेद-
यिते स्थातव्यं। नाविद्यायां स्थातव्यमेवं यावज्जरामरणे स्थातव्यं। तत्कस्य हेतोः। कथाहि भगवन्नविद्या अविद्यात्वेन शून्या या चाविद्याशून्यता न सा अविद्या-
न चान्यत्र शून्यताया अविद्या। अविद्यैव शून्यता शून्यतैवाविद्या। एवं संस्कारा संस्कारत्वेन शून्याः॥ विज्ञानं विज्ञानत्वेन शून्यं। नामरूपं नामरूपत्वे-
न शून्यं। षडायतनं षडायतनत्वेन शून्यं स्पर्शः स्पर्शत्वेन शून्यं वेदना वेदनात्वेन शून्या। तृष्णा तृष्णात्वेन शून्या। उपादानमुपादानत्वेन शून्यं। भवो भवत्वेन शून्य-

गा०

जातिर्जातित्वेन शून्या। कथाहि भगवञ्जरामरणं जरामरणत्वेन शून्यं। यावज्जरामरणशून्यता न सा जरामरणेन न चान्यत्र शून्यताया जरामरणं
जरामरणमेव शून्यता शून्यतैव जरामरणं॥ अनेन भगवन्पर्यायेण बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां चरता नाविद्यायां स्थातव्यं
न संस्कारेषु न विज्ञाने न नामरूपे न षडायतने न स्पर्शे न वेदनायां न तृष्णायां नोपादाने न भवे न जातौ न जरामरणे स्थातव्यं॥ एवं स्कन्धधातु-
यतनेषु वक्तव्यं॥ पुनरपरं भगवन्बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां चरता न स्मृत्युपस्थानेषु स्थातव्यं। तत्कस्य हेतोः। कथाहि
स्मृत्युपस्थानानि स्मृत्युपस्थानत्वेन शून्यानि यावद्भगवन्स्मृत्युपस्थानानां शून्यता न तानि स्मृत्युपस्थानानि न चान्यत्र शून्यताया स्मृत्युप-
स्थानानि स्मृत्युपस्थानान्येव शून्यता शून्यतैव स्मृत्युपस्थानानि। तदनेनापि भगवन्पर्यायेण बोधिसत्वेन महासत्वेन प्रज्ञापारमिताया-
श्चरता न स्मृत्युपस्थानेषु स्थातव्यं॥ एवं सम्यक्प्रहाणर्द्धिपादेन्द्रियबलबोध्यङ्गमार्गोपारमिता हि [illegible] वैशारद्यप्रतिसंविदष्टाद-
वेणिकबुद्धधर्मेषु न स्थातव्यं। तत्कस्य हेतोः। कथाहि आवेणिकबुद्धधर्मा आवेणिकबुद्धधर्मत्वेन शून्या। यावद्भगवन्नावेणिकबुद्धधर्माणां शून्य-
ता न ता आवेणिकबुद्धधर्माः न चान्यत्र शून्यताया आवेणिका बुद्धधर्माः आवेणिकबुद्धधर्मा एव शून्यता शून्यतैवावेणिका बुद्धधर्माः। तद-
नेनापि भगवन्बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां चरता न दानपारमितायां स्थातव्यं। तत्कस्य हेतोः। कथाहि दानपारमितैव शून्या दानपारमि-
ता। एवं यावद्भगवन्दानपारमितायाः शून्यता न सा दानपारमिता न चान्यत्र शून्यताया दानपारमिता यां दानपारमितैव शून्यता शू-
न्यतैव दानपारमिता। न शीलपारमितायां न क्षान्तिपारमितायां न वीर्यपारमितायां न ध्यानपारमितायां न प्रज्ञापारमितायां स्थातव्यं। तत्क-
स्य हेतोः। कथाहि प्रज्ञापारमितैव शून्या प्रज्ञापारमितात्वेन यावद्भगवन्प्रज्ञापारमितायाः शून्यता न सा प्रज्ञापारमिता न चान्यत्र शून्य-
ताया प्रज्ञापारमिता प्रज्ञापारमितैव शून्यता शून्यतैव प्रज्ञापारमिता। तदनेनापि भगवन्पर्यायेण बोधिसत्वेन महासत्वेन प्रज्ञापारमिता-
यां चरता न दानपारमितायां स्थातव्यं न शीलपारमितायां न क्षान्तिपारमितायां न वीर्यपारमितायां न ध्यानपारमितायां न प्रज्ञापारमिता-
यां स्थातव्यं। पुनरपरं भगवन्बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां चरता न लक्षणेषु स्थातव्यं॥ अक्षरा हि निर्हारेषु स्थातव्यं॥ ए-
[illegible]हारे न रुतनिर्हारे न वाग्निर्हारे न पुनः स्थातव्यं॥ तत्कस्य हेतोः। कथाहि अक्षराणि शून्यान्यक्षरत्वेन यावद्भगवन्नक्षरशून्य-

पंचविंशति
६१

नभिनिर्वृत्तानि न चान्यत्र शून्यताया अनभिनिर्वृत्तात्वेव शून्यता शून्यतैवानभिनिर्वृत्ति॥ तदनेन भगवन् पर्यायेन बोधिसत्वेन महासत्वेन प्रज्ञापारमिताया
चरता नानभिज्ञा उपगन्तव्या॥ पुनरपरं भगवन् बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां चरता नानाभिज्ञा सूपगन्तव्या॥ तत्कस्य हेतोः अभिज्ञा एव शून्याभिज्ञा
स्वभावेन या च भगवन्नभिज्ञा शून्यता न साभिज्ञा न चान्यत्र शून्यताया अभिज्ञाभिज्ञैव शून्यता शून्यतैवाभिज्ञा॥ तदनेन भगवन् पर्यायेन बोधिसत्वेन
महासत्वेन प्रज्ञापारमितायां चरता नानाभिज्ञा सूपगन्तव्या॥ पुनरपरं भगवन् बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां चरता न रूपमनिरोधमिति द्रष्टव्यं
न वेदना न संज्ञा न संस्कारा न विज्ञानमनिरोधमिति द्रष्टव्यं॥ तत्कस्य हेतोः रूपानिरोधानिरोधा स्वभावेन शून्या या च भगवन् रूपानिरोधा शून्यता
यानिरोधा यानिरोधैव शून्यता शून्यतैवानिरोधा॥ तदनेनापि भगवन् पर्यायेन बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां चरता न रूपमनिरोधमि
ति द्रष्टव्यं॥ तत्कस्य हेतोः वेदनानिरोधा निरोधा निरोधा स्वभावेन शून्या या च भगवन् वेदनानिरोधा शून्यता न सानिरोधा न चान्यत्र
शून्यतायाम् अनिरोधा अनिरोधैव शून्यता शून्यतैवानिरोधा॥ न संज्ञानिरोधेति द्रष्टव्यं॥ तत्कस्य हेतोः संज्ञानिरोधा निरोधा स्वभावेन शून्या या
च भगवन् संज्ञानिरोधा शून्यता न सानिरोधा न चान्यत्र शून्यताया अनिरोधा अनिरोधैव शून्यता शून्यतैवानिरोधा॥ न संस्कारानिरोधमिति द्रष्ट
व्यं॥ तत्कस्य हेतोः संस्कारानिरोधा निरोधा स्वभावेन शून्या या च भगवन् संस्कारानिरोधा शून्यता न सानिरोधा न चान्यत्र शून्यताया अनि
रोधा अनिरोधैव शून्यता शून्यतैवानिरोधा॥ न विज्ञानमनिरोधमिति द्रष्टव्यं॥ तत्कस्य हेतोः विज्ञानानिरोधा निरोधा स्वभावेन शून्या या च भ
विज्ञानानिरोधा शून्यता न सानिरोधा न चान्यत्र शून्यताया अनिरोधा अनिरोधैव शून्यता शून्यतैवानिरोधा॥ तदनेनापि भगवन् पर्यायेन बो
धिसत्वेन महासत्वेन प्रज्ञापारमितायां चरता न विज्ञानमनिरोधमिति द्रष्टव्यं॥ एवं न रूपं दुःखमिति द्रष्टव्यं॥ न वेदना न संज्ञा न संस्कारा न विज्ञानं दुः
खमिति द्रष्टव्यं॥ तत्कस्य हेतोः रूपं दुःखता दुःखता स्वभावेन शून्या या च भगवन् रूपदुःखता शून्यता न सा दुःखता न चान्यत्र शून्यताया दुःखता दुः
खतैव शून्यता शून्यतैव दुःखता॥ तदनेनापि भगवन् पर्यायेन बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां चरता न रूपं दुःखमिति द्रष्टव्यं॥ न वेदना न सं
ज्ञा न संस्कारा न विज्ञानं॥ तत्कस्य हेतोः विज्ञानं दुःखता दुःखता स्वभावेन शून्या या च भगवन् विज्ञानदुःखता शून्यता न सा दुःखता न चान्यत्र शून्यताया दुः
खता दुःखतैव शून्यता शून्यतैव दुःखता॥ तदनेन पर्यायेन बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां चरता न विज्ञानं दुःखमिति द्रष्टव्यं॥ एवं न रूपम
नात्मेति द्रष्टव्यं न वेदना न संज्ञा न संस्कारा न विज्ञानमनात्मेति द्रष्टव्यं॥ तत्कस्य हेतोः रूपनात्मा नात्मा स्वभावेन शून्या या च भगवन् रूपानात्म

गुरुः
६१

ता शून्यता न सा नात्मता न चान्यत्र शून्यताया अनात्मता अनात्मतैव शून्यता शून्यतैवानात्मता॥ तदनेनापि भगवन् पर्यायेन बोधिसत्वेन महासत्वेन प्र
ज्ञापारमितायां चरता न रूपमनात्मेति द्रष्टव्यं॥ न वेदना न संज्ञा न संस्कारा न विज्ञानमनात्मेति द्रष्टव्यं॥ तत्कस्य हेतोः विज्ञानानात्मता नात्मता स्व
भावेन शून्या या च भगवन् विज्ञानानात्मता शून्यता न सा नात्मता न चान्यत्र शून्यताया अनात्मता अनात्मतैव शून्यता शून्यतैवानात्मता॥ तदनेना
पि भगवन् पर्यायेन बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां चरता न विज्ञानमनात्मेति द्रष्टव्यं॥ पुनरपरं बोधिसत्वेन महासत्वेन प्रज्ञापारमिताया
चरता न रूपं शान्तमिति द्रष्टव्यं न वेदना न संज्ञा न संस्कारा न विज्ञानं शान्तमिति द्रष्टव्यं॥ तत्कस्य हेतोः रूपशान्तता शान्तता शान्तता स्वभावेन शून्या
या च भगवन् रूपशान्तता शून्यता न सा शान्तता न चान्य शून्यतायाः शान्तता शान्ततैव शून्यता शून्यतैव शान्तता॥ तदनेनापि भगवन् पर्यायेन बोधिसत्वेन महा
सत्वेन प्रज्ञापारमितायां चरता न रूपं शान्तमिति द्रष्टव्यं॥ न वेदना न संज्ञा न संस्कारा न विज्ञानं शान्तमिति द्रष्टव्यं॥ तत्कस्य हेतोः विज्ञानशान्तता शा
न्तता स्वभावेन शून्या या च भगवन् विज्ञानशान्तता शून्यता न सा शान्तता न चान्यत्र शून्यतायाः शान्तता शान्ततैव शून्यता शून्यतैव शान्तता॥ तदनेनापि भग
वन् पर्यायेन बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां चरता न विज्ञानं शान्तमिति द्रष्टव्यं॥ एवं हेतुसमुदयप्रभवप्रत्ययता नोपगन्तव्या॥ पुनरपरं भग
वन् बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां चरता तथता नोपगन्तव्या॥ तत्कस्य हेतोः तथता तथता स्वभावेन शून्या। या च भगवन् तथता या शू
न्यता न सा तथता न चान्यत्र तथताया शून्यता तथतैव शून्यता शून्यतैव तथता॥ तदनेनापि भगवन् पर्यायेन बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां चर
ता धर्मता नोपगन्तव्या एवं धर्मता नोपगन्तव्या॥ तत्कस्य हेतोः धर्मता धर्मता स्वभावेन शून्यता या च भगवन् धर्मताया शून्यता न सा धर्मता
न चान्यत्र धर्मतायाः शून्यता धर्मतैव शून्यता शून्यतैव धर्मता॥ तदनेनापि भगवन् पर्यायेन बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां चरता धर्मता
या नोपगन्तव्या॥ एवं धर्मधातु नोपगन्तव्या॥ तत्कस्य हेतोः धर्मधातु धर्मधातु स्वभावेन शून्या या च भगवन् धर्मधातोः शून्यता न स धर्मधातु न चा
न्यत्र धर्मधातोः शून्यता धर्मधातुरेव शून्यता शून्यतैव धर्मधातु॥ तदनेनापि भगवन् पर्यायेन बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां चरता ध
र्मधातो नोपगन्तव्या एवं धर्मनियामता नोपगन्तव्या॥ तत्कस्य हेतोः धर्मनियामता धर्मनियामता स्वभावेन शून्या या च भगवन् धर्मनियामता
शून्यता न सा धर्मनियामता न चान्यत्र धर्मनियामताया शून्यता धर्मनियामतैव शून्यता शून्यतैव धर्मनियामता॥ तदनेनापि भगवन् पर्यायेन बोधि

पंचविंश

सत्वेन महासत्वेन प्रज्ञापारमितायां चरता [illegible] नि यावत् मार्गयितव्या ॥ एवं [illegible] कौशिक [illegible]
[illegible] भगवन् [illegible] प्रज्ञापारमितायां [illegible] भगवन् [illegible]
[illegible] सत्वेन महासत्वेन प्रज्ञापारमितायां चरता [illegible] पुनरपरं भगवन् बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां चरता सर्वधर्मा [illegible]
[illegible] ध्यानपारमिता [illegible] भगवन् ध्यानपारमिता [illegible]
ध्यानपारमिता [illegible] भगवन् [illegible] बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां
[illegible] ध्यानपारमिता [illegible] पुनरपरं भगवन् बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां चरता [illegible] उपायकौशल्येन [illegible]
[illegible] प्रज्ञापारमितायां [illegible]
प्रज्ञापारमितायां [illegible] प्रज्ञापारमिता [illegible] प्रज्ञापारमितायां [illegible]
[illegible] प्रज्ञापारमिता [illegible] भगवन् [illegible] वेदनासंज्ञासंस्कारविज्ञानं [illegible]
[illegible] वेदनासंज्ञासंस्कारविज्ञानं [illegible]
[illegible] प्रज्ञापारमिता [illegible]
[illegible] बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां चरता [illegible] सर्वधर्माः [illegible]
[illegible] महासत्वस्य [illegible] परिगृहीता [illegible]
[illegible] रूपं [illegible] वेदनासंज्ञासंस्कारविज्ञानं [illegible]
[illegible]
[illegible]

७२

[illegible] प्रज्ञापारमिता [illegible]
[illegible] वेदना [illegible] संज्ञा [illegible] संस्कारा [illegible] विज्ञानं [illegible]
[illegible] धर्म [illegible] बोधिसत्वेन महासत्वेन प्रज्ञापारमिता [illegible]
[illegible] धर्म [illegible] संस्कार [illegible] धर्म [illegible] बोधिसत्वेन महासत्वेन प्रज्ञा
पारमिता [illegible] प्रज्ञापारमितायां [illegible]
[illegible] प्रज्ञापारमिता [illegible]
[illegible] वेदनासंज्ञासंस्कारविज्ञान [illegible]
[illegible] समनुपश्यति [illegible]
[illegible] समनुपश्यति [illegible] समनुपश्यति [illegible]
[illegible] समनुपश्यति [illegible] समनुपश्यति [illegible]
[illegible] समनुपश्यति [illegible] वेदना [illegible] संज्ञा [illegible] संस्कारा [illegible] विज्ञान
[illegible] समनुपश्यति [illegible] समनुपश्यति [illegible] वेदना [illegible] संज्ञा [illegible]
[illegible] समनुपश्यति [illegible] समनुपश्यति [illegible] संज्ञा [illegible] संस्कार [illegible]
[illegible] समनुपश्यति [illegible] समनुपश्यति [illegible] वेदना [illegible] संज्ञा [illegible]
[illegible] समनुपश्यति [illegible] बोधिसत्वस्य महासत्वस्य [illegible]
[illegible] एवं [illegible] सर्वधर्मा [illegible]

पंचविंशति

नि

मनसिकारमुपादाय। नाप्यनन्तरमधिपत्युपन्यायेन परिगृह्णीयादामृत्यु सर्वधर्मानुत्पादत्वाद्गोमामुपादाय सर्वधर्माणामधिपतिमन्यन्ते। स
र्वधर्मानुत्पादानुत्सर्गामुपादाय गम्भीर हि सर्वे सर्वधर्मा अपरिगृहीताः असंगः सा प्रज्ञापारमिता॥ ॐ यमविदगवन्बोधिसत्वस्य महास
त्वस्य प्रज्ञापारमिता रूपापरिगतमुपादाय यद्रूपं न परिगृह्णाति यद्वेदनां न परिगृह्णाति यत्संज्ञां न परिगृह्णाति। यत्संस्कारान्न परिगृह्णा
ति। यद्विज्ञानं न परिगृह्णाति सर्वधर्मापरिगृहीततामुपादाय यावत् समस्कारस्कन्धधात्वायतनप्रतीत्यसमुत्पादास्मृत्युपस्थानसम्यक्प्रहाण
र्द्धिपादेन्द्रियबलबोध्यङ्गमार्गपारमिताहिज्ञानदशबलवैशारद्यप्रतिसंविदावेणिकबुद्धधर्मशून्यतानिमित्ताप्रणिहितानि संस्कारान्धर्मा
नानुधर्मान्धर्मानियामतासमाधिमुखानि यावत्समाधिं न परिगृह्णाति। सर्वधर्मापरिगृहीततामुपादाय। नयाकरणानि परिनिर्वाणपरिगृहं
प्रतिपत्तिं यावद्भगवन्कथं भगवन्बोधिसत्वेन प्रतिसंविदि नहन्दशानि नावर्त्तिकेबुद्धधर्मा आगतस्य हि कथं हि सर्व
धर्मानुधर्मा यावत्सर्वाकारज्ञता तद्बुद्धिपादेन्द्रियबलबोध्यङ्गमार्गपारमिताहिज्ञानदशबलवैशारद्यप्रतिसंविदावेणिकाबुद्धधर्मा न ध
र्मा विधर्मा न धर्माः॥ ॐ बोधिसत्वस्य महासत्वस्य प्रज्ञापारमिता सर्वधर्मापरिगृहीततामुपादाय॥ ॐ इति म ध्यमं इंगमालम्बनाकाल
विरुपः। पुनरपरं भगवन्बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां चरता एवं व्यवलोकितव्यं कतमैषा प्रज्ञापारमिता कस्यैषा प्रज्ञापार
मिता किमर्था प्रज्ञापारमिता॥ एवं प्रज्ञापारमितायां चरन्बोधिसत्वो महासत्वः प्रज्ञापारमितायां चरन्नेवं उपनिध्यायति। न कि यो धर्मो न विद्य
ते नोपलभ्यते न सा प्रज्ञापारमिता इति न चरति। चरति। प्रज्ञापारमितायां॥ अथ खल्वायुष्मान्शारिपुत्र आयुष्मन्तं सुभूतिमेतदवोचत्
कतमे धर्मा न विद्यन्ते नोपलभ्यन्ते॥ सुभूतिराह। प्रज्ञापारमितायुष्मन्शारिपुत्र न विद्यते नोपलभ्यते। ध्यानपारमिता
दानपारमिता आयुष्मन्शारिपुत्र धर्मा न विद्यन्ते नोपलभ्यन्ते। क्षान्तिपारमिता न विद्यते नोपलभ्यते। शीलपारमिता न विद्यते
नोपलभ्यते। आयुष्मन्शारिपुत्र न विद्यते नोपलभ्यते। वीर्यपारमिता न विद्यते नोपलभ्यते। अध्यात्मशून्यतामुपादाय। बहिर्धाशून्यतामुपादाय अध्यात्मबहिर्धा
शून्यतामुपादाय। शून्यताशून्यतामुपादाय। महाशून्यतामुपादाय। परमार्थशून्यतामुपादाय। संस्कृतशून्यतामुपादाय। असंस्कृतशून्यता
मुपादाय। अत्यन्तशून्यतामुपादाय। अनवराग्रशून्यतामुपादाय। अनवकारशून्यतामुपादाय प्रकृतिशून्यतामुपादाय। सर्वधर्मशून्यताम

६३

नुपादाय। सलक्षणशून्यतामुपादाय। अनुपलम्भशून्यतामुपादाय। अभावस्वभावशून्यतामुपादाय भावशून्यतामुपादाय अभावशून्यतामुपादाय स्वभावशून्यता
मुपादाय परभावशून्यतामुपादाय। रूपमायुष्मन्शारिपुत्र न विद्यते नोपलभ्यते। वेदना न विद्यते नोपलभ्यते संज्ञा न विद्यते। संस्कारा न विद्यन्ते। विज्ञानमायुष्म
न्शारिपुत्र न विद्यते नोपलभ्यते। अध्यात्मशून्यतायुष्मन्शारिपुत्र न विद्यते नोपलभ्यते। बहिर्धाशून्यता न विद्यते नोपलभ्यते। अध्यात्मबहिर्धाशून्यता न विद्यते नोपल
भ्यते। शून्यताशून्यता न विद्यते नोपलभ्यते। महाशून्यता न विद्यते नोपलभ्यते। परमार्थशून्यता न विद्यते नोपलभ्यते। संस्कृतशून्यता न विद्यते नोपलभ्यते। असंस्कृत
शून्यता न विद्यते नोपलभ्यते। अत्यन्तशून्यता न विद्यते नोपलभ्यते। अनवराग्रशून्यता न विद्यते नोपलभ्यते। अनवकारशून्यता न विद्यते नोपलभ्यते। प्रकृतिशून्य
ता न विद्यते नोपलभ्यते। सर्वधर्मशून्यता न विद्यते नोपलभ्यते। स्वलक्षणशून्यता न विद्यते नोपलभ्यते। अनुपलम्भशून्यता न विद्यते नोपलभ्यते। अभावस्वभावशू
न्यता न विद्यते नोपलभ्यते। भावशून्यता न विद्यते नोपलभ्यते। अभावशून्यता न विद्यते नोपलभ्यते। स्वभावशून्यता न विद्यते नोपलभ्यते। परभावशून्यता न वि
द्यते नोपलभ्यते। यावत्स्मृत्युपस्थानानि बोधिपक्षा धर्मा न विद्यन्ते नोपलभ्यन्ते। अरिज्ञानवशेन विद्यते नोपलभ्यते। अभावशून्यता न विद्यते नोपलभ्यते। स्वभावशू
न्यता न विद्यते नोपलभ्यते। परभावशून्यता न विद्यते नोपलभ्यते। दशबलवैशारद्यप्रतिसंविदावेणिकबुद्धधर्मा न विद्यन्ते नोपलभ्यन्ते। मार्गा न विद्यन्ते नो
पलभ्यन्ते। बुद्धधर्मा न विद्यन्ते नोपलभ्यन्ते। धर्मस्थितिता न विद्यते नोपलभ्यते। धर्मनियामता न विद्यते नोपलभ्यते। भूतकोटिर्न विद्यते नोपलभ्यते। बुद्धायुष्मञ्शा
रिपुत्र न विद्यते नोपलभ्यते। सर्वकालं हि आयुष्मञ्शारिपुत्र न विद्यते नोपलभ्यते। अध्यात्मशून्यतामुपादाय। यावदभावस्वभावशून्यतामुपादाय। एवमायुष्मञ्शारिपुत्र
बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां चरता एवं रूपमुपनिध्यातव्यं। एवं रूपमुपनिध्यायति। तस्यैवं रूपमुपनिध्यायतो न चित्तमवलीयते न संलीय
ते नोत्रस्यति न संत्रस्यति न संत्रासमापद्यते अविरहितो बोधिसत्वो महासत्वः प्रज्ञापारमितया वेदितव्यः॥ ॐ अधिमात्र दृढं गमालम्बनाकारविरूपश्चा
अथ खल्वायुष्मान्शारिपुत्र आयुष्मन्तं सुभूतिमेतदवोचत्। केन कारणेनायुष्मन्सुभूते बोधिसत्वो महासत्वः प्रज्ञापारमितयाऽविरहितो वेदितव्यः॥ सु
भूतिराह॥ रूपमायुष्मन्शारिपुत्र विरहितं रूपस्वभावेन। एवं वेदना संज्ञा संस्कारा विज्ञानमायुष्मन्शारिपुत्र विरहितं विज्ञानस्वभावेन दानपारमितायुष्मञ्शा
रिपुत्र विरहिता दानपारमितास्वभावेन। एवं शीलपारमिता क्षान्तिपारमिता वीर्यपारमिता ध्यानपारमिता प्रज्ञापारमितायुष्मन्शारिपुत्र विरहिता प्रज्ञा
पारमितास्वभावेन। एवमध्यात्मशून्यता अनुपसमापत्तयः स्मृत्युपस्थानसम्यक्प्रहाणर्द्धिपादेन्द्रियबलबोध्यङ्गमार्गपारमिताहिज्ञानदशबलवैशार
द्यप्रतिसंविदावेणिकबुद्धधर्मा विरहिता बुद्धधर्माः स्वभावेन सर्वाकारज्ञतायुष्मन्शारिपुत्र विरहिता सर्वाकारज्ञता स्वभावेनायुष्मन्शारिपुत्र आह॥ कथं पुनरा

पंचविंशति

म ४

यूपा सत्सु रूपस्य स्वलक्षः कथं वेदनायाः संज्ञायाः संस्काराणां कथं विज्ञानस्य स्वलक्षः। कथं च स्कन्धानां स्कन्धधात्वायतनप्रतीत्यसमुत्पादानां स्वलक्षः
एवं विविक्तस्य कथं लक्षणास्वलक्षः॥ सुभूतिराह। शून्यतायुष्मान् शारिपुत्र रूपस्य स्वलक्षः शून्यता वेदनायाः शून्यता संज्ञायाः शून्यता संस्काराणां शून्
ता विज्ञानस्य स्वलक्षः शून्यता यावत्स्कन्धधात्वायतनप्रतीत्यसमुत्पादानां स्वलक्षः शून्यता। रूपतानिमित्तप्रतिहितानि संस्काराणां [illegible]
गधर्माधर्माणां धर्मलक्षितानां धर्मनियामतां स्वलक्षः। एवं विविक्तं तथा [illegible] स्वलक्षः॥ [illegible] आयुष्मान् शारिपुत्र पर्यायः येनैवं विदित
व्यं यथा रूपं विरहितं रूपस्वलक्षणेन वेदना विरहिता वेदनास्वलक्षणेन संज्ञा विरहिता संज्ञास्वलक्षणेन संस्कारा विरहिताः संस्कारस्वलक्षणेन विज्ञानं वि
रहितं विज्ञानस्वलक्षणेन। एवं विविक्तं यस्कन्धमस्कन्ध स्कन्धधात्वायतनप्रतीत्यसमुत्पादाः धर्माः यावत् ज्ञानकोटि विरहिता ज्ञानकोटिस्वलक्षणेन॥ पुनरप
रं शारिपुत्र रूपं विरहितं रूपतत्त्वेन वेदना विरहिता वेदनातत्त्वेन संज्ञा विरहिता संज्ञातत्त्वेन संस्कारा विरहिताः संस्कारतत्त्वेन विज्ञानं वि
रहितं विज्ञानतत्त्वेन। एवं विविक्तं यस्कन्धमस्कन्ध स्कन्धधात्वायतनप्रतीत्यसमुत्पादाः धर्माः यावत् ज्ञानकोटि विरहिता ज्ञानकोटितत्त्वेन तत्त्व
तत्त्वमेवं नापि तत्त्वेन लक्षणविरहितो स्वलक्षणतत्त्वेनापि स्वलक्षणविरहितः॥ शारिपुत्र आह। यद्यायुष्मन् सुभूते [illegible] बोधिसत्त्वो महासत्त्वो प्रज्ञापारमितायां चरन् सर्वज्ञताया निर्यास्य
ति सर्वाकारज्ञतायां॥ सुभूतिराह॥ एवं मतायुष्मान् शारिपुत्र यथा वेदमनुत्पादिष्यति सर्वनिर्यास्यति सर्वाकारज्ञतायां॥ तत्कस्य हेतोः [illegible] कालवि
हा धर्मलक्षस्य हेतोस्तथा ह्यायुष्मन् शारिपुत्र अजाता अनिर्जाता सर्वधर्माः। शारिपुत्र आह। केन कारणेनायुष्मन् सुभूते अजाता अनिर्जाताः सर्वधर्माः॥
सुभूतिराह। रूपमायुष्मन् शारिपुत्र रूपं रूपस्वलक्षणेन तस्य नापि जाति नापि निर्याता अनुपलम्भतां। वेदना शारिपुत्र वेदनास्वलक्षणेन तस्य नापि जाति नापि निर्याता अनु
पलम्भतां। संज्ञा शारिपुत्र संज्ञास्वलक्षणेन तस्य नापि जाति नापि निर्याता अनुपलम्भतां। संस्काराः शारिपुत्र संस्कारस्वलक्षणेन तस्य नापि जाति नापि निर्या
ता अनुपलम्भतां। विज्ञानमायुष्मन् शारिपुत्र विज्ञानं विज्ञानस्वलक्षणेन तस्य नापि जाति नापि निर्याता अनुपलम्भतां। एवं विविक्तं यस्कन्धमस्कन्धधात्वायतन
प्रतीत्यसमुत्पादाद् यावज्ज्ञानकोटि ज्ञानकोटिस्वलक्षणेन तस्य नापि जाति नापि निर्याता अनुपलम्भतां। एवं हि शारिपुत्र बोधिसत्त्वो महासत्त्वः प्रज्ञापार
मितायां चरन् सर्वाकारज्ञताया आसन्नीभवति यथा यथा सर्वाकारज्ञताया आसन्नीभवति तथा तथा कायपरिशुद्धिश्च चित्तपरिशुद्धिश्च लक्षणपरिशुद्धि
श्चाधिगच्छति। तथा तथा कायपरिशुद्धिश्च चित्तपरिशुद्धिश्च लक्षणपरिशुद्धिश्चाधिगच्छति तथा तथास्य बोधिसत्त्वस्य महासत्त्वस्य रागसहगतं चित्तं नोत्प
द्यते द्वेषसहगतं चित्तं नोत्पद्यते मोहसहगतं चित्तं नोत्पद्यते मानसहगतं चित्तं नोत्पद्यते लोभसहगतं चित्तं नोत्पद्यते दृष्टिसहगतं चित्तं नोत्पद्यते

९४

स नागाऽज्ञानूत्पादाद्दाघचेतनानूत्पादान्तविज्ञानूत्पादान्मानविज्ञानूत्पादाल्लोभविज्ञानूत्पादाद्द्वेषविज्ञानूत्पादाज्ञानूत्पादाज्जुगुप्सानूपपत्तिश्च सगणः
समितः उपपादुको भवति बुद्धक्षेत्राद्बुद्धक्षेत्रं संक्रामति बुद्धांश्च भगवतः पर्युपास्ते सत्त्वांश्च परिपाचयति बुद्धक्षेत्रं च परिशोधयति न च बुद्धैर्भगवद्भिर्वि
रहितो भवति यावदनुत्तरां सम्यक्संबोधिमभिसंबुद्धः। एवं हि शारिपुत्र बोधिसत्त्वो महासत्त्वः आसन्नीभवत्यनुत्तरायाः सम्यक्संबोधेः॥ ॐ इति मध्य[illegible]नाम प
रिवर्तः॥ अथ खल्वायुष्मान् सुभूतिः स्थविरो भगवन्तमेतदवोचत्॥ स चेद्भगवन् बोधिसत्त्वो महासत्त्वो रूपायोगेन प्रज्ञापारमितायां रूपं चरति निमित्ते चरति
न चरति प्रज्ञापारमितायां। स चेद्वेदनायां चरति निमित्ते चरति प्रज्ञापारमितायां स चेत्संज्ञायां चरति निमित्ते चरति। न चरति प्रज्ञापारमितायां स चेत्संस्कारे
षु चरति निमित्ते चरति न चरति प्रज्ञापारमितायां। स चेद्विज्ञाने चरति निमित्ते चरति न चरति प्रज्ञापारमितायां। स चेद्रूपं नित्यमनित्यं वेति चरति निमित्ते च
रति न चरति प्रज्ञापारमितायां। स चेद्वेदना नित्यानित्या वेति चरति निमित्ते चरति न चरति प्रज्ञापारमितायां स चेत्संज्ञा नित्यानित्या वेति चरति नि
मित्ते चरति न चरति प्रज्ञापारमितायां स चेत्संस्कारा नित्यानित्या वेति चरति निमित्ते चरति न चरति प्रज्ञापारमितायां स चेद्विज्ञानं नित्यमनित्यं वेति चरति निमि
त्ते चरति न चरति प्रज्ञापारमितायां। स चेद्रूपं सुखं दुःखं वेति चरति निमित्ते चरति न चरति प्रज्ञापारमितायां। स चेद्वेदना सुखा दुःखा वेति चरति निमित्ते चरति
न चरति प्रज्ञापारमितायां स चेत्संज्ञा सुखा दुःखा वेति चरति निमित्ते चरति न चरति प्रज्ञापारमितायां। सुखा दुःखा वेति चरति निमित्ते चरति न चरति प्रज्ञापार
मितायां। स चेद्विज्ञानं सुखं दुःखं वेति चरति निमित्ते चरति न चरति प्रज्ञापारमितायां। स चेद्वेदना सुखा दुःखा वेति चरति निमित्ते चरति न चरति प्रज्ञापारमि
तायां। स चेत्संज्ञा सुखा दुःखा वेति चरति न चरति प्रज्ञापारमितायां। स चेद्रूपमात्मा अनात्मा वेति चरति निमित्ते चरति न चरति प्रज्ञापारमितायां
त्मा वेति चरति निमित्ते चरति न चरति प्रज्ञापारमितायां। स चेत्संज्ञा आत्मा अनात्मा वेति चरति निमित्ते चरति न चरति प्रज्ञापारमितायां। स चेद्वेदना आत्मानात्मा
अनात्मा वेति चरति निमित्ते चरति न चरति प्रज्ञापारमितायां। स चेत्संस्काराः आत्मा अनात्मा वेति चरति निमित्ते चरति न चरति प्रज्ञापारमितायां। स चेत्संस्कारा आत्मा
अनात्मा वेति चरति निमित्ते चरति न चरति प्रज्ञापारमितायां स चेद्विज्ञानमात्मानात्मा वेति चरति निमित्ते चरति न चरति प्रज्ञापारमितायां। स चेद्रूपं शान्तमशा
न्तं वेति चरति निमित्ते चरति न चरति प्रज्ञापारमितायां। स चेद्वेदना शान्ता अशान्ता वेति चरति निमित्ते चरति न चरति प्रज्ञापारमितायां स चेत्संज्ञा शान्ता अशान्ता वेति
चरति निमित्ते चरति न चरति प्रज्ञापारमितायां। स चेत्संस्काराः शान्ता अशान्ता वेति चरति निमित्ते चरति न चरति प्रज्ञापारमितायां स चेद्विज्ञानं शान्तमशा
न्तं वेति चरति निमित्ते चरति न चरति प्रज्ञापारमितायां। स चेद्रूपं विविक्तमविविक्तं वेति चरति निमित्ते चरति न चरति प्रज्ञापारमितायां स चेद्वेदना विवि
क्ता अविविक्ता वेति चरति निमित्ते चरति न चरति प्रज्ञापारमितायां स चेत्संज्ञा विविक्ता अविविक्ता वेति चरति निमित्ते चरति न चरति प्रज्ञापारमितायां स चे

पंचविंशति
७५

त्संस्कारविविक्तं विविक्तमिति चरति निमित्ते चरति न चरति प्रज्ञापारमितायां। स च विज्ञानं विविक्तं विविक्तमिति चरति निमित्ते चरति न चरति प्रज्ञापारमितायां। स च
क्षुरायतनाद्विविक्तमायतनं स प्रज्ञापारमितायां अननुपायकुशलः स कश्चिद्बोधिपक्ष्यधर्म्मेषु चरति निमित्ते चरति न चरति प्रज्ञापारमितायां। एवं यावदा
ज्ञापारमितासु प्रमाणध्यानानारूप्यसमापत्तिषु पंचचक्षुःषु दशसु तथागतबलेषु चतसृषु प्रतिसंवित्सु चतुर्षु वैशारद्येषु यावदष्टादशस्वावेणिकेषु बुद्धध
र्म्मेषु चरति निमित्ते चरति न चरति प्रज्ञापारमितायां। स च भगवन् बोधिसत्त्वस्य महासत्त्वस्यानुपायकौशलेन प्रज्ञापारमितायां चरत एवं भवति। अहं प्रज्ञापार
मितायां चरामीति उपलंभे चरति। अहं चरामीति चरति निमित्ते चरति न चरति। स च बोधिसत्त्वस्य महासत्त्वस्यैवं भवति। य एवं चरति स प्रज्ञापारमितायां च
रति स प्रज्ञापारमितां भावयतीति निमित्ते एवं चरति। अयं बोधिसत्त्वस्य महासत्त्वस्यानुपायकौशलं वेदितव्यं। अथ खल्वायुष्मान् शारिपुत्र आयुष्मन्तं सुभूतिम
तदवोचत्। केन कारणेनायुष्मन् सुभूते बोधिसत्त्वस्य महासत्त्वस्यानुपायकौशलं वेदितव्यं। सुभूतिराह। तथा ह्यायुष्मन् शारिपुत्र यो बोधिसत्त्वो महास
त्त्वः प्रज्ञापारमितायां चरन् रूपमधितिष्ठति संजानीते अधिमुच्यते वेदनामधितिष्ठति संजानीते अधिमुच्यते संज्ञामधितिष्ठति संजानीते अधिमुच्यते संस्कारानम
धितिष्ठति अधिमुच्यते विज्ञानमधितिष्ठति संजानीते अधिमुच्यते स रूपमधितिष्ठति संजानानोऽधिमुच्यमानः। वेदनामधितिष्ठति संजानानोऽधिमुच्यमानः
नाः संज्ञामधितिष्ठन् संजानानोऽधिमुच्यमानः। संस्कारानधितिष्ठन् संजानानोऽधिमुच्यमानः। विज्ञानमधितिष्ठन् संजानानोऽधिमुच्यमानः। एवं रूपमभिसंस्करोति संस्कारं चरति व
दनासंज्ञासंस्कारान् विज्ञानमभिसंस्करोति संस्कारांश्चरति न जातिजरामरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो न परिमुच्यत इति वदामि। पुनरपरं शारिपुत्र स च
बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकुशलः। चक्षुरधितिष्ठति संजानीते अधिमुच्यते। श्रोत्रघ्राणजिह्वाकायमनांस्यधितिष्ठति संजानीते अधिमुच्यते
रूपमधितिष्ठति संजानीते अधिमुच्यते। शब्दगन्धरसस्प्रष्टव्यधर्म्मानधितिष्ठति संजानीते अधिमुच्यते चक्षुर्विज्ञानं श्रोत्रविज्ञानं घ्राणविज्ञानं जिह्वाविज्ञानं काय
विज्ञानं मनोविज्ञानमधितिष्ठति संजानीते अधिमुच्यते। स चक्षुःसंस्पर्शमधितिष्ठति संजानीते अधिमुच्यते। स च श्रोत्रघ्राणजिह्वाकायमनःसंस्पर्शम
धितिष्ठति संजानीते अधिमुच्यते स च चक्षुःसंस्पर्शप्रत्ययं वेदयितं सुखं वा दुःखं वा अदुःखासुखं वाधितिष्ठति संजानीते अधिमुच्यते। स च श्रोत्रघ्राणजिह्वाका
यमनःसंस्पर्शप्रत्ययं वेदयितं सुखं वा दुःखं वा अदुःखासुखं वाधितिष्ठति संजानीते अधिमुच्यते। स च स्मृत्युपस्थानं बोधिपक्ष्यान् धर्म्मानधितिष्ठति संजानीते अधिमु
च्यते। एवमध्यात्मशून्यतां [illegible] प्रज्ञापारमितां दशबलानि वैशारद्यानि चतस्रः प्रतिसंविदः अप्रमाणानि ध्यानानि आरूप्यसमापत्तीर्द
शतथागतबलानि वैशारद्यानि अष्टादशावेणिकान्बुद्धधर्म्मानर्हत्त्वं प्रत्येकबुद्धत्वं बोधिसत्त्वं बुद्धधर्म्मानधितिष्ठति संजानीते अधिमुच्यते। स बोधिं बुद्धधर्म्मानधितिष्ठति
संजानीते अधिमुच्यमानो बुद्धधर्म्मानभिसंस्करोति संस्कारांश्चरति। न स संस्कारांश्चरन् परिमुच्यते जात्या जरया मरणेन शोकपरिदेवदुःखदौर्मनस्योपायासे

गुनः
७५

भ्यो न परिमुच्यते दुःखान्न परिमुच्यत इति वदामि। स खलु पुनः शारिपुत्र बोधिसत्त्वो महासत्त्वो द्रष्टव्यः। अवकल्पमिं प्रज्ञाकल्पमिं वा परिगृहीतः सोऽनुत्तरां सम्यक्संबोधिमभिसंबोद्धुं त्वरन्ते
इत्याकारेण शारिपुत्र बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकुशलो वेदितव्यः। शारिपुत्र आह। कथमायुष्मन् सुभूते बोधिसत्त्वो महासत्त्व
प्रज्ञापारमितायां चरन्नुपायकुशलो वेदितव्यः। सुभूतिराह। यदायुष्मन् शारिपुत्र बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् रूपमधितिष्ठ
ति न संजानीते नाधिमुच्यते वेदनासंज्ञासंस्कारान् विज्ञानं नाधितिष्ठति न संजानीते नाधिमुच्यते। एवं यावद्बुद्धधर्म्मान् नाधितिष्ठति न संजानीते नाधिमुच्यते। स न रूप
चरति न वेदनायां न संज्ञायां न संस्कारेषु न विज्ञाने चरति। न रूपनिमित्ते चरति न वेदनायां न संज्ञायां न संस्कारेषु न विज्ञाने निमित्ते चरति न रूपं नित्य
मिति चरति नानित्यमिति चरति न वेदनां न संज्ञां न संस्कारान् न विज्ञानं नित्यमिति नानित्यमिति चरति न रूपं सुखमिति न दुःखमिति नात्मेति नानात्मेति न शान्तमि
ति नाशान्तमिति चरति न वेदनां न संज्ञां न संस्कारान् न विज्ञानं सुखमिति दुःखमिति नात्मेति नानात्मेति न शान्तमिति नाशान्तमिति चरति न रूपं शून्यमिति नाशू
न्यमिति न निमित्तमिति नानिमित्तमिति चरति न प्रणिहितमिति नाप्रणिहितमिति चरति न विविक्तमिति नाविविक्तमिति चरति। एवं न वेदनां न संज्ञां न संस्कारान् न वि
ज्ञानं शून्यमिति नाशून्यमिति चरति न निमित्तमिति नानिमित्तमिति चरति न प्रणिहितमिति नाप्रणिहितमिति चरति। न विविक्तमिति नाविविक्तमिति
चरति। तत्कस्य हेतोः। तथा हि शारिपुत्र या रूपस्य शून्यता न तद्रूपं न चान्यत्र शून्यताया रूपं नान्यत्र रूपाच्छून्यता रूपमेव शून्यता शून्यतैव रूपं याव
द्वेदनायाः शून्यता संज्ञायाः शून्यता संस्काराणां शून्यता या विज्ञानस्य शून्यता न तद्विज्ञानं न चान्यत्र शून्यताया विज्ञानं नान्यत्र विज्ञानाच्छून्यता शून्यतैव वि
ज्ञानं विज्ञानमेव शून्यता। एवं चक्षुःसमस्पर्शस्कंधधात्वायतनप्रतीत्यसमुत्पादस्पृष्टिं बोधिपक्ष्यधर्म्मपारमितास्वभिज्ञासमाध्यप्रमाणध्या
नारूप्यसमापत्तिषु बलवैशारद्यप्रतिसंविदावेणिकबुद्धधर्म्मेषु यावद्बुद्धधर्म्माणां शून्यता न चान्यत्र शून्यताया बुद्धधर्म्माः नान्यत्र बुद्धधर्म्मेभ्यः शून्य
ता शून्यतैव बुद्धधर्म्मा बुद्धधर्म्मा एव शून्यता। एवमायुष्मन् शारिपुत्र बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्नुपायकुशलो वेदितव्यः। एवमायुष्म
न् शारिपुत्र बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्नुपायकुशलोऽनुत्तरां सम्यक्संबोधिं संबोधयति स पुनः प्रज्ञः प्रज्ञापारमितायां चरन् न कंचिद्धर्म्ममुपैति
न चरति प्रज्ञापारमितायां नोपैति न चानुपैति नोपैति नानुपैति न च न चरति नैवोपैति नानुपैति चरन् चरति प्रज्ञापारमितायां। शारिपुत्र आह। केन कारणेनायुष्म
न् सुभूते नोपैति बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्। सुभूतिराह। तथा ह्यायुष्मन् शारिपुत्र प्रज्ञापारमितायाः स्वभावो नोपलभ्यते। तत्कस्य हेतोः

पंचविंशति
७७

तथा ह्यायुष्मन् प्रज्ञापारमितानुशासनी शारिपुत्र पश्यो यत् बोधिसत्त्वो महासत्त्वो प्रज्ञापारमितायां चरन्नभिनिविशते न चाभिनिविशते चाभिनिवन वना
नीयं निविशते नैव चाभिनिविशते न चानभिनिविशते । तत्कस्य हेतोः तथा हि तेन सर्व्वधर्म्मा अस्वलक्षणतावादिनं(?) गृह्य त्वनुगतमनुपादाः । स यदेव प्रज्ञापारमितायां चर
न् बोधिसत्त्वो महासत्त्वः विहरत्यसंलीयमानो ऽसंलीयमानः अनुत्पादितः समुत्पादितः नासमापद्यमानो विदितव्यमायुष्मञ्छारिपुत्रासन्नोऽयं बोधिसत्त्वो महासत्त्वस्स
र्व्वज्ञानतायाः ॥ ॐ सुभूति माय [illegible] ॥ तथा हि खल्वायुष्मञ्छारिपुत्र सर्व्वाकारज्ञताया अद्वयाद्वैधीकारा सर्व्वधर्म्मा लावस्वलावनामुपादाय यत्र
यं सर्व्वधर्म्मास्वलावानुपादि नाम समाधि बोधिसत्त्वानां महासत्त्वानां विपुलः प्रवरस्फुर प्रमाणनियतो ऽसंहार्य्यः सर्व्वश्रावकप्रत्येकबुद्धैः येन समना आयुष्मञ्छारिपुत्र
समाधिना विहरन्बोधिसत्त्वो महासत्त्वः क्षिप्रमनुत्तरां सम्यक्संबोधिमभिसंबुध्यते ॥ शारिपुत्र आह ॥ कतमेनायुष्मन्सुभूते समाधिना विहरन्बोधिसत्त्वो म
हासत्त्वः क्षिप्रमनुत्तरां सम्यक्संबोधिमभिसंबुध्यते ॥ सुभूतिराह ॥ अस्त्यायुष्मञ्छारिपुत्र बोधिसत्त्वानां महासत्त्वानां शूरंगमो नाम समाधिर्येन विहरन्बोधिस
त्त्वो महासत्त्वः क्षिप्रमनुत्तरां सम्यक्संबोधिमभिसंबुध्यते । अस्ति रत्नमुद्रो नाम समाधिः । अस्ति सुचन्द्रो नाम समाधिः ॥ अस्ति चन्द्रध्वजकेतुर्नाम समाधिः । अस्ति
सर्व्वधर्म्ममुद्रो नाम समाधिः ॥ अस्ति अवलोकितमूर्द्धो नाम समाधिः ॥ अस्ति धर्म्मधातुनियतो नाम समाधिः । अस्ति नियतध्वजकेतुर्नाम समाधिः । अस्ति व
ज्रोपमो नाम समाधिः । अस्ति सर्व्वधर्म्मप्रवेशमुद्रो नाम समाधिः । अस्ति समाधिराजसुप्रतिष्ठानो नाम समाधिः । अस्ति राजमुद्रो नाम समाधिः । अस्ति बल
वीर्यो नाम समाधिः । अस्ति सर्व्वधर्म्मसमुद्गतो नाम समाधिः । अस्ति निरुक्तिनियतप्रवेशो नाम समाधिः । अस्ति अधिवचनपदप्रवेशो नाम समाधिः । अस्ति दिग्व
लोकनो नाम समाधिः । अस्ति धारणीमुद्रो नाम समाधिः । अस्ति असंप्रमोषो नाम समाधिः । अस्ति समवसरणो नाम समाधिः । अस्ति आकाशस्फरणो नाम
समाधिः । अस्ति वज्रमण्डलो नाम समाधिः ॥ अस्ति ध्वजाग्रकेयूरो नाम समाधिः । अस्ति इन्द्रकेतुर्नाम समाधिः । अस्ति स्रोतोऽनुगतो नाम समाधिः । अस्ति सिंह
विजृम्भितो नाम समाधिः । अस्ति व्यवलोकसमापन्नो नाम समाधिः । अस्ति नवेजहो नाम समाधिः । अस्ति वैलोचनो नाम समाधिः । अस्ति अनिमिषो नाम समाधि
अस्ति अनिकेतस्थितो नाम समाधिः । अस्ति निर्गवो नाम समाधिः ॥ अस्ति विमलप्रदीपो नाम समाधिः । अस्ति अनन्तप्रभो नाम समाधिः । अस्ति प्रभाकरो नाम सम
धिः । अस्ति अचलधर्म्ममुद्रो नाम समाधिः । अस्ति समन्तावभासो नाम समाधिः । अस्ति शुद्धावासो नाम समाधिः । अस्ति विमलप्रभो नाम समाधिः । अस्ति रति
करो नाम समाधिः । अस्ति विद्युत्प्रदीपो नाम समाधिः । अस्ति तेजोवती नाम समाधिः । अस्ति क्षयापगतो नाम समाधिः । अस्ति अनिर्ज्जितो नाम समाधिः । अस्ति विव
र्त्तो नाम समाधिः । अस्ति सूर्य्यप्रदीपो नाम समाधिः । अस्ति चन्द्रविमलो नाम समाधिः । अस्ति शुद्धप्रतिभासो नाम समाधिः । अस्ति आलोककरो नाम समाधिः । अ

पुनः
७७

बोधिकृताः । अनुपलम्भेन योगेन । भगवानाह ॥ एवं युज्यमानः शारिपुत्र बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां योगयुक्तः । अनुपलम्भेन योगेन शारिपुत्र आह ॥ किमिति भगव
न्नोपलभते । भगवानाह ॥ आत्मानं शारिपुत्र अत्यन्तविशुद्धितया यावत्सत्त्वजीवपोषपुरुषपुद्गलमनुजमानवकारककारापकवेदकजानकपश्यकान्नोपलभते । अत्यन्तविशुद्धि
मुपादाय । यावत्स्कन्धधात्वायतनप्रतीत्यसमुत्पादाङ्गान्नोपलभते । अत्यन्तविशुद्धिमुपादायार्य्यसत्यान्नोपलभते । अत्यन्तविशुद्धिमुपादाय ध्यानान्यप्रमाण्य
न्नोपलभते । अत्यन्तविशुद्धिमुपादाय विमोक्षान्नोपलभते । अत्यन्तविशुद्धिमुपादाय मार्गान्नोपलभते । अत्यन्तविशुद्धिमुपादाय कामधातुं नोपलभते । अत्यन्त
विशुद्धिमुपादाय रूपधातुं नोपलभते । अत्यन्तविशुद्धिमुपादायारूप्यधातुं नोपलभते । अत्यन्तविशुद्धिमुपादाय । अप्रमाणध्यानारूप्यसमापत्तीर्नोपलभते । अ
त्यन्तविशुद्धिमुपादाय स्मृत्युपस्थानसम्यक्प्रहाणर्द्धिपादेन्द्रियबलबोध्यङ्गमार्गान्नोपलभते । अत्यन्तविशुद्धिमुपादाय पारमितान्नोपलभते । अत्यन्तविशु
द्धिमुपादाय दशबलचतुर्वैशारद्याष्टादशावेणिकान्बुद्धधर्म्मान्नोपलभते । अत्यन्तविशुद्धिमुपादाय ज्ञानं नोपलभते । अत्यन्तविशुद्धिमुपादाय स्रोतआपन्नं नोपलभते । अत्यन्तविशुद्धिमुपादाय स
कृदागामिनं नोपलभते । अत्यन्तविशुद्धिमुपादायानागामिनं नोपलभते । अत्यन्तविशुद्धिमुपादायार्हन्तं नोपलभते । अत्यन्तविशुद्धिमुपादाय प्रत्येकबुद्धं नोपलभ
ते । अत्यन्तविशुद्धिमुपादाय बोधिसत्त्वं नोपलभते । अत्यन्तविशुद्धिमुपादाय बुद्धं नोपलभते । अत्यन्तविशुद्धिमुपादाय ॥ शारिपुत्र आह ॥ का पुनर्भगवन्विशुद्धिः । भग
वानाह ॥ अनुत्पादः शारिपुत्र अप्रादुर्भावो ऽनुपलम्भो ऽनभिसंस्कारो विशुद्धिर्निरुच्यते ॥ [illegible] विकल्पसंप्रयोगाभि [illegible] ॥ शारिपुत्र आह ॥ एवं योगमापद्यमानो भ
गवन्बोधिसत्त्वो महासत्त्वः कतमद्धर्म्मं योजयति ॥ भगवानाह ॥ एवं योगमापद्यमानः शारिपुत्र बोधिसत्त्वो महासत्त्वो न कंचिद्धर्म्मं योजयति । तत्कस्य हेतोः तथा हि शा
रिपुत्र धर्म्मा असंविद्यमाना यथा वाल पृथग्जना नाममात्रे अभिनिविष्टाः । शारिपुत्र आह ॥ कथं भगवन् धर्म्मा असंविद्यन्ते ॥ भगवानाह ॥ यथा न संविद्यन्ते तथा संविद्यन्ते
एवमसंविद्यमानास्तेनाख्यायन्ते अविद्येति ॥ ॐ निरुपगतविकल्पसंप्रयोगप्रथमः परिवर्त्तः ॥ ॥ शारिपुत्र आह ॥ कतमान् भगवन्नाख्यायन्ते असंविद्यमानानि
धर्म्माः ॥ भगवानाह ॥ रूपं शारिपुत्र न संविद्यते अध्यात्मशून्यतामुपादाय बहिर्द्धाशून्यतामुपादाय अध्यात्मबहिर्द्धाशून्यतामुपादाय यावदभावस्वभावशून्य
तामुपादाय । यावद्वेदनासंज्ञासंस्कारविज्ञानं शारिपुत्र न संविद्यते अध्यात्मशून्यतामुपादाय बहिर्द्धाशून्यतामुपादाय अध्यात्मबहिर्द्धाशून्यतामुपादाय । यावदभाव
स्वभावशून्यतामुपादाय । यावदष्टादशावेणिका बुद्धधर्म्मा न संविद्यन्ते अध्यात्मशून्यतामुपादाय बहिर्द्धाशून्यतामुपादाय अध्यात्मबहिर्द्धाशून्यतामुपादाय यावदभाव
स्वभावशून्यतामुपादाय । एवमविद्यमाना ये नाममात्रे अभिनिविष्टाः अविद्या विकल्पः ॥ एवं बाला अविद्यायामभिनिविष्टाः
हि निविष्टाः । तैरविद्याऽपृथ्वा च कल्पिता नाकल्पयित्वा अविद्यायामभिनिविष्टाः तावत्सर्व्वं न जानन्ति न पश्यन्ति यथा धर्म्मा न संविद्यन्ते

पंचविंशति
९८

ता धर्मा नत्स्वयेनामनुपश्यन्ति निविष्टाः। यावद्बुद्धधर्मेष्वपि निविष्टाः॥ इति गृवृत्तीयानामनुपश्यति निवगविकल्पः॥ नधर्मेष्वपि निविष्टा असंविद्यमानत्वात
नीकृत्य यत्किल्पय विज्ञानं जानन्ति न पश्यन्ति। किं न जानन्ति न पश्यन्ति। रूपं न जानन्ति न पश्यन्ति। वेदनां संज्ञां संस्कारान्। विज्ञानं न जानन्ति न पश्यन्ति। यावदस्कन्ध
तायतनप्रतीत्यसमुत्पादं न जानन्ति न पश्यन्ति। यावदष्टादशावेणिकान् बुद्धधर्मान् न जानन्ति न पश्यन्ति। ते न ते बाला इति संख्यां गच्छन्ति॥ इति गृवचतुर्थ्यं कद्वयस
कि विकल्पः॥ ते रूपविद्यात्पूर्वकृत्य मनसागन्न पश्यन्ति किं न जानन्ति न पश्यन्ति। रूपं संक्लिष्टमिति न जानन्ति न पश्यन्ति। एवं रूपेष्ववदानमिति जानन्ति न पश्यन्ति। वेद
नां संज्ञां संस्कारान् विज्ञानं संक्लिष्टमिति न जानन्ति न पश्यन्ति। एवं विज्ञानं व्यवदानमिति न जानन्ति न पश्यन्ति। ते न निर्यास्यन्ति। कुतो न निर्यास्यन्ति। कामधातोर्न निर्या
स्यन्ति। रूपधातोर्न निर्यास्यन्ति। आरूप्यधातोर्न निर्यास्यन्ति। श्रावकप्रत्येकबुद्धधर्मतो न निर्यास्यन्ति॥ ॥ इति गृवपंचमकृत्य व्यवदानाज्ञानविकल्पः॥ ते न श्र
द्दधति। किमिति न श्रद्दधति। रूपं शून्यमिति न श्रद्दधति। यावद्बोधिर्बोधिः शून्यमिति न श्रद्दधति। ते न प्रतिष्ठन्ति। किमिति न प्रतिष्ठन्ति। दानपारमितायां न प्र
तिष्ठन्ति। शीलपारमितायां न प्रतिष्ठन्ति। क्षान्तिपारमितायां न प्रतिष्ठन्ति। वीर्यपारमितायां न प्रतिष्ठन्ति। ध्यानपारमितायां न प्रतिष्ठन्ति। प्रज्ञापारमितायां न
प्रतिष्ठन्ति। अविनिवर्तनीयधर्मेन प्रतिष्ठन्ति। यावद्बुद्धधर्मेषु न प्रतिष्ठन्ति। अनेन कारणेन बाला इत्युच्यन्ते। तेऽत्र निविष्टाः। किमिति अत्र निविष्टाः। रूपवेद
नासंज्ञासंस्कारविज्ञानेषु निविष्टाः। चक्षुःश्रोत्रघ्राणजिह्वाकायमनस्सु निविष्टाः। रूपशब्दगन्धरसस्पर्शधर्मेषु निविष्टाः। दृष्टिकृतेष्वपि निविष्टाः यावद्बु
द्धधर्मेष्वपि निविष्टाः। शारिपुत्र आह। एवं ते कुमारा भगवन् बोधिसत्वा महासत्वाः प्रज्ञापारमितायां [illegible] सर्वाकारज्ञतायां निर्यास्यन्ति। भगवानाह। एवंशि
क्षमाणाः शारिपुत्र बोधिसत्वा महासत्वाः प्रज्ञापारमितायामभिकुशलाः सर्वाकारज्ञतायां निर्यास्यन्ति। शारिपुत्र आह। कथं ते भगवन् बोधिसत्वा महासत्वाः प्रज्ञा
पारमितायामकुशला न निर्यास्यन्ति सर्वाकारज्ञतायां। भगवानाह॥ इह शारिपुत्र बोधिसत्वो महासत्वः प्रज्ञापारमितायां चरन् प्रज्ञापारमितां कल्पयत्यभिनिवि
शते। ध्यानपारमितां कल्पयत्यभिनिविशते। वीर्यपारमितां कल्पयत्यभिनिविशते। क्षान्तिपारमितां कल्पयत्यभिनिविशते। शीलपारमितां कल्पयत्यभिनिविशते
ते। दानपारमितां कल्पयत्यभिनिविशते। एवमप्रमाणध्यानारूप्यसमापत्तीः कल्पयत्यभिनिविशते। स्मृत्युपस्थानसम्यक्प्रहाणर्द्धिपादेन्द्रियबलबोध्यङ्गमार्गाङ्गानि
कल्पयत्यभिनिविशते। दशबलवैशारद्यप्रतिसंविदष्टादशावेणिकान् बुद्धधर्मान् कल्पयत्यभिनिविशते। यावत्सर्वधर्मान् सर्वाकारज्ञतां कल्पयत्यभिनिवि
शते। अनेन शारिपुत्र पर्यायेण बोधिसत्वो महासत्वः प्रज्ञापारमितायामनभिकुशलः सर्वाकारज्ञतायां निर्यास्यति। शारिपुत्र आह। एवमभिकुशलो भगवन् बोधि
सत्वो महासत्वः प्रज्ञापारमितायामनभिकुशलः सर्वाकारज्ञतायां निर्यास्यति। भगवानाह। एवमभिकुशलः शारिपुत्र बोधिसत्वो महासत्वः प्रज्ञापारमितायां

गुरुः
९८

नाभिकुशलत्वेन निर्यास्यति सर्वाकारज्ञतायां॥ इति [illegible] विकल्पः॥ शारिपुत्र आह। कथं पुनर्भगवन् बोधिसत्वा महासत्वाः प्रज्ञापारमितायोग
मिकुशलाः सर्वाकारज्ञतायां निर्यास्यन्ति। भगवानाह। यदा शारिपुत्र बोधिसत्वा महासत्वाः प्रज्ञापारमितायां चरन्तः प्रज्ञापारमितां नोपलभन्ते न सम
नुपश्यन्ति। एवं खलु पुनः शारिपुत्र बोधिसत्वा महासत्वाः प्रज्ञापारमितायां चरन्तः प्रज्ञापारमितायामभिकुशलाः सर्वाकारज्ञतायां निर्यास्यन्ति। अनुपलम्भयोगेन। एवं
ध्यानपारमितां वीर्यपारमितां क्षान्तिपारमितां शीलपारमितां दानपारमितां नोपलभन्ते न समनुपश्यन्ति। यावद्बोधिं सर्वाकारज्ञतां नोपलभन्ते न समनुपश्य
एवं खलु शारिपुत्र बोधिसत्वा महासत्वाः प्रज्ञापारमितायां चरन्तः प्रज्ञापारमितायामभिकुशलाः सर्वाकारज्ञतायां निर्यास्यन्त्यनुपलम्भयोगेन॥ ॥ इति गृवसप्तम
[illegible] विकल्पः॥ शारिपुत्र आह। कस्यानुपलम्भयोगेन। भगवानाह। [illegible] शारिपुत्र नोपलभते न समनुपश्यति। [illegible] विशुद्धिमुपादाय। एवं यावत्सर्वाकार
ज्ञतां नोपलभते न समनुपश्यति। [illegible] विशुद्धिमुपादाय। ॥ इति गृव बाह्यसंज्ञाादि विकल्पः॥ [illegible] शारिपुत्र आह [illegible]
शुद्धिः॥ ॥ इति गृवनवमाविशुद्धाक्लिष्टादिविकल्पः॥ इति प्रथमा ग्राह्यविकल्पः॥ सोऽनुपायकुशलो रूपं कल्पयत्यभिनिविशते। यावद्बुद्धि
[illegible] कल्पयत्यभिनिविशते। इति [illegible] विकल्पः॥ [illegible] प्रथमा [illegible] विकल्पः॥ चक्षुः कल्पयत्यभिनिविशते। एवं यावन्मनः। रूपं कल्पयत्यभि
निविशते। एवं यावद्धर्मान्॥ इति गृव द्वितीय आयतनार्थविकल्पः॥ चक्षुरूपचक्षुर्विज्ञानधातून् कल्पयत्यभिनिविशते। एवं यावन्मनो
धर्ममनोविज्ञानधातून्॥ इति गृव तृतीय धात्वर्थविकल्पः॥ अविद्यां कल्पयत्यभिनिविशते। एवं यावज्जरामरणं। इति गृव चतुर्थप्रतीत्यसमुत्पादार्थ
विकल्पः॥ सोऽध्यात्मशून्यतां बहिर्धाशून्यतामध्यात्मबहिर्धाशून्यतां यावदभावस्वभावशून्यतां कल्पयत्यभिनिविशते। इति गृव पंचमः शून्यतार्थविकल्पः॥
पारमिताः कल्पयत्यभिनिविशते। इति गृव षष्ठ पारमितार्थविकल्पः॥ स बोधिपक्ष्यान् धर्मान् कल्पयत्यभिनिविशते। इति गृव सप्तम दर्शनमा
र्गविकल्पः॥ स ध्यानान्यप्रमाणान्यारूप्यसमापत्तीः कल्पयत्यभिनिविशते। इति गृव अष्टम भावनामार्गविकल्पः॥ स दशतथागतबलानि यावत्स
र्वाकारज्ञतां कल्पयत्यभिनिविशते। इति गृव नवमाशैक्षमार्गविकल्पः इति द्वितीयाग्राह्यविकल्पः॥ आत्मानं शारिपुत्र नोपलभते। एवं सत्वं जीवं पोषं पुरु
षं पुद्गलं मनुजं मानवं कारकं वेदकं जानकं पश्यकं नोपलभते। [illegible] अनुपलम्भयोगेन आत्मानं [illegible] नोपलभते। इति [illegible] विकल्पस्य प्रथमा
प्रथमः स्वतन्त्रात्मकविकल्पः॥ रूपं शारिपुत्र नोपलभते यावद्विज्ञानं नोपलभते। इति गृव द्वितीयस्कन्धालम्बविकल्पः॥ चक्षुः शारिपुत्र नोपलभते। ए
वं यावन्मनः॥ रूपं नोपलभते। एवं यावद्धर्मान्नोपलभते। इति गृव तृतीयायतनाश्रयविकल्पः॥ चक्षुरूपचक्षुर्विज्ञानानि शारिपुत्र नोपलभते

पं॰विंशती
७२

याव[illegible]नि[illegible]मनावि ह्यानिर्यातपतहन्ता॥ ॐ इति गतेव चतु[illegible]प्रालविकल्पः॥ [illegible]निर्यातपतहन्ता। यावदाकूपधातुर्निर्यातपतहन्ता॥ ॐ
ति गतेव वर्तनाः [illegible]यानालकविकल्पः॥ प्रथमे धार्गीनापतहन्ता। यावदानूपसमापत्तिर्निर्यातपतहन्ता॥ ॐ इति गतेव पञ्चावेनाख्याः धानालविकल्पः॥ आर्यसत्त्वाः
निर्यातपतहन्ता॥ ॐ इति गतेव सद्धमादर्गनाधानालविकल्पः॥ अष्टौ विमोक्षाननानुपूर्वविहारसमापत्तिर्निर्यातपतहन्ता॥ ॐ इति गतेवाष्टमालम्बनाधानालविकल्प
॥ दशबलानि निर्यातपतहन्ता। यावदष्टादशावेणिकान्हमा नापतहन्ता। कथं नापतहन्ता [illegible]त्वेन। नकस्य हेतोः अनालम्बनाख्यविशुद्धिमनुपादाय॥ ॐ इति गतेवनवमः
क्षमार्गधानालविकल्पः॥ ॐ इति प्रथमाधारविकल्पः॥ अथ खल्वायुष्मान् सुभूतिर्भगवन्तमेतदवोचत्॥ यान[illegible]विषम्य कि[illegible]मायोपमाः पञ्च हि
मायोपमाः [illegible]सर्वज्ञानहृतायीति [illegible]स्वतीति। स्वेवैतत्कथं निर्दिष्टः स्यात्॥ एवं ध्यानपारमितोपायी वीर्यपारमिता [illegible]न[illegible]मायी[illegible]
मिताथीदानपारमिता[illegible]सर्वज्ञानहृतायीति [illegible]स्वतीति। स्वेवैतत्। कथं निर्दिष्टः स्यात्। यावदष्टादशा[illegible]धिपञ्चधर्म [illegible]
[illegible]नहृतायी[illegible]सर्वज्ञानहृतायीति [illegible]स्यास्वति। सर्वज्ञानहृतामानीति। स्वेवैतत्कथं निर्दिष्टः स्यात्। भगवानाह। तत्किं मन्यसे [illegible]
प्रनिर्मिता[illegible]कृतमा[illegible]कृत्यां। तत्किं मन्यसे सुभूते अन्या सा माया अन्यत्तद्रूपं अन्या सा माया अन्यत्त्वं वेदनासंज्ञासंस्कारा अन्यत्तद्विज्ञानं मन्यामाया सुभूतिना
ह॥ न हि भगवन्॥ ॐ इति वधर्मोगविकल्पः। सौत्रान्तप्रथमः स्कन्धप्रकृतिविकल्पः॥ भगवानाह॥ तत्किं मन्यसे सुभूते अन्या सा माया अन्या वेदना अन्या संज्ञा अन्ये संस्कारा
[illegible] अन्या माया अन्यच्चक्षुः अन्या सा माया अन्यच्छ्रोत्रं घ्राणं जिह्वा कायः अन्या सा माया अन्यन्मनः अन्या सा माया अन्यद्रूपं अन्या सा माया अन्ये शब्दगन्धरसस्प्रष्टव्याः अन्य
मायान्ये धर्माः सुभूतिनाह॥ न हि भगवन्॥ ॐ इति गतेव द्वितीयमनप्रकृतिविकल्पः॥ भगवानाह॥ तत्किं मन्यसे सुभूते अन्या सा माया अन्यच्चक्षुर्विज्ञानं
अन्या माया अन्यच्छ्रोत्रविज्ञानं घ्राणविज्ञानं जिह्वाविज्ञानं कायविज्ञानं मनोविज्ञानं अन्या माया अन्यच्चक्षुः संस्पर्शः यावन्मनःसंस्पर्शः अन्या माया अन्यो धर्ममनोविज्ञा
नमन्या माया अन्यच्चक्षुःसंस्पर्शः अन्या माया अन्यः श्रोत्रसंस्पर्शः घ्राणसंस्पर्शः जिह्वासंस्पर्शः कायसंस्पर्शः अन्या माया अन्यो मनःसंस्पर्शः। सुभूतिनाह। न भ
गवन्। भगवानाह॥ तत्किं मन्यसे सुभूते अन्या माया अन्या चक्षुःसंस्पर्शप्रत्यया वेदयितं सुखं वा दुःखं वा अदुःखासुखं वा॥ सुभूतिनाह॥ न भग
वन्॥ भगवानाह। तत्किं मन्यसे सुभूते अन्या माया अन्यत् श्रोत्रघ्राणजिह्वाकायमनःसंस्पर्शप्रत्ययाद्वेदयितं सुखं वा दुःखं वा अदुःखासुखं वा॥ सु
भूतिनाह॥ न हि भगवन्। भगवानाह॥ तत्किं मन्यसे सुभूते अन्या माया अन्यः पृथिवीधातुः अन्या माया अन्योऽब्धातुः तेजोधातुर्वायुधातुराकाशधातुः अन्या माया अन्यो
विज्ञानधातुः। सुभूतिनाह। न हि भगवन् अन्यः पृथिवीधातुरन्या माया पृथिवीधातुरेव माया मायैव पृथिवीधातुः। न हि भगवन्नन्योऽब्धातुरेव माया मायैवाब्धातुः। न भ
गवन्नन्यस्तेजोधातुरन्या माया तेजोधातुरेव माया मायैव तेजोधातुः। न हि भगवन्नन्यो वायुधातुरन्या माया मायैव वायुधातुः॥ न हि भगवन्नन्य आकाशधातुरन्या मा

गुरु
७२

या आकाशधातुरेव माया मायैवाकाशधातुः न हि भगवन्नन्यो विज्ञानधातुरन्या माया विज्ञानधातुरेव माया मायैव विज्ञानधातुः॥ ॐ इति गतेव तृतीयो धातुप्रकृतिविक
ल्पः॥ भगवानाह॥ तत्किं मन्यसे सुभूते अन्या माया अन्यः प्रतीत्यसमुत्पादः॥ सुभूतिनाह॥ न हि भगवन्नन्याविद्याऽन्या माया अविद्यैव माया मायैवाविद्या। न भगवन्
न संस्कारा अन्या माया संस्कारा एव माया मायैव संस्कारा। न भगवन्नन्यद्विज्ञानमन्या माया विज्ञानमेव माया मायैव विज्ञानं। न भगवन्नन्यन्नामरूपमन्या माया नामरूप
मेव माया मायैव नामरूपं। न भगवन्नन्यत्षडायतनमन्या माया षडायतनमेव माया मायैव षडायतनं। भगवन्नन्यः स्पर्शोऽन्या माया स्पर्श एव माया मायैव स्पर्शः।
न भगवन्नन्या वेदनाऽन्या माया वेदनैव माया मायैव वेदना। न भगवन्नन्या तृष्णाऽन्या माया तृष्णैव माया मायैव तृष्णा। न भगवन्नन्यदुपादानमन्या मायोपादानम
ेव माया मायैवोपादानं। न भगवन्नन्यो भवोऽन्या माया भव एव माया मायैव भवः। न भगवन्नन्या जातिरन्या माया जातिरेव माया मायैव जातिः। न भगवन्नन्यज्जरा
मरणमन्या माया जरामरणमेव माया मायैव जरामरणं॥ ॐ इति गतेव चतुर्थप्रतीत्यसमुत्पादप्रकृतिविकल्पः॥ भगवानाह॥ तत्किं मन्यसे सुभूते अन्या
माया अन्ये स्मृत्युपस्थानादयः बोधिपक्ष्या धर्माः॥ सुभूतिनाह। न हि भगवन्॥ ॐ इति गतेव पञ्चमो व्यवदानप्रकृतिविकल्पः॥ भगवानाह। तत्किं मन्यसे सुभूते अन्या माया
अन्या शून्यता अन्या माया अन्यदानिमित्तं अन्या माया अन्यदप्रणिहितं। सुभूतिनाह। न हि भगवन्॥ ॐ इति गतेव षष्ठो विमोक्षमुखप्रकृतिविकल्पः॥ भगवानाह। तत्किं मन्यसे
सुभूते अन्या माया अन्यानि ध्यानान्यप्रमाणान्यारूप्यसमापत्तयः। सुभूतिनाह। न हि भगवन्। ॐ इति गतेव सप्तमो लौकिकध्यानप्रकृतिविकल्पः॥ भगवानाह। तत्किं मन्यसे
सुभूते अन्या माया अन्यानि दानादिपारमितादि[illegible]। सुभूतिनाह। न भगवन्। ॐ इति गतेवाष्टमो दर्शनमार्गप्रकृतिविकल्पः॥ भगवानाह। तत्किं मन्यसे सुभूते अन्या माया अन्यो
निःसरणमिति अन्या माया अन्ये दशबलादयः आवेणिका बुद्धधर्माः। सुभूतिनाह। न भगवन्। [illegible]नाह॥ तत्किं मन्यसे सुभूते अन्या माया अन्या बोधिः। सुभूतिनाह। भग
वन्नन्या माया अन्यद्रूपं भवति भगवन् माया मायैव भगवन् रूपं। न भगवन्नन्यो वेदनानामन्या माया अन्या संज्ञा सं
श्रोत्रघ्राणेषुनसंविद्यतेनोपलभ्यते।चक्षुःश्रोत्रघ्राणजिह्वाकायेनसंविद्यतेनोपलभ्यते।मनोमनसिनसंविद्यतेनोपलभ्यते।मनश्चक्षुःश्रोत्रघ्राणजिह्वा
कायेषुनसंविद्यतेनोपलभ्यते।रूपंरूपेनसंविद्यतेनोपलभ्यते।रूपंशब्दगन्धरसस्पर्शधर्मेषुनसंविद्यतेनोपलभ्यते।शब्दःशब्देगन्धरसस्पर्शेषुनसंविद्यतेनोप

पुरु०
१२१

लभ्यतेगन्धःशब्दरूपेषुनसंविद्यतेनोपलभ्यते।एवंगन्धागन्धेरूपशब्देषुनसंविद्यतेनोपलभ्यते।रसोरसेरूपशब्दगन्धेषुनसंविद्यतेनोपलभ्यते।स्पर्शःस्पर्शेरूपेषुनसंविद्यतेनोपल
भ्यते।धर्माधर्मेष्वपिनसंविद्यतेनोपलभ्यते।चक्षुर्विज्ञानंचक्षुर्विज्ञानेशून्यंतेषुचनसंविद्यतेनोपलभ्यते।शून्यतातीनेषुचनसंविद्यतेनोपलभ्यते।एवंश्रोत्र
विज्ञानेघ्राणविज्ञानेजिह्वाविज्ञानेकायविज्ञानेमनोविज्ञानेमनोविज्ञानेशून्यंतेषुचनसंविद्यतेनोपलभ्यते।शून्यतातीनेषुचनसंविद्यतेनोपलभ्यते।चक्षुःसं
स्पर्शेनसंविद्यतेनोपलभ्यते।शून्यतेषुचनसंविद्यतेनोपलभ्यते।तेषुचतेनसंविद्यतेनोपलभ्यते।एवंश्रोत्रसंस्पर्शोघ्राणसंस्पर्शोजिह्वासंस्पर्शःकायसंस्पर्शो
मनःसंस्पर्शोमनःसंस्पर्शेनसंविद्यतेनोपलभ्यते।शून्यतेषुनसंविद्यतेनोपलभ्यते।तेषुचतेषुनसंविद्यतेनोपलभ्यते।नचसंस्पर्शजावेदनायांचक्षुःसंस्पर्शजावेदना
योनसंविद्यतेनोपलभ्यते।तज्जातीनांशून्यतासुचतासुनसंविद्यतेनोपलभ्यते।एवंश्रोत्रसंस्पर्शजावेदनाघ्राणसंस्पर्शजावेदनाजिह्वासंस्पर्शजावेदनाकायसंस्पर्शजाव
दनामनःसंस्पर्शजावेदनामनःसंस्पर्शजायांवेदनायांनसंविद्यतेनोपलभ्यते।तज्जातीनांशून्यतासुचतासुनसंविद्यतेनोपलभ्यते।स्मृत्युपस्थानानिस्मृत्युपस्थानेषुनसंविद्
यतेनोपलभ्यते।एवंसम्यक्प्रहाणानिऋद्धिपादाःपञ्चेन्द्रियाणिपञ्चबलानिसप्तबोध्यङ्गान्यार्याष्टाङ्गोमार्गःअप्रमाणानिध्यानान्यारूप्यसमापत्तयःपञ्चाभिज्ञाः
दशतथागतबलानिचत्वारिवैशारद्यानिचतस्रःप्रतिसंविदःअष्टादशावेणिकाबुद्धधर्माअष्टादशावेणिकेषुबुद्धधर्मेषुनसंविद्यतेनोपलभ्यते।तज्जातीनां
शून्यतासुचतासुनसंविद्यतेनोपलभ्यते।अध्यात्मशून्यताअध्यात्मशून्यतायांनसंविद्यतेनोपलभ्यते।अध्यात्मशून्यतायावदभावस्वभावशून्यतायांनसंविद्यतेनो
पलभ्यते।अभावस्वभावशून्यतायावदध्यात्मशून्यतायांनसंविद्यतेनोपलभ्यते।अभावस्वभावशून्यतापियावदध्यात्मशून्यतायांनसंविद्यतेनोपलभ्यते।समा
धिसमाधौनसंविद्यतेनोपलभ्यते।समाधिर्धारणीषुनसंविद्यतेनोपलभ्यते।धारणीधारणीषुनसंविद्यतेनोपलभ्यते।धारणीसमाधौनसंविद्यतेनोपलभ्यते।एवं
नभूमिःपृथग्जनभूमौनसंविद्यतेनोपलभ्यते।एवंगोत्रभूमिरष्टमकभूमिर्दर्शनभूमिस्तनुभूमिर्वीतरागभूमिःकृताविभूमिःप्रत्येकबुद्धभूमि
बोधिसत्त्वभूमिस्तथागतभूमिःसर्वज्ञताभूमिःसर्वज्ञताभूमौनसंविद्यतेनोपलभ्यते।स्रोतआपन्नःस्रोतआपन्नेनसंविद्यतेनोपलभ्यते।एवंसकृदागाम्यनागा
म्यर्हन्प्रत्येकबुद्धःप्रत्येकबुद्धत्वेनसंविद्यतेनोपलभ्यते।बोधिसत्त्वोबोधिसत्त्वत्वेनसंविद्यतेनोपलभ्यते।तथागतस्तथागतत्वेनसंविद्यतेनोपलभ्यते।प्रज्ञापारमिता
प्रज्ञापारमितायांनसंविद्यतेनोपलभ्यते।प्रज्ञापारमितायामववादानुशासनीनसंविद्यतेनोपलभ्यते।अववादानुशासनीप्रज्ञापारमितायांनसंविद्यतेनोपलभ्यते।एवं
आयुष्मञ्छारिपुत्रसर्वधर्मानसंविद्यमानत्वेनानुपलब्धेनबोधिसत्त्वोनसंविद्यतेनोपलभ्यते॥ ॥२०॥निर्याणनिर्देशापरिवर्तोनामविंशतितमः॥सुभूतिनायुष्मा
न्शारिपुत्रएवंवदसि।कतमान्धर्माननामधेयमात्रमेतत्।यदुतबोधिसत्त्वइति।कतमान्धर्मानायुष्मान्शारिपुत्रएवंवदसि।आयुष्मान्सुभूतिरायुष्मन्तंशारिपुत्रमेतदवोचत्।नामधेयमात्रमिदंयदुतबोधि

पंचविंशति
१२२

सत्व इति॥ तथायुष्मञ्छारिपुत्र नामरूपादि [illegible] स्थिरा गच्छति न कांक्षे गच्छति न छिद्यति इति। सर्वधर्मा नाम बोधिसत्त्वानां नामाविनष्टाच्छिद्रनिद
चिन्तयति न छिद्यति इति। आगन्तुकमेतन्नामधेयं तथाहि यद्रूपं यद्वेदना यत्संज्ञा यत्संस्कारा यद्विज्ञानमिति नामधेयेन रूपेण वेदनासंज्ञासंस्कारविज्ञा
नं [illegible] तथाहि नाम [illegible] शून्यतानामकेन ज्ञानं तेनोच्यते बोधिसत्व इति नामधेयमात्रमिदं॥ पुनरपरमायुष्मञ्छारिपुत्र नामधेय
मात्रमिदं यदुत दानपारमितेति। न च दानपारमिता नाम न चान्यत्र दानपारमितायाः। तत्कस्य हेतोः। यच्च नाम या च दानपारमिता उभयमेतन्न संविद्यते नोपलभ्यते। तथा नामध
यमात्रमिदं यदुत बोधिसत्व इति। एवं नामधेयमात्रमिदं यदुत शीलपारमिता क्षान्तिपारमिता वीर्यपारमिता ध्यानपारमिता। नामधेयमात्रमिदं यदुत प्रज्ञापारमिते
ति। न च प्रज्ञापारमिता या नाम न चान्यत्र प्रज्ञापारमितायाः। तत्कस्य हेतोः। यच्च नाम या च प्रज्ञापारमिता उभयमेतन्न संविद्यते नोपलभ्यते। तत्र नामधेयमात्र
मिदं यदुत बोधिसत्व इति। आगन्तुकमेतन्नामधेयं प्रज्ञप्तिधर्मं यदुत बोधिसत्व इति। नामधेयमात्रमिदं यदुत अध्यात्मशून्यता बहिर्धाशून्यता अध्यात्मबहिर्धाशून्यता
यावदभावस्वभावशून्यता न चाध्यात्मशून्यता या नाम न चान्यत्राध्यात्मशून्यताया यावद्बहिर्धाशून्यता अध्यात्मबहिर्धाशून्यता यावदभावस्वभावशून्यता। तत्कस्य हेतोः। तथा
हि यच्च नाम या चाध्यात्मशून्यता या च बहिर्धाशून्यता या चाध्यात्मबहिर्धाशून्यता या च यावदभावस्वभावशून्यता सर्वमेतन्न संविद्यते नोपलभ्यते। एवमेव नामधेयमात्रमेतच्छा
रिपुत्र पर्याय एतन्नामधेयमात्रमिदं यदुत बोधिसत्व इति। आगन्तुकमेतन्नामधेयं प्रज्ञप्तिधर्मं यदुत स्मृत्युपस्थानानीति न च स्मृत्युपस्थानानि पुनर्नाम
न चान्यत्र स्मृत्युपस्थानानि। तत्कस्य हेतोः। तथाहि यच्च नाम यानि च स्मृत्युपस्थानानि उभयमेतन्न संविद्यते नोपलभ्यते। एवं सम्यक्प्रहाणानि ऋद्धिपादाः पंचेन्द्रिया
णि पंच बलानि सप्त बोध्यङ्गानि आर्याष्टाङ्गो मार्गः चत्वारि आर्यसत्यानि ध्यानान्यप्रमाणान्यारूप्यसमापत्तयः दश तथागतबलानि चत्वारि वैशारद्यानि चतस्रः प्रतिसंविदः अष्टादशावेणिकबु
द्धधर्माः नामधेयमात्रमिदं यदुत अष्टादशावेणिका बुद्धधर्मा इति न च बुद्धधर्मा नाम न चान्यत्र बुद्धधर्मेभ्यः। तत्कस्य हेतोः। तथाहि यच्च नाम ये च बुद्धधर्मा उभयमेतन्न
संविद्यते नोपलभ्यते। आगन्तुकमेतन्नामधेयं प्रज्ञप्तिधर्मं यदुत समाधिर्नाम यावत्सर्वज्ञता न च सर्वज्ञता या नाम न चान्यत्र सर्वज्ञतायाः। तत्कस्य हेतोः। तथाहि यच्च नाम
या च सर्वज्ञता उभयमेतन्न संविद्यते नोपलभ्यते। एवं खल्वायुष्मञ्छारिपुत्र एवं वेदितव्यं तेनोच्यते यथा आत्मा आत्मेति चोच्यते अत्यन्ततया चानभिनिर्हृत्य
न इति आत्मायुष्मञ्छारिपुत्र [illegible] न संविपश्यन्नोपलभते। कुतः पुनरायुष्मञ्छारिपुत्र रूपं न संविपश्यन्नोपलभते। कुतः पुनस्तानि निर्हरिष्यति। एवं वेदनां संज्ञां
संस्कारान् अत्यन्ततया आयुष्मञ्छारिपुत्र विज्ञानं न संविपश्यन्नोपलभते। कुतः पुनस्तानि निर्हरिष्यति। अत्यन्ततया आयुष्मञ्छारिपुत्र चक्षुर्न संविपश्यन्नोपलभते
कुतः पुनस्तानि निर्हरिष्यति। एवं श्रोत्रं घ्राणं जिह्वां कायं मनोऽत्यन्ततया न संविपश्यन्नोपलभते। कुतः पुनस्तानि निर्हरिष्यति। अत्यन्ततया
रूपं न संविपश्यन्नोपलभते। कुतः पुनस्तानि निर्हरिष्यति। एवं शब्दगन्धरसस्प्रष्टव्यानि अत्यन्ततया धर्मान्न संविपश्यन्नोपलभते। कुतः पुनर्धर्मान्

गुरु
१२२

निर्हरिष्यति। अत्यन्ततया चक्षुर्विज्ञानं न संविपश्यन्नोपलभते। कुतः पुनस्तानि निर्हरिष्यति। एवमत्यन्ततया श्रोत्रविज्ञानं घ्राणविज्ञानं जिह्वाविज्ञानं मनोवि
ज्ञानं न संविपश्यन्नोपलभते। कुतः पुनस्तानि निर्हरिष्यति। अत्यन्ततया चक्षुःसंस्पर्शं न संविपश्यन्नोपलभते। कुतः पुनस्तान्निर्हरिष्यति। एवमत्यन्त
तया श्रोत्रसंस्पर्शं घ्राणसंस्पर्शं जिह्वासंस्पर्शं कायसंस्पर्शं न संविपश्यन्नोपलभते। कुतः पुनस्तान्निर्हरिष्यति। अत्यन्ततया मनःसंस्पर्शं न संविपश्यन्नोपल
भते। कुतः पुनस्तान्निर्हरिष्यति। अत्यन्ततया चक्षुःसंस्पर्शजां वेदनां न संविपश्यन्नोपलभते। कुतः पुनस्तान्निर्हरिष्यति। अत्यन्ततया श्रोत्रसंस्
पर्शजां वेदनां घ्राणसंस्पर्शजां वेदनां जिह्वासंस्पर्शजां वेदनां कायसंस्पर्शजां वेदनां न संविपश्यन्नोपलभते। कुतः पुनस्तान्निर्हरिष्यति। अत्यन्ततया मनःसं
स्पर्शजां वेदनां न संविपश्यन्नोपलभते। कुतः पुनस्तान्निर्हरिष्यति। अत्यन्ततया दानपारमितां न संविपश्यन्नोपलभते। कुतः पुनस्तान्निर्हरिष्यति।
ष्यति। एवमत्यन्ततया शीलपारमितां क्षान्तिपारमितां वीर्यपारमितां ध्यानपारमितां न संविपश्यन्नोपलभते। कुतः पुनस्तान्निर्हरिष्यति। अत्यन्ततया
प्रज्ञापारमितां न संविपश्यन्नोपलभते। कुतः पुनस्तान्निर्हरिष्यति। अत्यन्ततया अध्यात्मशून्यतां न संविपश्यन्नोपलभते। कुतः पुनस्तान्निर्हरि
ष्यति। एवमत्यन्ततया बहिर्धाशून्यतामध्यात्मबहिर्धाशून्यतां यावदभावस्वभावशून्यतां न संविपश्यन्नोपलभते। कुतः पुनस्तान्निर्हरिष्यति। अत्य
न्ततया स्मृत्युपस्थानानि न संविपश्यन्नोपलभते। कुतः पुनस्तानि निर्हरिष्यति। एवमत्यन्ततया सम्यक्प्रहाणानि ऋद्धिपादाः पंचेन्द्रियाणि
पंच बलानि सप्त बोध्यङ्गानि आर्याष्टाङ्गमार्गं अप्रमाणध्यानान्यारूप्यसमापत्तयः दश तथागतबलानि चत्वारि वैशारद्यानि चतस्रः प्रतिसंविदः न संवि
पश्यन्नोपलभते। कुतः पुनस्तानि निर्हरिष्यति। अत्यन्ततया अष्टादशावेणिकबुद्धधर्मान्न संविपश्यन्नोपलभते। कुतः पुनस्तान्निर्हरिष्यति। अत्यन्त
तया [illegible] बोधिसत्वं तथागतमर्हन्तं सम्यक्संबुद्धं न संविपश्यन्नोपलभते। कुतः पुनस्तान्निर्हरिष्यति। अनेनायुष्मञ्छारिपुत्र पर्यायेण
आत्मा आत्मेति चोच्यते अत्यन्ततया चानभिनिर्हृत्य आत्मा। पुनरपरं यदायुष्मञ्छारिपुत्र एवमाह। अभावस्वभावाः सर्वधर्मा इति। एवमेतत्। तत्कस्य हेतोः। रू
पं ह्यायुष्मञ्छारिपुत्र नास्ति सांयोगिकः। शारिपुत्र आह। कस्यायुष्मन् सुभूते नास्ति सांयोगिकः स्वभावः। सुभूतिराह। रूपस्यायुष्मञ्छारिपुत्र नास्ति सांयोगिकः स्वभावः
वेदनायाः संज्ञायाः संस्काराणां विज्ञानस्यायुष्मञ्छारिपुत्र नास्ति सांयोगिकः स्वभावः चक्षुषो नास्ति सांयोगिकः स्वभावः। एवं श्रोत्रस्य घ्राणस्य जिह्वायाः
कायस्य मनसो नास्ति सांयोगिकः स्वभावः। एवं रूपशब्दगन्धरसस्प्रष्टव्यधर्माणां नास्ति सांयोगिकः स्वभावः चक्षुर्विज्ञानस्य श्रोत्रविज्ञानस्य घ्राणविज्ञानस्य
जिह्वाविज्ञानस्य कायविज्ञानस्य मनोविज्ञानस्य नास्ति सांयोगिकः स्वभावः। चक्षुःसंस्पर्शस्य श्रोत्रसंस्पर्शस्य घ्राणसंस्पर्शस्य जिह्वासंस्पर्शस्य कायसंस्पर्शस्य

मनःसंस्पर्शजा नालिक्षी यामिकःस्वभावश्चक्षुःसंस्पर्शजावेदनायाःश्रोत्रसंस्पर्शजावेदनाया घ्राणसंस्पर्शजावेदनाया जिह्वासंस्पर्शजावेदनायाःकायसंस्पर्शजावे
दनायाःमनःसंस्पर्शजावेदनाया नालिक्षी यामिकःस्वभावश्चक्षुःसंस्पर्शप्रत्ययवेदनायाःश्रोत्रसंस्पर्शजावेदनाया घ्राणसंस्पर्शजावेदनाया जिह्वासंस्पर्शप्रत्य
यवेदनाया कायसंस्पर्शजावेदनाया मनःसंस्पर्शप्रत्ययवेदनाया नालिक्षी यामिकःस्वभावः नालिक्षी दानपारमिता यानालिक्षी शीलपारमिता यानालिक्षी क्षान्तिपा
रमिता यानालिक्षी वीर्यपारमिता यानालिक्षी ध्यानपारमिता यानालिक्षी प्रज्ञापारमिता यानालिक्षी यामिकःस्वभावः अनेनायुष्मन्शारिपुत्र पर्यायेणास्वभावाःस
र्वधर्माः पुनरपरं आयुष्मन्शारिपुत्र अनित्याःसर्वधर्मा नकस्यचिद्विगमनं शारिपुत्राह। कतमेनायुष्मन्सुभूते अनित्याःसर्वधर्मा नकस्यचिद्विगम
नाः सुभूतिराह। रूपमायुष्मन्शारिपुत्र अनित्यं नकस्यचिद्विगमनं वेदनासंज्ञासंस्कारा विज्ञानमायुष्मन्शारिपुत्र अनित्यं नकस्यचिद्विगमनं। तत्कस्य हेतोस्तथा
युष्मन्शारिपुत्र यदनित्यं सा स्वभावः अयं चैवं इ ... नात्मानं ... निमित्तं अप्रतिहितानकस्यचिद्विगमनं सर्वधर्माः कुशलाऽनवद्या
नास्रवा निष्क्रमलौकिका लोकोत्तरा असंस्कृता। तत्कस्य हेतोस्तथा ह्यायुष्मन्शारिपुत्र यत्सर्वं तत्सास्रवमनवद्यं अनेनायुष्मन्शारिपुत्र पर्यायेणानि
स्वभावाःसर्वधर्मा नकस्यचिद्विगमनं पुनरपरं शारिपुत्र कूटस्था अविनाशिनःसर्वधर्माः शारिपुत्राह। कतमेनायुष्मन्सुभूते कूटस्था
विनाशिनःसर्वधर्माः सुभूतिराह। रूपमायुष्मन्शारिपुत्र कूटस्थमविनाशि। तत्कस्य हेतोः प्रकृतिरस्य यावद्वेदनासंज्ञासंस्कारा विज्ञानमायुष्मन्शारिपुत्र कूटस्थ
मविनाशि तत्कस्य हेतोस्तथाहि प्रकृतिरस्य यावद्वै कुशलमकुशलं सावद्यमनवद्यं सास्रवं अनास्रवं लौकिकं लोकोत्तरं संस्कृतं संक्लेशव्यवदानं संसारनि
र्वाणं कूटस्थमविनाशि तत्कस्य हेतोः प्रकृतिरस्यैषा अनेनायुष्मन्शारिपुत्र पर्यायेण कूटस्था अविनाशिनःसर्वधर्माः यत्पुनरायुष्मन्शारिपुत्रैवमाह। केनकार
णेन रूपं न तिष्ठति यावद्वेदनासंज्ञासंस्कारा विज्ञानं न तिष्ठति संस्कृतमिति सुभूतिराह। तथाह्यायुष्मन्शारिपुत्र रूपमनभिनिर्वृत्तं वेदनासंज्ञा
संस्कारा विज्ञानमनभिनिर्वृत्तं तत्कस्य हेतोस्तथाह्यायुष्मन्शारिपुत्र अभिसंस्कर्त्ता नास्ति चक्षुरायुष्मन्शारिपुत्र अनभिसंस्कृतं तत्कस्य हेतोस्तथाह्यायुष्मन्शारि
पुत्राभिसंस्कर्त्ता नास्ति एवं श्रोत्रघ्राणजिह्वाकायमनोऽनभिसंस्कृतं तत्कस्य हेतोस्तथाहि आयुष्मन्शारिपुत्राभिसंस्कर्त्ता नास्ति पुनरपरं शारिपुत्र रूपगन्ध
रसस्पर्शधर्मा अनभिसंस्कृतास्तत्कस्य हेतोस्तथाह्यभिसंस्कर्त्ता नोपलभ्यते यावत्सर्वधर्मा अनभिसंस्कृतास्तत्कस्य हेतोस्तथाह्यभिसंस्कर्त्ता नोपलभ्यते

अनेनायुष्मन्शारिपुत्र पर्यायेण रूपवेदनासंज्ञासंस्कारविज्ञानानि न तिष्ठन्ति संस्कृतानि यत्पुनरायुष्मन्शारिपुत्र एवं वदसि केन कारणेन यदपि निर्वृत्तं न तद्रूपं न वे
दना न संज्ञा न संस्कारा न विज्ञानमिति सुभूतिराह। आयुष्मन्शारिपुत्र रूपं प्रकृतिशून्यं यच्च प्रकृतिशून्यं न तस्योत्पादो न व्ययो यत्र च नोत्पादो न व्ययो न तद
न्यथात्वं प्रज्ञायते वेदनासंज्ञासंस्कारा विज्ञानं प्रकृतिशून्यं यच्च प्रकृतिशून्यं न तस्योत्पादो न व्ययः यत्र च नोत्पादो न व्ययो न तस्यान्यथात्वं प्रज्ञायते एवं यावत्स
र्वधर्माः प्रकृतिशून्या यच्च प्रकृतिशून्यं न तस्योत्पादो न व्ययो यत्र नोत्पादो न व्ययो न तस्यान्यथात्वं प्रज्ञायते। अनेनायुष्मन्शारिपुत्र पर्यायेण तद्यदपि निर्वृत्तं न त
द्रूपं न वेदना न संज्ञा न संस्कारा न विज्ञानं। यत्पुनरायुष्मन्शारिपुत्रैवमाह। केन कारणेन एवं वदसि किं नाम निर्वृत्ते मनसि निर्वृत्ते प्रज्ञापारमितायामववदि
ष्यामि नानुशासिष्यामीति यथायुष्मन्शारिपुत्र या अनभिनिर्वृत्तिः सा प्रज्ञापारमिता या प्रज्ञापारमिता सा अनभिनिर्वृत्तिः। अनभिनिर्वृत्तिश्च प्रज्ञापारमिता चानभिनिर्वृत्तिश्च
द्वयमेतदद्वैधीकारं। अनेनायुष्मन्शारिपुत्र पर्यायेणैवं वदसि। किं मनसि निर्वृत्ते मनसि निर्वृत्ते प्रज्ञापारमितायामववदिष्यामि नानुशासिष्यामीति यत्पुनरायुष्मं
शारिपुत्रैवमाह। न चान्यदनिर्वृत्तेर्बोधिसत्त्वो बोधिसत्त्वोपलभ्यते यावद्बोधाय चरति तथायुष्मन्शारिपुत्र बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्नान्यम
नभिनिर्वृत्तेर्बोधिसत्त्वं समनुपश्यति। अनभिनिर्वृत्तिश्च बोधिसत्त्वश्चाद्वयमेतदद्वैधीकारं नान्यदनभिनिर्वृत्ते रूपं समनुपश्यति नान्यदनभिनिर्वृत्तेर्वेदनासं
ज्ञासंस्कारान् समनुपश्यति। नान्यदनभिनिर्वृत्तेर्विज्ञानं समनुपश्यति। अनभिनिर्वृत्तिश्च रूपं चाद्वयमेतदद्वैधीकारं। अनभिनिर्वृत्तिश्च वेदनासंज्ञासंस्का
रा चाद्वयमेतदद्वैधीकारं। अनभिनिर्वृत्तिश्च रूपं चाद्वयमेतदद्वैधीकारं। अनभिनिर्वृत्तिश्च वेदनासंज्ञासंस्काराश्चाद्वयमेतदद्वैधीकारं। अनभिनिर्वृ
त्तिश्च विज्ञानं चाद्वयमेतदद्वैधीकारं। अनभिनिर्वृत्तिश्च चक्षुश्चाद्वयमेतदद्वैधीकारं। अनभिनिर्वृत्तिश्च श्रोत्रघ्राणजिह्वाकायश्चाद्वय
मेतदद्वैधीकारं। अनभिनिर्वृत्तिश्च मनश्चाद्वयमेतदद्वैधीकारं। अनभिनिर्वृत्तिश्च रूपशब्दगन्धरसस्पर्शधर्माश्चाद्वयमेतदद्वैधीकारं। अनभिनिर्वृत्ति
श्च चक्षुर्विज्ञानं चाद्वयमेतदद्वैधीकारं। अनभिनिर्वृत्तिश्च श्रोत्रविज्ञानं घ्राणविज्ञानं जिह्वाविज्ञानं कायविज्ञानं चाद्वयमेतदद्वैधीकारं। अनभिनिर्वृत्तिश्च
मनोविज्ञानं चाद्वयमेतदद्वैधीकारं। अनभिनिर्वृत्तिश्च चक्षुःसंस्पर्शश्चाद्वयमेतदद्वैधीकारं। अनभिनिर्वृत्तिश्च श्रोत्रघ्राणजिह्वाकायसं
स्पर्शश्चाद्वयमेतदद्वैधीकारं। अनभिनिर्वृत्तिश्च मनःसंस्पर्शश्चाद्वयमेतदद्वैधीकारं। अनभिनिर्वृत्तिश्च चक्षुःश्रोत्रघ्राणजिह्वाकायमनःसंस्प
र्शप्रत्ययवेदनाश्चाद्वयमेतदद्वैधीकारं। अनभिनिर्वृत्तिश्च स्मृत्युपस्थानसम्यक्प्रहाणर्द्धिपादेन्द्रियबलबोध्यङ्गमार्गाश्चाद्वयमेतदद्वैधीकारं। अनभिनिर्वृत्ति

पंचविंशति

हिनिर्हृतिश्चाप्रमाणध्यानारूप्यसमापत्तयश्चाद्वयमद्वैधीकारा। तिहीनारहिनिर्हृतिर्दानपारमिता शीलपारमिता क्षान्तिपारमिता वीर्यपारमिता:
ध्यानपारमिता प्रज्ञापारमिता चाद्वयमद्वैधीकारा। तिहीनारहिनिर्हृतिश्च दशबलवैशारद्यावेणिकबुद्धधर्मा अद्वयमद्वैधीका-
रा। यावद्रीतिहीनारहिनिर्हृतिश्च सर्वबुद्धधर्मा अद्वयमद्वैधीकारा। अनेनापि पर्यायेण निपुणा पर्येषा यत्तनान्यहीनारहिनिर्हृतिर्बोधिसत्त्वउपलत्तया
धाय चनहाय यथानानापर्यायेण निपुणाज्जवमाह। कतमत्कारणं नेवं वदसि स च बोधिसत्त्वो महासत्त्वस्त एवमुपदिश्यमाने चित्तं नावलीयते न
संलीयते न विप्रतिसारी एवमिति मानसं न समुत्त्रस्यति न संत्रासमापद्यते चरति बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायामिति। अथायुष्मान्निपुणबोधिसत्त्वाम
हासत्त्वः सर्वधर्मान्निरीहान्समनुपश्यति मायोपमान्स्वप्नोपमान्मरीच्युपमान्प्रतिश्रुत्कोपमान्प्रतिबिम्बोपमान्प्रतिभासोपमान्निर्मितकोपमान्गन्धर्वनगरोपमान्समनु-
पश्यति अनेनापि पर्यायेण निपुणं पर्येषा यद्बोधिसत्त्वस्य महासत्त्वस्यैवमुपदिश्यमाने चित्तं नावलीयते न संलीयते न विप्रतिसारी एवमिति मानसं नानुत्त्रस्यति न संत्रास-
मापद्यते न संत्रासमापत्स्यते चरति बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायाम्। अथ खल्वायुष्मान्सुभूतिर्भगवन्तमेतदवोचत्। यस्मिन्समये भगवन्बोधिसत्त्वो महासत्त्वः प्रज्ञापा-
रमितायां चरति न तस्मिन्समये रूपं नोपैति नोपादत्ते नाधितिष्ठति नाभिनिविशति न प्रज्ञपयति रूपमिदमिति। यस्मिन्समये भगवन्बोधिस-
त्त्वो महासत्त्वः प्रज्ञापारमितायां चरति इमान्धर्मानुपपरीक्षते। तस्मिन्समये वेदनां संज्ञां संस्कारान्विज्ञानं नोपैति नोपादत्ते नाधितिष्ठति नाभिनिविशति न प्रज्ञ-
पयति विज्ञानमिदमिति। तस्मिन्समये चक्षुर्नोपैति नोपादत्ते नाधितिष्ठति नाभिनिविशति न प्रज्ञपयति चक्षुरिदमिति। एवं श्रोत्रं घ्राणं जिह्वां कायं मनो नोपैति
नोपादत्ते नाधितिष्ठति नाभिनिविशति न प्रज्ञपयति मन इदमिति। पुनरपरं भगवन्यस्मिन्समये बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरति इमान्धर्मा-
नुपपरीक्षते तस्मिन्समये दानपारमितां नोपैति नोपादत्ते नाधितिष्ठति नाभिनिविशति न प्रज्ञपयति दानपारमितेयमिति। एवं शीलपारमितां क्षा-
न्तिपारमितां वीर्यपारमितां ध्यानपारमितां प्रज्ञापारमितां तस्मिन्समये प्रज्ञापारमितां नोपैति नोपादत्ते नाधितिष्ठति नाभिनिविशति न प्रज्ञपय-
ति प्रज्ञापारमितेयमिति। तस्मिन्समये अध्यात्मशून्यतां नोपैति नोपादत्ते नाधितिष्ठति नाभिनिविशति न प्रज्ञपयति अध्यात्मशून्यतेयमिति। तस्मि-
न्समये बहिर्धाशून्यतामध्यात्मबहिर्धाशून्यतां यावदभावस्वभावशून्यतां नोपैति नोपादत्ते नाधितिष्ठति नाभिनिविशति न प्रज्ञपयति यावदभावस्वभावशून्यतेय-
मिति। पुनरपरं भगवन्यस्मिन्समये बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरति इमान्धर्मानुपपरीक्षते तस्मिन्समये स्मृत्युपस्थानानि नोपैति नोपा-
दत्ते नाधितिष्ठति नाभिनिविशति न प्रज्ञपयति स्मृत्युपस्थानानीमानीति। तस्मिन्समये सम्यक्प्रहाणान्यृद्धिपादानीन्द्रियाणि बलानि बोध्यङ्गान्यार्याष्टाङ्गमार्गं

१२५

नोपैति नोपादत्ते नाधितिष्ठति नाभिनिविशति न प्रज्ञपयति समाधिक्षान्तीमूलानीमानीति। तत्कस्य हेतोस्तथा हि भगवन्बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् रूपेन
तं न समनुपश्यति यावद्बुद्धक्षेत्रसमलङ्कारं न स्कन्धधात्वायतनानि प्रतीत्यसमुत्पादं न समनुपश्यति। न सप्तत्रिंशद्बोधिपक्ष्यान्धर्मान्न समनुपश्यति पारमिता न समनुपश्यति अप्रमाण-
ध्यानारूप्यसमापत्तीर्दशबलवैशारद्यप्रतिसंविदष्टादशावेणिकबुद्धधर्मान्यावत्सर्वाकारज्ञतां न समनुपश्यति। तत्कस्य हेतोस्तथा हि भगवन्रूपस्यानुत्पादो न रू-
पं यावत्संज्ञायाः संस्काराणां विज्ञानस्यानुत्पादो न विज्ञानमिति हि विज्ञानं चानुत्पादश्चाद्वयमद्वैधीकारं। यावद्भगवंश्चक्षुषोऽनुत्पादो न चक्षुः
श्रोत्रस्य घ्राणस्य जिह्वायाः कायस्य मनसोऽनुत्पादो न मन इति हि मनश्चानुत्पादश्चाद्वयमद्वैधीकारं। यावद्भगवन्दानपारमितायामनुत्पादो न दानपारमि-
ता यः शीलपारमितायाः क्षान्तिपारमितायाः वीर्यपारमितायाः ध्यानपारमितायाः प्रज्ञापारमितायाः अनुत्पादो न सा प्रज्ञापारमिता। इति हि प्रज्ञापारमि-
ता चानुत्पादश्चाद्वयमद्वैधीकारं। यावद्भगवन्नध्यात्मशून्यताया अनुत्पादो न साध्यात्मशून्यता। या बहिर्धाशून्यताया अनुत्पादो न सा बहिर्धाशून्यता।
याध्यात्मबहिर्धाशून्यताया अनुत्पादो न साध्यात्मबहिर्धाशून्यता। यावदभावस्वभावशून्यताया अनुत्पादो न साभावस्वभावशून्यता। इति ह्यभावस्व-
भावशून्यता चानुत्पादश्चाद्वयमद्वैधीकारं। यावद्भगवन्स्मृत्युपस्थानानामनुत्पादो न तानि स्मृत्युपस्थानानि। एवं सम्यक्प्रहाणर्द्धिपादेन्द्रियबलबोध्यङ्गमा-
र्गाः अप्रमाणध्यानारूप्यसमापत्तयो दशबलवैशारद्यप्रतिसंविदो यावद्भगवन्नष्टादशानामावेणिकानां बुद्धधर्माणामनुत्पादो न तेऽष्टादशावेणिका बुद्धधर्मा
इति हि बुद्धधर्माश्चानुत्पादश्चाद्वयमद्वैधीकारं॥ यावद्भगवन्धर्मधातोरनुत्पादः स धर्मधातुः। यस्तथताया आकाशधातुभूतकोट्यचिन्त्यधातोः
र्यावत्सर्वाकारज्ञताया अनुत्पादो न सा सर्वाकारज्ञता इति हि सर्वाकारज्ञता चानुत्पादश्चाद्वयमद्वैधीकारं। तत्कस्य हेतोस्तथा ह्यनुत्पादो नैकत्वेन न नानात्वेन पृथक्-
त्वायः सर्वाकारज्ञताया अनुत्पादो न सा सर्वाकारज्ञतया। यावद्भगवन्रूपस्य व्ययो न तद्रूपं यावद्वेदनायाः संज्ञायाः संस्काराणां विज्ञानस्य व्ययो न तद्विज्ञानं
इति हि विज्ञानं च व्ययश्चाद्वयमद्वैधीकारं। तत्कस्य हेतोस्तथा हि व्ययो नैकत्वेन न नानात्वेन पृथक्त्वायः पंचानां स्कन्धानां व्ययो न ते पंच स्कन्धाः। यावद्भगवन्दान-
पारमिताया व्ययो न सा दानपारमिता। एवं यः शीलपारमितायाः क्षान्तिपारमितायाः वीर्यपारमितायाः ध्यानपारमितायाः प्रज्ञापारमितायाः व्ययो न सा प्रज्ञापार-
मिता। इति हि प्रज्ञापारमिता च व्ययश्चाद्वयमद्वैधीकारं। तत्कस्य हेतोस्तथा हि व्ययो नैकत्वेन न नानात्वेन पृथक्त्वायः पारमितानां व्ययो न ताः पारमिता यावत्
गवन्नध्यात्मशून्यताया व्ययो न साध्यात्मशून्यता। इति ह्यध्यात्मशून्यता च व्ययश्चाद्वयमद्वैधीकारं। तत्कस्य हेतोस्तथा हि व्ययो नैकत्वेन न नानात्वेन पृ-
थक्त्वायः अध्यात्मशून्यताया व्ययो न साध्यात्मशून्यता। एवं या बहिर्धाशून्यताया व्ययो न सा बहिर्धाशून्यता। याध्यात्मबहिर्धाशून्यताया व्ययो न साध्यात्मबहि-
र्धाशून्यता यावदभावस्वभावशून्यताया व्ययो न साभावस्वभावशून्यता। इति ह्यभावस्वभावशून्यता च व्ययश्चाद्वयमद्वैधीकारं। तत्कस्य हेतोस्त-

हि व्ययानेकानद्वेन बहवानपृथक्जनासाया लक्षणस्वलक्षणशून्यतायाव्ययानसान्त्रलक्षणस्वलक्षणशून्यतायानसात्रलक्षणस्वलक्षणशून्यता पारुगवन्त्स्वरूपे स्थानानीय्य यानतानि स्व
रूपस्थानानि । इति हि स्वरूपस्थानानिय्यय आद्ययमादहे धीकानीनकस्वाहास्कथ्य हि व्ययानेकानद्वेन बहवानपृथक्जनासायः स्वरूपस्थानानीय्य यानतानि स्वरूपस्था
नानि ॥ एवं यः स्मृत्युपस्थानानि सम्यक्प्रहाणानि ऋद्धिपादानीन्द्रियाणि बलानि बोध्यङ्गानीय आर्य्याष्टाङ्गस्य मार्गस्य व्ययानसामार्गः इति हि मार्गस्य व्ययः आद्ययमादहे धीकानीनकस्व
स्वहास्कथ्य हि व्ययानेकानद्वेन बहवानपृथक्जनासायामार्गस्य व्ययानमार्गः ॥ एवं याः शून्यताध्यानान्यप्रमाणसमापत्तीनामभिज्ञानां प्रतिसंविदो वैशारद्य यानीं दशानां तथागतब
लानीयाः अष्टादशानामावेणिकानां बुद्धधर्माणां व्ययानं बुद्धधर्माणीव्ययानं बुद्धधर्मा इति हि बुद्धधर्मा अव्ययः आद्ययमादहे धीकानीनकस्वहास्कथ्य हि व्ययाः
नेकानद्वेन बहवानपृथक्जनासायाबुद्धधर्माणीव्ययानं बुद्धधर्मा ॥ पुनरपरं भगवन्नुच्यते रूपमिति द्वयस्यैषागमनताकृता वेदना संज्ञा संस्कारा यसूत्नरच्यात
विज्ञानमिति द्वयस्यैषागमनताकृता यावत्सर्वज्ञतानूच्यात्नूप यावत्सर्वाकारज्ञतेति द्वयस्यैषागमनताकृता । इति प्राप्तिनिर्याणात्प्राप्यप्रायकस्य च प्रतिवध्यस्त्रुधस्वल्पायूष्मा
नानिपुत्रस्त्रायूष्मन्त सुभूतिमेतदवोचत् । कथमायुष्मन्सुभूते बोधिसत्वो महासत्वः प्रज्ञापारमितायां चरन्निमान्धर्म्मानुपपरीक्षते कथमायुष्मन्सुभूतिर्बोधिसत्वस्त
नामप्रज्ञापारमिताकर्म्माउपपरीक्षमाण सुभूतिराह ॥ यदायुष्मन्शारिपुत्र एवम्बदसि कामाबोधिसत्वो बोधिसत्व इति यावद्बोधिसत्वः इति न यावदध्या
सर्वधर्म्मानामानाज्ञानानि न चाज्ञानानि विविनक्ति कामयावद्धर्मानामानानाज्ञानानि । रूपस्याज्ञानानाज्ञानानि न चाज्ञानानि विविनक्ति वेदनायाः संज्ञायाः संस्कारा विज्ञानस्याज्ञानाज्ञा
नानि न चाज्ञानानि विविनक्ति तदस्य सर्वस्मात्सर्वप्रभाला यानानीप्रतीत्य समुत्पादस्येसत्कृतिपद्माधिपज्ञानाधर्माणीनाज्ञानानि न चाज्ञानानि विविनक्ति एवमप्रमात्तधाना
प्युपसमापत्तीनां पारमितानां बलानां वैशारद्यानां प्रतिसंविदां आवेणिकानामाजानानाज्ञानानि न चाज्ञानानि विविनक्ति । शारिपुत्र आह । कतमत् सुभूते सर्वधर्म्माणामाज्ञाना
सुभूतिराह ॥ यदायुष्मन्शारिपुत्र यथाज्ञानेये लिङ्गे येनिमित्तेरूपशब्दगन्धरसस्पर्शधर्माणामाध्यात्मिका वाह्या वा धर्माः संस्कृता वा असंस्कृता वा अनवकाश्यं तत् । एवं च
मायुष्मन्शारिपुत्र धर्म्माणामाज्ञाना । यदायुष्मन्शारिपुत्र एवम्बदसि कतमी प्रज्ञापारमितेति ज्ञानतोऽज्ञानमिति यायुष्मन्शारिपुत्र अवचारः प्रज्ञापारमिता
ति । ह्ययमज्ञानतोऽज्ञानमिति स्कन्धधातुवायतनेभ्यः प्रतीत्यसमुत्पादात्दानपारमितायाः शीलपारमितायाः क्षान्तिपारमितायाः ध्यानपारमितायाः प्रज्ञापारमि
तायाः अज्ञानतोऽज्ञानमिति अध्यात्मशून्यताया वहिर्द्धाशून्यताया अध्यात्मवहिर्द्धाशून्यताया यावदभावस्वभावशून्यताया अज्ञानतोऽज्ञानमिता स्मृत्युपस्थानेभ्यो अज्ञानतो
ऽज्ञानमिता सम्यक्प्रहाणऋद्धिपादेन्द्रियबलबोध्यङ्गमार्गेभ्यो अज्ञानतोऽज्ञानमितान्यप्रमाणध्यानारूप्यसमापत्तिभ्यो अज्ञानतोऽज्ञानमिता बलवैशारद्येभ्यो यावदज्ञानतोऽज्ञानमि
ताप्रतिसंविदावेणिकेभ्यो बुद्धधर्मेभ्यो अज्ञानतोऽज्ञानमिता यावत्सर्वज्ञतायाअज्ञानतोऽज्ञानमिता एषा कतमी प्रज्ञापारमितेति । पुनरपरमायुष्मन्शारिपुत्र यथाय
दज्ञानतोऽज्ञानमिता एषोच्यते प्रज्ञापारमिता । यदायुष्मन्शारिपुत्र एवम्बदसि कतमाउपपरीक्षतेति इहायुष्मन्शारिपुत्र बोधिसत्वो महासत्वः प्रज्ञा

पारमितायां चरन्रूपेण नित्यतः रूपमुपपरीक्षते नानित्यमिति न सुखमिति न दुःखमिति नात्मेति नानात्मेति न शान्तमिति नाशान्तमिति न शून्यमिति नाशून्यमिति न निमि
त्तमिति नानिमित्तमिति न प्रणिहितमिति नाप्रणिहितमिति उपपरीक्षते न विविक्तमिति नाविविक्तमिति उपपरीक्षते न वेदनां न संज्ञां न संस्कारान्विज्ञानं नित्यमित्युपपरी
क्षते नानित्यमिति न सुखमिति न दुःखमिति नात्मेति नानात्मेति न शान्तमिति नाशान्तमिति न शून्यमिति नाशून्यमिति न निमित्तमिति नानिमित्तमिति न प्रणिहितमिति
नाप्रणिहितमित्युपपरीक्षते न विविक्तमिति नाविविक्तमित्युपपरीक्षते । एवं चक्षुः श्रोत्रं घ्राणं जिह्वां कायं मनो न नित्यमित्युपपरीक्षते नानित्यमिति न सुखमि
ति न दुःखमिति नात्मेति नानात्मेति न शान्तमिति नाशान्तमिति न शून्यमिति नाशून्यमिति न निमित्तमिति नानिमित्तमिति न प्रणिहितमिति नाप्रणिहितमित्यु
पपरीक्षते न विविक्तमिति नाविविक्तमित्युपपरीक्षते । एवं रूपशब्दगन्धरसस्पर्शधर्म्मान्न नित्या इति नानित्या इति न सुखा इति न दुःखा इति नात्मान इति नाना
त्मान इति न शान्ता इति नाशान्ता इति न शून्या इति नाशून्या इति न निमित्ता इति नानिमित्ता इति न प्रणिहिता इति नाप्रणिहिता इत्युपपरीक्षते न विविक्ता
इति नाविविक्ता इत्युपपरीक्षते । एवं चक्षुर्विज्ञानं श्रोत्रविज्ञानं घ्राणविज्ञानं जिह्वाविज्ञानं कायविज्ञानं मनोविज्ञानं न नित्यं नानित्यमित्युपपरीक्षते न सुख
मिति न दुःखमिति नात्मेति नानात्मेति न शान्तमिति नाशान्तमिति न शून्यमिति नाशून्यमिति न निमित्तमिति नानिमित्तमिति न प्रणिहितमिति नाप्रणिहितमि
त्युपपरीक्षते न विविक्तमिति नाविविक्तमित्युपपरीक्षते । एवं चक्षुःसंस्पर्शं श्रोत्रसंस्पर्शं घ्राणसंस्पर्शं जिह्वासंस्पर्शं कायसंस्पर्शं मनःसंस्पर्शं न नित्य इति नानित्य इति न
इत्युपपरीक्षते न सुख इति न दुःख इति नात्मेति नानात्मेति न शान्त इति नाशान्त इति न शून्य इति नाशून्य इति न निमित्त इति नानिमित्त इति न प्रणिहित इति
नाप्रणिहित इत्युपपरीक्षते न विविक्त इति नाविविक्त इत्युपपरीक्षते । एवं चक्षुःसंस्पर्शप्रत्ययवेदनां श्रोत्रसंस्पर्शप्रत्ययवेदनां घ्राणसंस्पर्शप्रत्ययवी
वेदनां जिह्वासंस्पर्शप्रत्ययवेदनां कायसंस्पर्शप्रत्ययवेदनां मनःसंस्पर्शप्रत्ययवेदनां न नित्येति नानित्येत्युपपरीक्षते न सुखेति न दुःखेति न आत्मा
इति नानात्मा इति न शान्ता इति नाशान्ता इति न शून्या इति नाशून्या इति न निमित्ता इति नानिमित्ता इति न प्रणिहिता इति नाप्रणिहिता इत्युपपरीक्षते न विवि
क्ता इति नाविविक्ता इत्युपपरीक्षते । एवं दानपारमितां शीलपारमितां क्षान्तिपारमितां वीर्यपारमितां ध्यानपारमितां प्रज्ञापारमितां न नित्येति नानित्येति
उपपरीक्षते न सुखेति न दुःखेति नात्मेति नानात्मेति न शान्तेति नाशान्तेति न शून्येति नाशून्येति न निमित्तेति नानिमित्तेति न प्रणिहितेति नाप्र
णिहितेत्युपपरीक्षते न विविक्तेति नाविविक्तेत्युपपरीक्षते । एवमध्यात्मशून्यतां वहिर्द्धाशून्यतामध्यात्मवहिर्द्धाशून्यतां यावदभावस्वभावशून्यतां
न नित्येति नानित्येत्युपपरीक्षते न सुखेति न दुःखे [illegible] त्मेति नानात्मेति न शान्तेति नाशान्तेति न शून्येति नाशून्येति न निमित्तेति नानिमित्तेति न प्रणिहितेति नाप्रणिहितेति

नित्यमिति हि नामिति उपपरीक्षते न विविक्तमिति नाविविक्तमिति उपपरीक्षते । एवं खलु रूपस्थानानि न नित्यानीति नानित्यानीति न रूपपरीक्षते न सुखानीति न दुःखानीति नात्मानीति ना
त्मानीति न शान्तानीति नाशान्तानीति न शून्यानीति नाशून्यानीति न निमित्तानीति नानिमित्तानीति न प्रणिहितानीति नाप्रणिहितानीति उपपरीक्षते न विविक्तानीति नाविवि
क्तानीत्युपपरीक्षते । एवं सम्यक्प्रहाणानि ऋद्धिपादानिन्द्रियाणि बलानि बोध्यङ्गानि मार्गं अप्रमाणध्यानारूप्यसमापत्तीः दश तथागतबलानि
वैशारद्यानि प्रतिसंविदः दशावेणिकबुद्धधर्मान् समाधयः सर्वधारणीमुखानि सर्वज्ञतां न नित्यमिति नानित्यमिति उपपरीक्षते न सुखमिति न दुःखमिति नात्मेति नाना
त्मेति न शान्तमिति नाशान्तमिति न शून्यमिति नाशून्यमिति न निमित्तमिति नानिमित्तमिति न प्रणिहितमिति नाप्रणिहितमिति उपपरीक्षते न विविक्तमिति नाविविक्तमिति रूपपरी
क्षते । एवं आयुष्मान् शारिपुत्र बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्नभिमान्यमानोऽनुपपरीक्षते । शारिपुत्र आह ॥ कतरेणायुष्मन् सुभूते एवं वदसि यानुपला
दानताद्रूपं वेदनासंज्ञासंस्कारा विज्ञानं नानुत्पादान्न द्विहानी । एवं यावत्समस्तरूपस्कन्धधात्वायतनप्रतीत्यसमुत्पादपारमितास्सर्वेऽनु
न्यतास्तथा सर्वधर्माः पूर्ववत्प्रमाणध्यानारूप्यसमापत्तीः दशबलवैशारद्यप्रतिसंविदः समाधिधारणीमुखान्यष्टादशावेणिकबुद्धधर्माः
यः सर्वाकारज्ञता यावत्सर्वाकारज्ञता सर्वाकारज्ञतेति नाह । रूपमायुष्मन् शारिपुत्र शून्यं रूपता या चायुष्मन् शारिपुत्र शून्यता न तद्रूपं नीत्यादीन्ननायुष्मन्
शारिपुत्र पर्यायेत यानुत्पादानुत्पादान्न रूपं वेदनासंज्ञासंस्कारा विज्ञानं शून्यं विज्ञानं न याचायुष्मन् शारिपुत्र शून्यता न तद्विहानी नीत्यादीन्ननायुष्मन् शारिपुत्र पर्या
येत या विज्ञानस्यानुत्पादान्न द्विहानी । दानपारमितायुष्मन् शारिपुत्र दानपारमिता या शून्या यान सा दानपारमिता नीत्यादीन्ननायुष्मन् शारिपुत्र पर्यायेत
आदानपारमिता यानुत्पादान् सा दानपारमिता । एवं शीलपारमिता क्षान्तिपारमिता वीर्यपारमिता ध्यानपारमिता प्रज्ञापारमिता प्रज्ञापारमिता या शून्या या च शू
न्यता न सा प्रज्ञापारमिता नीत्यादीन्ननायुष्मन् शारिपुत्र पर्यायेत यः प्रज्ञापारमिता यानुत्पादान् सा प्रज्ञापारमिता अध्यात्मशून्यता अध्यात्मशून्यता या शून्या याः
च शून्यता न सा अध्यात्मशून्यता नीत्यादीन्ननायुष्मन् शारिपुत्र पर्यायेत यः अध्यात्मशून्यता यानुत्पादान्न सा अध्यात्मशून्यता । एवं बहिर्धाशून्यता बहिर्धाः
शून्यता या शून्या याध्यात्मबहिर्धाशून्यता यावदभावस्वभावशून्यताभावस्वभावशून्यता याच शून्यता [illegible] भाव
शून्यता नीत्यादीन्ननायुष्मन् शारिपुत्र पर्यायेत यः अभावस्वभावशून्यता यानुत्पादान्न साभावस्वभावशून्यता स्मृत्युपस्थानान्यायुष्मन् शारिपुत्र स्मृत्युपस्था
नान्यायुष्मन् शारिपुत्र स्मृत्युपस्थानानि यानि या च शून्यता न तानि स्मृत्युपस्थानानि नीत्यादीन्ननायुष्मन् शारिपुत्र पर्यायेत यः स्मृत्युपस्थानानामनुत्पादान्न ता

नि स्मृत्युपस्थानानि । एवं सम्यक्प्रहाणान्यृद्धिपादेन्द्रियबलबोध्यङ्गमार्गमार्याष्टाङ्गाप्रमाणध्यानारूप्यसमापत्तयो दशबलवैशारद्यप्रतिसंविदः समाधिधारणीमुखान्यष्टादशावेणि
कबुद्धधर्माः सर्वाकारज्ञतायुष्मन् शारिपुत्र सर्वाकारज्ञता या शून्या या च शून्यता न सा सर्वाकारज्ञता नीत्यादीन्ननायुष्मन् शारिपुत्र पर्यायेत न यः सर्वाकारज्ञ
तायाश्चानुत्पादान् सर्वाकारज्ञता । शारिपुत्र आह ॥ [illegible] रूपं वेदनाः संज्ञाः संस्काराः विज्ञानमनुत्पादान्न द्विहामिति । एवं यावत्
समस्तरूपस्कन्धधात्वायतनप्रतीत्यसमुत्पादशून्यताबोधिपक्ष्यधर्मपारमिताः स्वप्रमाणध्यानारूप्यसमापत्तिपूर्वबलवैशारद्यप्रतिसंविदष्टादशावेणिकबुद्धधर्मा
यः सर्वाकारज्ञता यावद्यानसा सर्वाकारज्ञतास्तदिति नाह । तथाह्यायुष्मन् शारिपुत्र यस्य यथाय यथा रूपं यच्च वेदनायाच संज्ञा याच संस्काराः यच विज्ञानं सर्वे ता
धर्मान् संयुक्तान् विसंयुक्तानरूपिणो निदर्शना अप्रतिघा एकलक्षणा यदुतालक्षणाः । एवं यावत्समस्तरूपस्कन्धधात्वायतनप्रतीत्यसमुत्पादपारमिता शून्यता बोधिपक्ष्य
धर्माः पूर्वप्रमाणध्यानारूप्यसमापत्तीः पूर्वबलवैशारद्याः आवेणिकबुद्धधर्माः समाधिधारणीमुखपूर्वयथा यावत्सर्वाकारज्ञता यच्चाद धीकारे सर्वे ते धर्मान् संयुक्तान्
विसंयुक्तानरूपिणोऽनिदर्शना अप्रतिघा एकलक्षणा यदुतालक्षणाः । अनेनायुष्मन् शारिपुत्र पर्यायेन यानुपलम्भयानत रूपं वेदनायाः संज्ञायाः संस्काराणां यो विज्ञानस्य यान
नद्विहानी । एवं यावत्समस्तरूपस्कन्धधात्वायतनप्रतीत्यसमुत्पादशून्यताबोधिपक्ष्यधर्मपूर्वं इह पारमिताप्रमाण[illegible]रूप्यसमापत्तीः पूर्वदशबलवैशारद्यप्रतिसं
विदावेणिकबुद्धधर्माः समाधिधारणीमुखपूर्वयावद्यः सर्वाकारज्ञता यावद्यानसा सर्वज्ञता । शारिपुत्र आह ॥ कतरेणायुष्मन् सुभूते एवं वदसि यदिदं रूपस्य
मिलद्वयमेतन्नानाकरणमिति । वेदनासंज्ञासंस्काराणां यदिदमनुत्पादो विज्ञानं देमिलद्वयमेतन्नानाकरणमिति यावद्यदिदमनुत्पादः सर्वाकारज्ञता यदिद्वयमेतन्नानाकरणमिति
रूपमिति नाह । तथा ह्यायुष्मन् शारिपुत्र नान्यदनुत्पादोऽन्यद्रूपमनुत्पाद एव रूपं रूपमेवानुत्पादः वेदनासंज्ञासंस्कारा नान्योऽनुत्पादोऽन्यद्विज्ञानं विज्ञानमेवानुत्पादो नास्ते
द एव विज्ञानं अनेनायुष्मन् शारिपुत्र पर्यायेन यदिदमनुत्पादमिलद्वयमेतन्नानाकरणं यावद्वेदनासंज्ञासंस्कारा यदिदमनुत्पादो विज्ञानमिलद्वयमेतन्नानाकरणं । ए
वं यावत्समस्तरूपस्कन्धधात्वायतनप्रतीत्यसमुत्पादपारमिता शून्यताबोधिपक्ष्यधर्माः सर्वे शून्यता प्रमाणध्यानारूप्यसमापत्तिपूर्वं इह बलवैशारद्य
प्रतिसंविदावेणिकबुद्धधर्माः समाधिधारणीमुखपूर्वं तथाह्यायुष्मन् शारिपुत्र नान्योऽनुत्पादोऽन्या सर्वाकारज्ञतानुत्पाद एव सर्वाकारज्ञता सर्वाकारज्ञतै
वानुत्पादः अनेनायुष्मन् शारिपुत्र पर्यायेन यदिदमनुत्पादः सर्वाकारज्ञता यदिद्वयमेतन्नानाकरणमिति । पुनरपरमायुष्मन् शारिपुत्र निर्दिशति तदेव च । यस्मिन् समये भ
गवान् बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्निमान्धर्मानुपपरीक्षते तस्मिन् समये रूपमनुत्पादं समनुपश्यति [illegible] पादाय वेदनायाः संज्ञायाः
संस्कारान् विज्ञानमनुत्पादं समनुपश्यति [illegible] पादाय [illegible] पूर्वं पादायेव प्रभृत
मनुजमानवकानकवेदकज्ञानकपश्यकमनुत्पादं पश्यति । अत्यन्तविशुद्धिमुपादाय । एवं यावत्समस्तस्कन्धधात्वायतनप्रतीत्यसमुत्पादादिहानामनुत्पादः

देवच्युतिमूलकविशुद्धिमुपादाय [illegible] देवच्युतिमूलकविशुद्धिमुपादाय । एवं शीलपारमिताया क्षान्तिपारमिताया वीर्यपारमिताया ध्यान
पारमितायाः प्रज्ञापारमिताया [illegible] देवच्युतिमूलकविशुद्धिमुपादाय एवं स्मृत्युपस्थान [illegible]
[illegible]

१२७

[illegible]

नः रात्रमदानानीत्र्नानामी अर्हन्त्र्खलवठाधितत्वटसर्वहृत्सद्योजानहृत्सद्योजानहृतापन्नृत्यादृश्शारिपुत्र आह। एवंमनुरायुष्मान्तरत्रनृत्यादृश्गातिलान
[illegible]धर्मोत्तरविधर्मोनृपच्युत्रानापानानरप्राणितिमत्[illegible]चित्तावावत्[illegible]धातालानप्रतीत्यसमुत्पादपानमिताधिपत्याधर्मा[illegible]नत्रमुधानलीमिनिः
नवेसमाधयावत्तसेश्गनयप्रतिसंविदः आवलिकवृद्धधर्माःपयालीयाव[illegible]नहृतायोप्यनृत्यादृश्शारिपुत्र आह। किंपुनरायुष्मान्त्सत्वरत्वच[illegible]वलाकव्यवहारनदः
नानि[illegible]आलिसनदस्य एवं[illegible]तैवरा[illegible]आकव्यवहारनत्य[illegible]मानहेवमिनास्यहनिनाह। एवंमनसायुष्मान्शारिपुत्र एवमनाह। यथेवलाकव्यवहारनदः
[illegible]ताग्रमपत्नी[illegible]वेदोत्रत्वपतानिसंद[illegible]नोनामी एवारदर्शिनाग्रसवलूपूनउपनेमा[illegible]निपकल्पहृता कथामायुष्मान्[illegible]शारिपुत्रपन्नालानवलानाव
[illegible]नहृदानानिना[illegible]नसीहृतानव्यवेदा[illegible]ताह। किंपुनरायुष्मान्त्सत्वगलनृत्यधर्मोत्पन्नधर्मोत्ताहास्[illegible]धर्मोत्पन्नः सत्वनिनाह। नाहमा
युष्मन् शारिपुत्र उत्पन्नस्य धर्मस्योत्पादमिच्छामि नाप्यनुत्पन्नस्योत्पादमिच्छामि। शारिपुत्र आह। कतमस्यायुष्मन् सुभूते अनुत्पन्नस्य धर्मस्योत्पादनमिच्छसि सुभू
तिराह। रूपस्यायुष्मन् शारिपुत्र अनुत्पन्नस्य [illegible]त्वधस्तलादिनकामिवदनायाः श्रीह्याः सत्तकानाहारिविहानसुतहमायुष्मन् शारिपुत्र अनुत्पन्नस्य स्वधर्म
सत्तत्त्वगृत्यस्यालादसकामि। एवंव्यस्तसमस्तान्[illegible]धात्वायतनानि प्रतीत्यसमुत्पादस्पारमितानीवाधिपत्याः तानारूप्यसमापत्तिमतिहानीसर्वभ्य
दीसर्वसमाधीनीधनतीमृत्यानविनानीर्य[illegible]त्यानीप्रतिसंविदामष्टादशानामावेणिकानां बुद्धधर्माणामपि नाहमायुष्मन् शारिपुत्र अनुत्पन्नानां स्वभावशून्यानां
उत्पादमिच्छामि। शारिपुत्र आह। किंपुनरायु[illegible]त्पादउत्पन्नाउत्पन्नानूत्पादउत्पय[illegible]सहनिनाह। नत्वायुष्मन् शारिपुत्र उत्पादउत्पयन्नाप्यनुत्पादउत्पयन्नाग
सत्सि[illegible]ग्रहिकान[illegible]शारिपुत्र[illegible]सातादाय[illegible]नूत्पादहावधाधर्मोनसंचरूोनविसंयूकोऽनूपिलोत्रनिदर्शनोप्रतिघो[illegible]ऽत्तायदगालकलोत्रन
नायुष्मन् शारिपुत्र पर्यायमत्तत्सादउत्पयन्नाप्यनुत्पादउत्पयन्नायुष्मन् शारिपुत्र पर्यायमन्नृत्सादामशीरत्नसादश्पर्यादिनात्रनतो[illegible]धर्मसप्रियधर्मात्
नूल[illegible]नामानत्वप्रतिलातनतु[illegible]शारिपुत्र आह। धर्मरूचिकानामायुष्मान्नालगिन[illegible]युष्मान्त्सुतिर्यपदस्वपत्निप्रः
गोक्रियमनसत्कारद्वेनिश्रानातिसहतिनाह। धर्मगयोत्रायुष्मन् शारिपुत्र गत्पर्गत[illegible]यथायतएवं शारिपु[illegible]नाः
एवैनिसनकिमकस्यहतोक्रुथ्यावनामानिश्रग्रत्वासर्वधर्मोती शारिपुत्र आह। कथमायुष्मन् सुभूते अनिश्रिताः सर्वधर्माः सुभूतिराह। रूपमायुष्मन् शारिपुत्र
[illegible]ति[illegible]नैनाध्यात्मनिःश्रितं न बहिर्धानिःश्रितं नोभयमन्तरेणोपलभ्यते। वेदनासंज्ञासंस्कारविज्ञानमायुष्मन् शारिपुत्र प्रकृतिशून्यत्वेनाध्यात्मनिःश्रितं न बहि
र्धानिःश्रितं नोभयमन्तरेणोपलभ्यते। चक्षुरायुष्मन् शारिपुत्र प्रकृतिशून्यत्वेनाध्यात्मनिःश्रितं न बहिर्धानिःश्रितं नोभयमन्तरेणोपलभ्यते। एवं श्रोत्रघ्राणजिह्वा

यतेन नायुष्मन् शारिपुत्र प्रकृतिशून्यत्वेन नाध्यात्मनिःश्रितं न बहिर्धानिःश्रितं नोभयमन्तरेणोपलभ्यते। दानपारमितायुष्मन् शारिपुत्र प्रकृतिशून्यास्या नाध्यात्मं न बहिर्धा
नोभयमन्तरेणोपलभ्यते। एवं शीलपारमिता क्षान्तिपारमिता वीर्यपारमिता ध्यानपारमिता प्रज्ञापारमितायुष्मन् शारिपुत्र प्रकृतिशून्यास्या नाध्यात्मं न बहिर्धा नोभयमः
न्तरेणोपलभ्यते। अध्यात्मशून्यता प्रकृतिशून्यत्वान्नाध्यात्मं न बहिर्धा नोभयमन्तरेणोपलभ्यते। एवं बहिर्धाशून्यता अध्यात्मबहिर्धाशून्यता यावत् स्वभावशून्यता प्रकृतिशू
न्यत्वान्नाध्यात्मं न बहिर्धा नोभयमन्तरेणोपलभ्यते। स्मृत्युपस्थानानि प्रकृतिशून्यत्वान्नाध्यात्मं न बहिर्धा नोभयमन्तरेणोपलभ्यन्ते। एवं सम्यक्प्रहाणानि ऋद्धिपादाः इ
न्द्रियाणि बलानि बोध्यङ्गानि आर्याष्टाङ्गमार्गः प्रकृतिशून्यः सन्नाध्यात्मं न बहिर्धा नोभयमन्तरेणोपलभ्यते। एवमप्रमाणध्यानारूप्यसमापत्ति[illegible]समाधिमुखधार
णीमुखबलवैशारद्यप्रतिसंविदः अष्टादशावेणिका बुद्धधर्माः प्रकृतिशून्यास्तेनाध्यात्मं न बहिर्धा नोभयमन्तरेणोपलभ्यन्ते। अनेनायुष्मन् शारिपुत्र पर्यायेण सर्वध
र्मा अनिश्रिताः प्रकृतिशून्यतामुपादाय। एवं ह्यायुष्मन् शारिपुत्र बोधिसत्त्वेन महासत्त्वेन षट्पारमितासु चरता नानुपधिपरिशोधयितव्या वेदनासंज्ञासंस्कारविज्ञाना
नि परिशोधयितव्यानि। एवं व्यस्तसमस्ताः स्कन्धा धातवः आयतनानि प्रतीत्यसमुत्पादः। सर्वपारमिताः सर्वशून्यताः सर्वसमाधयः सर्वधारणीमुखानि सर्वपारमि
ताधिपत्याधर्माः अप्रमाणध्यानारूप्यसमापत्तयः इति द्वादशबलानि [illegible]ध्यानवेशारद्यानि चत्वारि प्रतिसंविदः अष्टादशावेणिका बुद्धधर्माः परिशोधयि
तव्याः। यावत् सर्वाकारज्ञता परिशोधयितव्या। कुतः सर्वाकारज्ञतानिर्याणी। शारिपुत्र आह। कथमायुष्मन् सुभूते बोधिसत्त्वो महासत्त्वः षट्पारमितासु चरन् बोधिस
त्त्वमार्गं परिशोधयति। सुभूतिराह। इहायुष्मन् शारिपुत्र दानपारमिता लौकिकी अस्ति लोकोत्तरास्ति। एवं शीलपारमिता क्षान्तिपारमिता वीर्यपारमिता ध्यानपारमिता
प्रज्ञापारमिता लौकिकी अस्ति लोकोत्तरास्ति। शारिपुत्र आह। कतमायुष्मन् सुभूते दानपारमिता लौकिकी कतमा लोकोत्तरा। सुभूतिराह। लौकिकी आयुष्मन्
शारिपुत्र दानपारमिता इह बोधिसत्त्वो महासत्त्वो दायको भवति दानपतिः। स श्रमणब्राह्मणकृपणवनीपकाध्वगयाचनकेभ्यो दानं ददाति अन्नार्थिकेभ्यो अन्नं ददाति पानय
नवसनगन्धमाल्यविलेपनपुष्पधूपचूर्णवासोपाश्रयप्रतिश्रय[illegible]विलेपनकन दानं यानार्थिकेभ्यो पानवस्त्रशयनासनगन्धमाल्यविलेपनपुष्पधूप
चूर्णवासोपाश्रयप्रतिश्रयाच्छादनं जीवितपरिष्कारकं दा[illegible]। [illegible]इहितार्थिकेभ्यो दुहितॄर्ददाति। दारार्थिकेभ्यो
दारान्ददाति। राज्यार्थिकेभ्यो राज्यं ददाति। अङ्गार्थिकेभ्यो अङ्गानि ददाति। मांसार्थिकेभ्यो मांसं ददाति। शोणितार्थिकेभ्यः शोणितं ददाति। [illegible]मज्जाः
ददाति नख[illegible]सर्वाधिपति[illegible]रूपेण एव ददाति। आहं ददामि एष परिगृह्णाति। अहं दानपतिः सर्वस्वपरित्यागी अहं बुद्धानुज्ञातं करोमि अहं दानपारः
मितायां चरामि निमित्तानुसारी। स इदं दानं दत्त्वा सर्वसत्त्वैः साधारणं कृत्वा अनुत्तरायां सम्यक्संबोधौ परिणामयति। इयमुच्यते लौकि
की दानपारमिता। कस्माल्लौकिकी इत्युच्यते। लोकान्न चलति नोच्चलति न समतिक्रामति। तेनोच्यते लौकिकी दानपारमिता। तत्र कतमा लोकोत्तरा दानपारमिता। य इह त्रि

पञ्चविंशति

मृकुशलपरिशुद्धिता [illegible] मामि कुशलपरिशुद्धिः इह बोधिसत्त्वो महासत्त्वो दानं ददानो नात्मानमुपलभते प्रतिग्राहकं नोपलभते दानं नोपलभते विपाकं च नोपलभते । इयमायुष्म
ञ्छारिपुत्र बोधिसत्त्वस्य महासत्त्वस्य त्रिमण्डलपरिशुद्धिः पुनरपरमायुष्मञ्छारिपुत्र बोधिसत्त्वो महासत्त्वो दानं ददन् सर्वसत्त्वेषु तद्दानं निर्यातयति सत्त्वांश्च नोपलभते आ
त्मानं च नोपलभते तच्च दानमनुत्तरायां सम्यक्संबोधौ परिणामयति न च बोधिमुपलभते । इयमुच्यते लोकोत्तरा दानपारमिता । कतमा [illegible] लोकोत्तरा दानपार
मिता । [illegible] आयुष्मञ्छारिपुत्र [illegible] लोकोत्तरा दानपारमिता । एवं शीलपारमिता क्षान्तिपारमिता वीर्यपारमिता ध्यानपारमि
ता । शारिपुत्र आह । कतमायुष्मन्सुभूते प्रज्ञापारमिता लौकिकी कतमा लोकोत्तरा । सुभूतिराह । लौकिकी आयुष्मञ्छारिपुत्र प्रज्ञापारमिता । इह बोधिसत्त्वो महा
सत्त्वो दानं ददाति उपलम्भनिश्रितः [illegible] मात्सर्यचित्तं निगृह्णाति [illegible] सत्त्वहानं [illegible] सर्वस्वं परित्यजति । बाह्याध्यात्मिकं वस्तु
उपादाय [illegible] किंचिद्येन परित्यजति [illegible] कुशलमूलं परिणामयति सर्वसत्त्वसाधारणं कृत्वा उपलम्भनिश्रितः सर्वसत्त्वान् धूतगुणान् [illegible]
[illegible] उपलभते [illegible] अनुत्तरायां सम्यक्संबोधौ परिणामयति सर्वसत्त्वसाधारणानि कुशलमूलानि बोधि
परिणामयति [illegible] आत्मानमुपलभ्य [illegible] सर्वसत्त्वानाम् [illegible] कुशलमूलेन अनुत्तरायां सम्यक्संबोधौ
परिणामयति सर्वसत्त्वसाधारणीकृत्वा उपलम्भयोगेन सवीर्यमालम्बनं कायमुपलभमानो [illegible] मानपूर्वं समानं शानं संलीनमुपलभमानो बोधिम
उपलभमानः [illegible] मन्यते [illegible] सर्वसत्त्वसाधारणीकृत्य उपलम्भयोगेनानुत्तरायां सम्यक्संबोधौ परिणामयति । समाधिं [illegible] ध्यानसमा
पत्तीः समापद्यते [illegible] आस्वादयति । [illegible] सर्वसत्त्वसाधारणानि च कुशलमूलानि उपलम्भदृष्टिका बोधये परिणामयति । इयमुच्यते लौकि
की प्रज्ञापारमिता । शून्यता [illegible] रूपं [illegible] बोधये परिणामयति । शून्यमिति परिकल्पयति वेदना संज्ञा संस्कारा विज्ञानं शून्यमिति परिकल्पयति यावद्बुद्धधर्मा
परिकल्पयति । उपलम्भयोगेन कुशलमूलानि सर्वसत्त्वसाधारणानि कृत्वा अनुत्तरायां सम्यक्संबोधौ परिणामयति । [illegible] सर्वपापं [illegible] उपलम्भ
ात्मनः [illegible] पुण्यमनुमोदते [illegible] सर्वबुद्धनाम [illegible] सर्वसत्त्वसाधारण
ीकृत्वा इयमुच्यते लौकिकी प्रज्ञापारमिता । कतमा लोकोत्तरा प्रज्ञापारमिता । आत्मसत्त्वदत्ताध्यनुपलब्धा त्रिमण्डलपरिशुद्धा दानपारमितां परिपूरयति आत्म
सत्त्वशीलाध्यनुपलब्धा त्रिमण्डलपरिशुद्धा शीलपारमितां परिपूरयति । [illegible] सत्त्वक्षमा [illegible] अनुपलब्धा [illegible] पारमितां परिपूरयति । [illegible]
[illegible] आत्मकाय [illegible] परिपूरयति । [illegible] ध्यानसमाधिसमापत्तिबोधन

१२९

पलब्धा त्रिमण्डलपरिशुद्धा ध्यानपारमितां परिपूरयति । [illegible] आत्मसत्त्वसर्वधर्मानुपलब्धा त्रिमण्डलपरिशुद्धा प्रज्ञापारमितां परिपूरयति । [illegible] परिशुद्धिबोधाय
सर्वकुशलानि तान्यनुत्तरायां सम्यक्संबोधये परिणामयति निर्विशेषं परिणामयति नान्यत्र परिणामना समसमपरिणामना अचिन्त्यतुल्यपरिणामना अप्रमेयपरिणामना । इयमु
च्यते लोकोत्तरा प्रज्ञापारमिता [illegible] लौकिकी लोकायाति [illegible] लोकमुद्याति निर्वर्तयति । लोकमुत्तरति [illegible] लोकादुद्याति [illegible] लोकस्य
[illegible] लोकोत्तरा । एवं ह्यायुष्मञ्छारिपुत्र बोधिसत्त्वा महासत्त्वाः षट्पारमिताः परिपूरयन्ति बोधिमार्गं परिशोधयन्ति । शारिपुत्र आह । कतम
आयुष्मन्सुभूते बोधिसत्त्वस्य महासत्त्वस्य बोधिमार्गः । सुभूतिराह । चत्वार्यायुष्मन्स्मृत्युपस्थानानि बोधिसत्त्वस्य महासत्त्वस्य बोधिमार्गः । चत्वारि सम्यक्प्रहाणानि
चत्वार ऋद्धिपादाः पञ्चेन्द्रियाणि पञ्च बलानि सप्त बोध्यङ्गानि आर्याष्टाङ्गो मार्गः शून्यतासमाधिरानिमित्तो अप्रणिहितः समाधिः [illegible] विमोक्षा नवानुपूर्वविहारसमापत्तयः अध्यात्म
[illegible] बहिर्धा शून्यता यावदभावस्वभावशून्यता सर्वसमाधयः सर्वधारणीमुखानि दश बलानि चत्वारि वैशारद्यानि [illegible] प्रतिसंविदः अष्टादशावेणिका बुद्धधर्मा महा
करुणा [illegible] आयुष्मञ्छारिपुत्र बोधिसत्त्वस्य महासत्त्वस्य बोधिमार्गः । शारिपुत्र आह । कतमस्यायुष्मन्सुभूते पारमिता [illegible] प्रकारेषु सुभूतिराह । प्रज्ञापा
रमितायामायुष्मञ्छारिपुत्र यः [illegible] प्रज्ञापारमिता [illegible] सर्वकुशलानां धर्माणामवकप्रत्येकबुद्धधर्माणां बोधिसत्त्वध
र्माणां [illegible] प्रज्ञापारमितायुष्मञ्छारिपुत्र प्रतिग्राहिका सर्वेषां कुशलानां धर्माणां श्रावकप्रत्येकबुद्धधर्माणां बोधिसत्त्वधर्माणां प्रज्ञापारमितायामायुष्मञ्छारिपुत्र [illegible]
[illegible] मूलं [illegible] सम्यक्संबुद्धा बोधिसत्त्वा [illegible] तानागतानायुष्मञ्छारिपुत्र तथागता अर्हन्तः सम्यक्संबुद्धाः इहैव प्रज्ञापारमिताः
[illegible] अनुत्तरां सम्यक्संबोधिमभिसंबुद्धा [illegible] आयुष्मञ्छारिपुत्र दश दिक्षु लोकधातुषु तथागता अर्हन्तः सम्यक्संबुद्धास्तिष्ठन्ति ध्रियन्ते यापयन्ति धर्मं दे
शयन्ति । [illegible] सर्व इहैव प्रज्ञापारमितायां [illegible] अनुत्तरां सम्यक्संबोधिमभिसंबुद्धाः पुनरायुष्मञ्छारिपुत्र [illegible] प्रज्ञापारमितायां [illegible] मात्रा [illegible] बोधिसत्त्वस्य
महासत्त्वस्य [illegible] आयुष्मञ्छारिपुत्र बोधिसत्त्वो महासत्त्वः [illegible] विहरन् [illegible] विरहितः [illegible] मनसिका
रेण [illegible] सर्वसत्त्वपरित्राणाय सर्वसत्त्वपरित्यागमनसिकारेण महाकरुणामनसिकारेण । शारिपुत्र आह । यदायुष्मन्सुभूते [illegible] एवमाह । [illegible]
बोधिसत्त्वा महासत्त्वाः [illegible] विहरन्तो [illegible] विरहिता [illegible] मनसिकारेण भवन्ति । एवं सत्यायुष्मन्सुभूते सर्वसत्त्वा अपि बोधिसत्त्वा भविष्यन्ति । [illegible]
[illegible] सर्वसत्त्वा अपि विरहिता मनसिकारेण । सुभूतिराह । साधु साध्वायुष्मञ्छारिपुत्र [illegible] आयुष्मञ्छारिपुत्र [illegible] परिज्ञाने [illegible]
[illegible] सत्त्वासत्त्वाः [illegible] आयुष्मञ्छारिपुत्र मनसिकारा [illegible] वेदितव्याः सत्त्वशून्यता [illegible] मनसिकारशून्यता वेदितव्या सत्त्वासत्त्वतया [illegible] मनसिकारासत्त

विहार २

पञ्चविंगति

नानदिनव्याः सत्वविविक्ततयामनन्तिकानन्तिविविक्तता वदितव्या सत्वानन्तिसंबाधनतयामनन्तिकानानन्तिसंबाधनता वदितव्या। रूपासद्भावाद्रूपानन्ततया रूपास्वः
लावततयानूपविविक्ततयानूपानन्तिसंबाधनतयामनन्तिकानानन्तिसंबाधनता वदितव्या। वेदनासंज्ञासंस्कारविज्ञानासद्भावाद्यावद्विज्ञानास्वलावततयाविः
ज्ञानविविक्तत्वाद्विज्ञानानन्तिसंबाधनतयामनन्तिकानासंबाधनता वदितव्या। एवं चक्षुःसमस्पर्शस्वधातायतनप्रतीत्यसमुत्पादस्य समुदायधिपर्यधर्मपानिः
दानप्रमातथ्यानानूपसमापत्तीप्यरिहारसर्वज्ञतायास्तसर्वसमाधिपर्यवधानतीमस्वपदगवलर्वेशानय प्रतिसंविल्लक्षणाद्यावत्तिकपर्वरूधर्मपरः
गताःका नहृगासल्पास र्वकानहृतायाशून्यतया सर्वाकानहृतायास्वलावतया सर्वाकानहृताविविक्ततया सर्वाकानहृतानन्तिसंबाधनतयामनन्तिकानान
न्तिसंबाधनता वदितव्या अनेनायुष्मन् शारिपुत्र विहारेणानन्तमनन्तिकान्तत्वविनिहिता बोधिसत्वा महासत्व इति। अथ खल्वायुष्मान् सुभूतिः स्थविरः
नमदात्। साधु साधु सुभूते एवं हि सुभूते बोधिसत्वानां महासत्वानां प्रज्ञापारमिताउपदेष्टव्या यथा त्वमपदिशसि। यथापि नाम तथागतानुभावेनैवं बोधिसत्वे
नमहासत्वेन प्रज्ञापारमिता चान्यथैव बाल्यमुपदिशसि। अत्रि खलु पुनः प्रज्ञापारमितापरिवर्हं आयुष्मता सुभूतिना भाष्यमाणे त्रिसाहस्रमहासाहस्रे लोकधा
तुः षड्विकारमकम्पत यावदिदि गतपाश्वमायाविदिगउल्मा वनामे गढ़ू निस्यश्चन्त्यरत्नदगदीसर्वसमर्थनायासिन मन्त्रनाम। अथ खल्वायुष्मान् सुः
भूतिर्भगवन्तमेतदवोचत्। किं भगवन् हेतुः कः प्रत्ययः स्मितस्य प्रादुर्भावाय। एवमुक्ते भगवानाह। यथैव सुभूते इह लोकधातौ तथागतः प्रज्ञापारमितानिर्दिशति
एवं पूर्वस्यां दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु तथागताः अर्हन्तः सम्यक्संबुद्धा बोधिसत्वानां महासत्वानां प्रज्ञापारमितामुपदिशन्ति। एवं समन्ताद्दशसु दिक्षु सर्व
स्थ गङ्गानदीवालुकोपमेषु लोकधातुषु तथागता बोधिसत्वानां महासत्वानां प्रज्ञापारमितामिति दिशन्ति। अस्मिन् खलु पुनः सुभूते प्रज्ञापारमितानिर्देशे निर्दिश्यमाने
द्वादशानां देवनियुतानामनुत्पत्तिकेषु धर्मेषु क्षान्तिप्रतिलम्भोऽभूत्। एषामपि च रत्नानां देवानां द्वादशानां देवमनुष्यकोटीनां गङ्गानदीवालुकोपमाः
क्षात्रा चित्तान्युत्पन्नानि अनुत्तरायां सम्यक्संबोधौ। तेषामपि समाचरितानां तेषां सत्वानामनुत्तरायां सम्यक्संबोधौ चित्तान्युत्पन्नानि। इति
आर्यपञ्चविंशतिसाहस्रिकायां प्रज्ञापारमितायां परिवर्तः समाप्तः॥ ॥आर्यपञ्चविंशतिसाहस्रिकायां भगवत्यां प्रज्ञापारमितायामभिसमयालंका
रानुसारेण संशोधितायां सर्वाकारज्ञताधिकारः समाप्तः प्रथमः॥ ॥अथ खलु तस्मिं त्रिसाहस्रमहासाहस्रे लोकधातौ महाराजानः स
र्वे च नवदेवपुत्रसहस्रैः सार्धं गतैव पर्षदि सन्निपतिता अभूवन्। एवं शक्रो देवानामिन्द्रः॥ ॥मातृसुविमानिर्माणरतयः परनिर्मितवशव
र्तिनो ब्रह्मकायिका यावदकनिष्ठा देवपुत्राः त्रिसाहस्रमहासाहस्रलोकधातुपरिवारा यावदकनिष्ठावासकायिकाश्च देवपुत्राः अनेकैश्च शुद्धावासकायिका
देवपुत्रकोटीनियुतशतसहस्रैः सार्धं तत्रैव पर्षदि सन्निपतिता। ताय खलु पुनश्चातुर्महाराजकायिकानां देवपुत्राणां कर्मविपाकजः प्रभावत्तदा

तावत् दृष्टिंगमामामालं पुषिमानिनिर्म्माणरतीनां परनिर्मितवशवर्तिनां यावच्छुद्धावासकायिकानां देवपुत्राणां कर्मविपाकजः प्रभायावदाभासः समन्ततस्तथागतस्य प्रभा
याः शतशतमपि कलां नोपैति सहस्रतमीमपि शतसहस्रतमीमपि कोटिशतसहस्रतमीमपि संख्यामपि कलामपि गणनामपि उपमामपि उपनिषदमपि नोपैति न क्ष
मते तथागतप्रभायाः पुरतः सा देवानां प्रभा यथापि नाम प्रदीपिता। अथ स्वाध्यायतः अभावनाप्रभावना प्रतीत्य नूतनानिर्युक्ता निर्यूह्नाउन्यूनाचाख्यायते। तद्यथापि नाम जा
म्बूनदसुवर्णस्य पुरतः झामकमिव भवति तद्वत् अपि विनाशयति। एवमेव भगवतः स्वप्रकृतिप्रभायाः पुरतः सा देवानां कर्मविपाकजा प्रभा न शोभते न तपति विनाचयति
अमनं प्रवेशयति न ख्याति तस्या च प्रभावनाप्रभावनाप्रतीत्य नूतनानिर्युक्ता निर्यूह्ना उन्यूना नाख्यायते॥ अथ खलु शक्रो देवानामिन्द्रः॥ अथ खलु शक्रो देवानामिन्द्र
आयुष्मन्तं सुभूतिमेतदवोचत्॥ एते खल्वार्य सुभूते त्रिसाहस्रमहासाहस्रलोकधातौ चातुर्महाराजकायिका देवा त्रयस्त्रिंशा यामास्तुषिता निर्म्माणरतयः परनि
र्मितवशवर्तिनो देवा यावदकनिष्ठावासकायिका देवपुत्रा एकतः सन्निपतिता आयुष्मतः सुभूतेः प्रज्ञापारमितानिर्देशं श्रवणाय प्रज्ञापारमितामुपदेशं श्रोतुकामाः कथमार्य
सुभूते बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां स्थातव्यं कथं च बोधिसत्वस्य महासत्वस्य प्रज्ञापारमिता॥ इत्याख्यातम्॥ एवमुक्ते आयुष्मान् सुभूतिः शक्रं देवानामि
न्द्रमेतदवोचत्। तेन हि कौशिक उपदेक्ष्यामि ते बुद्धानुभावेन बुद्धाधिष्ठानेन बोधिसत्वानां महासत्वानां प्रज्ञापारमितां यथा बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां स्थातव्यं। येन
देवपुत्रेणानुत्तरायां सम्यक्संबोधौ चित्तं नोत्पादितं तैरुत्पादयितव्यं। ये पुनरवक्रान्तनियामाः न ते भव्याः पुनरनुत्तरायां सम्यक्संबोधौ चित्तमुत्पाद
यितुं तत्कस्य हेतोः बद्धसीमानो हि ते संसारस्रोतसः॥ इति विषयप्रतिनियमः॥ अपि तु खलु पुनस्तेषामप्यनुमोदे ये च न तथा ते सम्यक्संबोधौ चित्तमुत्पादयिष्यन्ति॥ ने
च्छामि धर्मः॥ नाहं कुशलमूलस्यान्तरायं करोमि॥ इति सदाचरवः कुशलमूलस्य अर्थाय अधिगन्तव्यो धर्मः॥ अध्यालम्बितव्या॥ इति कान्ति पुष्टिः॥ कामिस्थामिकरुणादीनि। तत्र कौशिकर
बोधिसत्वस्य महासत्वस्य प्रज्ञापारमिता यः बोधिसत्वो महासत्वः सर्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैः रूपमनित्यमिति मनसिकरोति। रूपं दुःखमिति रूपं शून्यमिति रूपमनात्मेति रूपमशुभमिति
गण्डं रोगः शल्यं अघं उपद्रवः उपसर्गः परतः प्रलोपधर्मकं चलं भंगुरं इत्येवं रूपं प्रत्यवेक्षते। रूपमनित्यं मनसिकरोति सर्वाकारज्ञताप्रतिसंयुक्तैः मनसिकारैः। एवं वेदनां संज्ञां संस्कारान् विज्ञानमनित्यमिति
तीत्यसमुत्पादं प्रति। एवं पृथिवीधातुं अब्धातुं तेजोधातुं वायुधातुं आकाशधातुं विज्ञानधातुं अनित्यमिति मनसिकरोति। दुःखं शून्यमनात्मेति अशुभं गण्डं रोगः शल्यं अघं आबाधः पर इति प्रलोपधर्म्मकं
चलं भङ्गुरं प्रत्यवेक्षते उपसर्गतो उपद्रवतः अनित्यमिति मनसिकरोति। सर्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैः। एवमविद्याप्रत्ययाः संस्कारान् अनित्यमिति मन
सिकरोति। दुःखमशुभमनात्मेति रोगतो गण्डतः शल्यतः अघतः आबाधतः परतः प्रलोपधर्मतः चलतः भङ्गुरतः उपसर्गतः उपद्रवतः। संस्कारप्रत्ययं विज्ञानं
विज्ञानप्रत्ययं नामरूपं नामरूपप्रत्ययं षडायतनं षडायतनप्रत्ययः स्पर्शः स्पर्शप्रत्यया यावद्वेदनाप्रत्यया तृष्णा तृष्णाप्रत्ययमुपादानं उपादानप्रत्ययो भवः
भवप्रत्यया जातिः जातिप्रत्यया जरामरणशोकपरिदेवदुःखदौर्मनस्योपायासाः संभवन्ति। एवमस्य केवलस्य महतो दुःखस्कन्धस्य समुदयो भवतीति जाति

[illegible]

[illegible]

पंचविंशति
१३२

तिकबुद्धधर्मशून्या । चक्षुर्बोधिसत्त्वशून्यता चाद्वयमेतद्द्वैधीकारं ॥ पुनरपरं कौशिक बोधिः समाधिना शून्यः । ध्यानानीमानि [illegible] शून्यानि बोधिसत्त्वो बोधिसत्त्वेन शून्यः कौशिक समाधि
शून्यता च ध्यानशून्यता च बोधिसत्त्वशून्यता चाद्वयमेतद्द्वैधीकारं ॥ पुनरपरं कौशिक श्रावकयानं श्रावकयानेन शून्यं प्रत्येकयानं प्रत्येकयानेन शून्यं महायानं महायानेन शून्यं श्रावकः
श्रावकत्वेन शून्यः । प्रत्येकः प्रत्येकबुद्धत्वेन शून्यः । बोधिसत्त्वो बोधिसत्त्वेन शून्यः । बुद्धो बुद्धत्वेन शून्यः । कौशिक श्रावकयानशून्यता च याव महायानशून्यता च याव श्रावकशून्यता च यावद्बु
द्धशून्यता चाद्वयमेतद्द्वैधीकारं । एवं हि कौशिक बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां स्थातव्यं ॥ [illegible] ॥ अथ खलु शक्रो देवानामिन्द्रः सुभूतिं स्थविरमेतदवोचत् ।
कुत्र भदन्तसुभूते बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां स्थातव्यं ॥ सुभूतिराह ॥ इह कौशिक बोधिसत्त्वेन महासत्त्वेन रूपे न स्थातव्यं वेदनायां संज्ञायां संस्कारेषु विज्ञाने न स्था
तव्यं । उपलम्भयोगेन चक्षुषि न स्थातव्यं रूपे न स्थातव्यं चक्षुर्विज्ञाने न स्थातव्यं चक्षुःसंस्पर्शे न स्थातव्यं चक्षुःसंस्पर्शजायां वेदनायां न स्थातव्यं । एवं श्रोत्रघ्राणजिह्वाकायमनसि
न स्थातव्यं धर्मेषु न स्थातव्यं मनोविज्ञाने न स्थातव्यं मनःसंस्पर्शे न स्थातव्यं मनःसंस्पर्शजायां वेदनायां न स्थातव्यमुपलम्भयोगेन पृथिवीधातौ न स्थातव्यमब्धातौ न स्थातव्यं
तेजोधातौ न स्थातव्यं वायुधातौ न स्थातव्यं आकाशधातौ न स्थातव्यं विज्ञानधातौ न स्थातव्यं । उपलम्भयोगेन स्मृत्युपस्थानेषु न स्थातव्यं । एवं सम्यक्प्रहाणर्द्धि
पादेन्द्रियबलबोध्यङ्गमार्गेष्वार्यसत्येषु अप्रमाणध्यानारूप्यसमापत्तिषु दशबलवैशारद्यप्रतिसंविदावेणिकबुद्धधर्मेषु न स्थातव्यमुपलम्भयोगेन स्रोतआपत्तिफले न स्थातव्यं
एवं सकृदागामिफले अनागामिफले अर्हत्त्वे प्रत्येकबुद्धत्वे यावद्बुद्धत्वे न स्थातव्यमुपलम्भयोगेन ॥ इति मूर्द्धगतं ॥ रूपं नित्यमिति न स्थातव्यमेवमनित्यमिति सुखं
दुःखमिति आत्मेति अनात्मेति शान्तमिति अशान्तमिति विविक्तमिति अविविक्तमिति स्थातव्यं । रूपं शून्यमिति अशून्यमिति निमित्तमिति अनिमित्तमिति प्रणिहित
मिति अप्रणिहितमिति न स्थातव्यमुपलम्भयोगेन वेदना संज्ञा संस्कारा विज्ञानं नित्यमिति न स्थातव्यमेवमनित्यमिति सुखमिति दुःखमिति आत्मेति अनात्मेति शान्त
मिति अशान्तमिति विविक्तमिति अविविक्तमिति न स्थातव्यं विज्ञानं शून्यमिति अशून्यमिति निमित्तमिति अनिमित्तमिति प्रणिहितमिति अप्रणिहितमिति न स्थातव्यमुप
लम्भयोगेन एवं यावत्सर्वस्कन्धधात्वायतनप्रतीत्यसमुत्पादेषु पारमितासु बोधिपक्षधर्मेषु अप्रमाणध्यानारूप्यसमापत्तिषु [illegible] समाधिषु सर्वधा
रणीमुखेषु दशबलवैशारद्यप्रतिसंविदष्टादशावेणिकबुद्धधर्मेषु यावत्सर्वाकारज्ञतायां सर्वं च नित्यमिति न स्थातव्यमेवमनित्यमिति सुखमिति दुःखमिति आत्मेः
ति अनात्मेति शान्तमिति अशान्तमिति विविक्तमिति अविविक्तमिति न स्थातव्यं शून्यमिति अशून्यमिति निमित्तमिति अनिमित्तमिति प्रणिहितमिति अप्रणिहितमिति न स्था
तव्यमुपलम्भयोगेन ॥ पुनरपरं कौशिक स्रोतआपत्तिफलं असंस्कृतप्रभावितमिति न स्थातव्यमेवं सकृदागामिफलमनागामिफलमर्हत्त्वं प्रत्येकबुद्धत्वं असंस्कृतप्रभावितमि
ति न स्थातव्यं [illegible] असंस्कृतप्रभावितमिति न स्थातव्यं स्रोतआपन्नो दक्षिणीय इति न स्थातव्यं । एवं सकृदागामी अनागामी अर्हन् प्रत्येकबुद्धस्तथागतो दक्षिणीय इति न स्था
तव्यमुपलम्भयोगेन ॥ इति क्षान्तिगतं ॥ पुनरपरं [illegible] बोधिसत्त्वेन महासत्त्वेन प्रथमायां भूमौ न स्थातव्यं । एवं द्वितीयायां भूमौ तृतीयायां भूमौ चतुर्थ्यां भूमौ पंच

गुरुः
१३२

म्यां भूमौ षष्ठ्यां भूमौ सप्तम्यां भूमौ अष्टम्यां भूमौ नवम्यां भूमौ दशम्यां भूमौ न स्थातव्यमुपलम्भयोगेन ॥ प्रथमचित्तोत्पादेन दानपारमितां परिपूरयिष्यामीति न स्थातव्यं
एवं शीलपारमितां क्षान्तिपारमितां वीर्यपारमितां ध्यानपारमितां प्रज्ञापारमितां परिपूरयिष्यामीति न स्थातव्यमुपलम्भयोगेन । एवं स्मृत्युपस्थानसम्य
देवमानुषासुरेण सदेवयक्षगन्धर्वकिन्नरमहोरगमनुष्यामनुष्यलोकेन रक्षावरणगुप्तिः संविधातव्या॥ एवमुक्ते भगवान् शक्रं देवानामिन्द्रमेतदवोच
त्। एवं कौशिक बोधिसत्त्वमहासत्त्वमागम्य निरयतिर्यग्योनियमलोकाः गतयश्छिद्यन्ते देवदारिद्र्यं मनुष्यदारिद्र्यं उपद्रवा उपसर्गोत्स
र्गाश्छिद्यन्ते बोधिसत्त्वमहासत्त्वमागम्य दशानां कुशलमूलानां कर्मपथानां प्रादुर्भावो भविष्यति दानपारमितानां दशानां बोधिसत्त्वलक्षणानां मान
ध्यानानां [illegible] प्रतिपत्तिनां बोधिसत्त्वधर्माणां सर्वधर्मानां सप्तानां निहितानां सर्वशून्यतानां सर्वसमाधीनां सर्वधारणीमुखानां लोके प्रादुर्भावो भ

गुरुः
१५५

विष्यति अष्टादशानामावेणिकानां बुद्धधर्माणां सर्वाकारज्ञताया बोधिसत्त्वमहासत्त्वमागम्य लोके प्रादुर्भावो भविष्यति क्षत्रियमहाशालकुलानि ब्राह्मणमहाशा
लकुलानि गृहपतिमहाशालकुलानि बोधिसत्त्वमहासत्त्वमागम्य लोके प्रज्ञायन्ते चक्रवर्त्तिराजकुलानि लोके प्रज्ञायन्ते चातुर्महाराजकायिका देवपुत्रा यावदक
निष्ठा देवपुत्राः प्रज्ञायन्ते स्रोतआपत्तिफलं स्रोतआपन्नः एवं सकृदागामिफलं सकृदागामी अनागामिफलमनागामी अर्हत्त्वमर्हन् लोके प्रज्ञायते प्रत्येकबोधिः प्रत्ये
कबुद्धा लोके प्रज्ञायन्ते बोधिसत्त्वमहासत्त्वमागम्य सत्त्वपरिपाकः प्रज्ञायते बुद्धक्षेत्रपरिशुद्धिः प्रज्ञायते तथागतार्हन्सम्यक्संबुद्धा लोके प्रज्ञायन्ते धर्मचक्रप्रवर्त्त
नं लोके प्रज्ञायते बुद्धरत्नं धर्मरत्नं संघरत्नं बोधिसत्त्वमहासत्त्वमागम्य लोके प्रादुर्भवति। तस्मात्तर्हि कौशिक बोधिसत्त्वो महासत्त्वः सदेवमानुषा
सुरेण लोकेन सत्कर्त्तव्यो मानयितव्यः पूजयितव्यः सगतः समितं चातुरन्तं आवरणगुप्तिः संविधातव्या। प्रज्ञापारमितासु कौशिक सत्कर्त्तव्या मानयितव्या पूजयि
तव्या मन्यतां यो बोधिसत्त्वमहासत्त्वं सत्कुर्याद्गुरुकुर्यान्मानयेत् पूजयेत् बोधिसत्त्वः सदेवकेन लोकेन सत्कर्त्तव्यः सगतः समितं चातुरन्तं आवरणगुप्तिः संविधातव्या य
कौशिक त्रिसाहस्रमहासाहस्रलोकधातुम् अवकाशं प्रत्येकबुद्धैः परिपूर्णं तद्यथापि नाम नलवनं वा वेणुवनं वा इक्षुवनं वा शरवनं वा तिलवनं वा कश्चि
देव कुलपुत्रो वा कुलदुहिता वा सत्कुर्याद्गुरुकुर्यान्मानयेत् पूजयेदर्चयेत् यश्च प्रथमचित्तोत्पादिकं बोधिसत्त्वं महासत्त्वमविरहितं षड्भिः पारमिताभिः सत्कु
र्याद्गुरुकुर्यान्मानयेत् पूजयेदयमेव ततो बहुतरं पुण्यं प्रसवति। तत्कस्य हेतोः न हि कौशिक श्रावकप्रत्येकबुद्धानागम्य बोधिस
त्त्वास्तथागता अर्हन्तः सम्यक्संबुद्धा लोके प्रज्ञायन्ते। बोधिसत्त्वमहासत्त्वमागम्य श्रावकप्रत्येकबुद्धास्तथागतार्हन्तः सम्यक्संबुद्धा लोके प्रज्ञायन्
ते। तस्मात्तर्हि कौशिक सदेवमानुषासुरेण लोकेन बोधिसत्त्वो महासत्त्वः सत्कर्त्तव्यो गुरुकर्त्तव्यो मानयितव्यः पूजयितव्यः सगतः समितं चातु
रन्तं आवरणगुप्तिः संविधातव्या॥ शक्रपरिवर्त्तो नाम [illegible]॥ अथ खलु शक्रो देवानामिन्द्रो भगवन्तमेतदवोचत्। आश्चर्यं भगवन् यावद्
बोधिसत्त्वा महासत्त्वा प्रज्ञापारमितामुद्दिश्य पर्यवाप्नुवन्ति धारयन्ति वाचयन्ति यानि गमयन्ति सर्वधर्मकथां कथयन्ति अहो धार्मिका अनु
ग्राहयन्ति सत्त्वांश्च परिपाचयन्ति बुद्धक्षेत्रं च परिशोधयन्ति। बुद्धाश्च बुद्धत्वे स्थापयन्ति भगवतश्च पर्युपासनाय ये च कु
लपुत्राः कुलदुहितरश्च भगवतो पूजयितुं पूजयन्ति चीवरपिण्डपातशयनासनग्लानप्रत्ययभैषज्यपरिष्कारैः एते ते भगवन् धर्मास्तावदेव मनुष्य
ता यावदनुत्तरां सम्यक्संबोधिं बोधिसत्त्वो भवति। कुशलसंपदं च परिगृह्णन्ति। जनित्संपदं च परिवारसंपदं च भवति सम्पद्यन्ते संपदं च अस्ति

पंचविंशति
१४६

यदुत सत्वपरिपाकं च समाधिसम्मुखध्यानशीलं पदं परिगृह्णाति॥ उपायकौशल्येनात्मानं बुद्धविग्रहैर्निर्म्माणेन लोकधातोर्लोकधातुं संक्रामति। यत्र
बुद्धानां भगवतां सत्वा दानास्तिकं गत्वा दानपारमितायां वर्त्तापयति एवं शीलपारमितायां क्षान्तिपारमितायां वीर्य्यपारमितायां ध्यानपारमितायां
प्रज्ञापारमितायां वर्त्तापयति॥ अध्यात्मशून्यतायां यावद्वर्त्तापयति। एवं बहिर्द्धाशून्यतायामध्यात्मशून्यतायामध्यात्मशून्यतायामध्यात्मबहिर्द्धाशू
न्यतायां यावदभावस्वभावशून्यतायां वर्त्तापयति ध्यानानां वर्त्तापयति अप्रमाणानामारूप्यसमापत्तीनां वर्त्तापयति। स्मृत्युपस्थानानां वर्त्तापय
ति सम्यक्प्रहाणानामृद्धिपादानामिन्द्रियाणां बलानां बोध्यङ्गानामार्य्याष्टाङ्गस्य मार्गस्य वर्त्तापयति चतुर्णामार्य्यसत्यानामरिहानीदशानां तथा
गतबलानां वैशारद्यानां प्रतिसंविदां यावदष्टादशानामावेणिकानां बुद्धधर्म्माणां वर्त्तापयति। उपायकौशल्येन च धर्म्मं देशयति यावन्नयत
परिनिर्वापयति श्रावकयानेन प्रत्येकबुद्धयानेन बुद्धयानेन॥ ०॥ इति निर्वेधधर्म्महानं॥ अथ खलु शक्रो देवानामिन्द्रो भगवन्तमेतदवोचत्। आ
श्चर्य्यं भगवन् यावद्यस्या गम्भीरया प्रज्ञापारमितया परिगृहीतया सर्व्वाः पारमिताः परिगृहीता भवन्ति यदुत दानपारमिता शीलपारमिता
क्षान्तिपारमिता वीर्य्यपारमिता ध्यानपारमिता प्रज्ञापारमिता सर्व्वबोधिपक्षा धर्म्माः सर्व्वसमाधयः सर्व्वधारणीमुखानि सर्व्वशून्यता अप्रमा
णध्यानारूप्यसमापत्तयः सत्यानि दशबलानि वैशारद्यानि प्रतिसंविदः अष्टादशावेणिका बुद्धधर्म्माः। यावच्छ्रोतसमस्ताः स्कन्धधा
तवः आयतनानि प्रतीत्यसमुत्पादाङ्गानि च परिगृहीतानि भवन्ति श्रोतआपत्तिफलं परिगृहीतं भवति। एवं सकृदागामिफलमनागा
मिफलमर्हत्वं प्रत्येकबोधिः सर्व्वाकारज्ञता परिगृहीता भवति। एवमुक्ते भगवान् शक्रं देवानामिन्द्रमेतदवोचत्। एवमेतत् कौशिक
एवमेतत् प्रज्ञापारमितया परिगृहीतया सर्व्वाः पारमिताः परिगृहीता भवन्ति। एवं सर्व्वबोधिपक्षा धर्म्माः सर्व्वसमाधयः सर्व्वधारणी
मुखानि सर्व्वशून्यता अप्रमाणध्यानारूप्यसमापत्तयः सत्यान्यभिज्ञाः सर्व्वकुशलाः कर्म्मपथाः दशबलानि चत्वारि वैशारद्यानि चतस्रः
प्रतिसंविदः अष्टादशावेणिका बुद्धधर्म्माः यावच्छ्रुतसमस्तस्कन्धधात्वायतनानि प्रतीत्यसमुत्पादाङ्गानि यावत्सर्व्वाकारज्ञता परिगृही

गुरुः
१४४

तेन दानि पुनरपरं कौशिक प्रज्ञापारमितामुद्गृहीतया धारितया वाचितया पर्य्यवाप्तया लिखितया यानि इमानि मनसि[illegible] कुशलमूलानि फलानि इहि
[illegible]लोके दृष्ट एव धर्म्मे तान् शृणु साधु च सुष्ठु च मनसिकुरु भाषिष्येऽहं। एवं भगवन्निति शक्रो देवानामिन्द्रो भगवतः प्रत्यश्रौषीत्। भगवानेतदवोचत्। यः
कश्चित् कौशिक कुलपुत्रो वा कुलदुहिता वा मानावा मानवकायिका वा देवता इति मा नैका वा पुरुषा वा बोधिसत्वं महासत्वमिति प्रज्ञापारमितायां विवच
[illegible]कामा न विवदितुकामा न हन्ति विग्रहीतुकामा नो विरोधयितुकामा न विवदिष्यन्ति न विग्रहीष्यन्ति न विरोधयिष्यन्ति ते विवदितुकामानां विग्रहीतुकामानां विरोधयितुकामा
नामन्तर्द्धास्यन्ति विग्रहा विवादा विरोधाः। क्षिप्रं पुनर्नवा क्षान्तिकौशिकैषी विवदितुकामानो विग्रहीतुकामाना विरोधयितुकामानामन्तर्हितः प्रत्युप
स्थास्यन्ति। तत्कस्य हेतोः। तथा हि कौशिक बोधिसत्वेन महासत्वेन दीर्घरात्रं दानपारमितायां चरता एवं शीलपारमितायां क्षान्तिपारमितायां वी
र्य्यपारमितायां ध्यानपारमितायां प्रज्ञापारमितायां चरता यथोक्तागाः सत्वा दीर्घरात्रं विग्रहाभिविवादाभिरोधापन्नाः आध्यात्मिकवाह्याधर्म्माः
सर्व्वे ते परित्यक्ता यथाक्रमशः सत्वा दीर्घरात्रं सत्वाश्च शीलमापद्यन्ते तान्बोधिसत्वो महासत्व आध्यात्मिकवाह्यान्धर्म्मान्परित्यज्य तान्सत्वान् शीले प्रतिष्ठापय
ति येषां कृतशः सत्वा दीर्घरात्रं क्रोधव्यापादविहिंसामापद्यन्ते तान्बोधिसत्वो महासत्वः आध्यात्मिकवाह्यान्धर्म्मान्परित्यज्य तान्सत्वान्क्षान्तौ प्रतिष्ठापयति। ये
षां कृतशः सत्वा दीर्घरात्रं कौशीद्यमापद्यन्ते तान्बोधिसत्वो महासत्वः आध्यात्मिकवाह्यान्धर्म्मान्परित्यज्य तान्सत्वान्वीर्य्यपारमितायां प्रतिष्ठापयति येषां कृतशः सत्वा दीर्घरात्रं वि
क्षिप्तचित्ततामापद्यन्ते तान्बोधिसत्वो महासत्वः आध्यात्मिकवाह्यान्धर्म्मान्परित्यज्य तान्सत्वान्ध्याने प्रतिष्ठापयति येषां कृतशः सत्वा दीर्घरात्रं दौष्प्रज्ञमापद्यन्ते तान्बोधिसत्वो
महासत्वः आध्यात्मिकवाह्यान्धर्म्मान्परित्यज्य तान्सत्वान्महाप्रज्ञायां प्रतिष्ठापयति येषां कृतशः कौशिक सत्वा दीर्घरात्रं संसारसंसरन्ति यदुत तृष्णया प्रतिघच
र्य्येवर्त्तन्ते तान्बोधिसत्वो महासत्व उपायकौशल्येन तेषां सत्वानां विनीय तान्सत्वांश्चतुर्षु ध्यानेषु प्रतिष्ठापयति चतुर्ष्वप्रमाणेषु चतसृष्वारूप्यसमापत्ति
षु प्रतिष्ठापयति स्थापयति चतुर्षु स्मृत्युपस्थानेषु प्रतिष्ठापयति। एवं सम्यक्प्रहाणऋद्धिपादेन्द्रियबलबोध्यङ्गेष्वार्य्याष्टाङ्गमार्गे
षु शून्यतायामानिमित्तेऽप्रणिहिते समाधिधारणीमुखेषु च प्रतिष्ठापयति। चतुर्ष्वार्य्यसत्येषु [illegible] दशबलवैशारद्यप्रतिसंवित्स्वष्टाद
शावेणिकेषु बुद्धधर्म्मेषु प्रतिष्ठापयति। श्रोतआपत्तिफले सकृदागामिफलेऽनागामिफलेऽर्हत्वे प्रतिष्ठापयति प्रत्येकबोधौ प्रतिष्ठापयति॥ इमां कौशि
क बोधिसत्वस्य महासत्वस्य बोधिसत्वचारिकां चरतो दृष्टधार्म्मिकान्गुणानुशंसान् विध्यति॥ सांपरायिकांश्च [illegible] सम्यक्संबोधिमभिसंबुद्धः धर्म्मचक्रं प्रव

पञ्चविंशति
१४५

सुत्रान्यधायादिधानतुतिशाचनिरूपाधिशाअनिर्यात्साधानोपनिनिर्वापयिष्यंति॥ इमं कौशिक बोधिसत्वस्य महासत्वस्य सर्वलोकातायिकागुप्तानस
तराजेयानि॥ इति निराधन्वयहानमानि॥ पुनरपरं कौशिक यास्तन्य पयीउदेशकुलपुत्रा कुलदुहितरो वा इमां प्रज्ञापारमितामुद्गृही
ष्यंति धारयिष्यंति वाचयिष्यंति पर्यवाप्स्यंति योनिशश्च मनसिकरिष्यंति न तस्य पृथिवीप्रदेशमानावामानकायिकावादेवतात्र्यस्त्रिंशिकावाप
निरास्कायाप्ताहि मानिकावाः पूर्णीनाः नप्तानि चिह्नविरूपकर्तुं तत्र सा प्रज्ञापारमिता यो विग्रहाच विवादाच विनाशाय तेष्वचनपीपुण्यानसीसान
दृष्टा इत्यस्य प्रज्ञापारमितायाः ऽवजानानूपूर्वतात्रिष्यानेनियोचयः स्वस्माकर्तविष्यंति॥ न पथचिनामकोकगामघीनामोपधीतर्मीविधदा
महानाम कुतनोहानविनाऽहानगववित्राकाश्वदेवगानकेऽनाहसाख्यनासनप्राशकजानिपूनस्वादितकामः प्राशकजानुमंनधावह॥ ॥अथत
न्तुसायाक्षकानसनसमाधिनाभेपधर्णनापताकासदशसत्रानीविषसमोऽपध्यागञ्जनरक्तदावर्तनाग्रकस्यहेतोस्तथाहि सा धेपध्याने पयगुणात्येनस्थानानिविप
समाहिपमसितवति॥ नवमानवतीहिसाकामकोऽपधीश्च मवकौशिकयः कश्चित् कुलपुत्रो कुलदुहितरो वा॥ इमां प्रज्ञापारमितामुद्गृहीष्यति धारयिष्यति वाचयि
ष्यति पर्यवाप्स्यति योनिशश्च मनसिकरिष्यति तत्कौशिक कुपउसत्वापगाविग्रहविवादाविनाशाहरिष्यंति प्रज्ञापारमितायाः तेजसा प्रज्ञापारमितायाबलेनाि
उमहानेलधारिणयेउपशमिष्यंति यथापि नवबाल्यस्य केचनगउवाकचाम्सुनिनविवक्ष्यिष्यंति उपशमिष्यंति॥ इति निराधन्वयहानमा॥ तत्कस्य हेतोस्तथाहि कौशिक
प्रज्ञापारमिता सर्वधर्माणामुपशमयित्रीनविवर्धिका रागस्य द्वेषस्य मोहस्य यावत्सर्वक्लेशस्य प्रत्याविद्यायाः संस्कारानां विज्ञानस्य नामरूपषडायतनस्पर्शवेद
नातृष्णोपादानभवजातिजरामरणशोकपरिदेवदुःखदौर्मनस्योपायासानामुपशमयित्रीनविवर्धिका सर्वेः स्कन्धस्य निवरणानुशयपर्यवस्थानानां मानस्य दृष्टे
सत्कायदृष्टेः जीवदृष्टेः पोषदृष्टेः पुरुषदृष्टेः पुद्गलदृष्टेः मनुजदृष्टेः मानवदृष्टेः कारकदृष्टेः वेदकदृष्टेः जानकदृष्टेः पश्यकदृष्टेः उच्छेददृष्टेः शाश्वतदृष्टेश्चानितिदृष्टेः यावत्त
दृष्टेः कामानां मात्सर्यदौःशील्यव्यापादस्य कौसीद्यस्य विक्षेपस्य दौष्प्रज्ञस्य नित्यसंज्ञा सुखसंज्ञात्मसंज्ञाशुचिसंज्ञाशुभसंज्ञाहरूपाविचरितानां रूपग्राहस्य वेदना
संज्ञासंस्कारविज्ञानग्राहस्य दानपारमिताग्राहस्य शीलपारमिताग्राहस्य क्षान्तिपारमिताग्राहस्य वीर्यपारमिताग्राहस्य ध्यानपारमिताग्राहस्य प्रज्ञापारमिताग्र
हस्याध्यात्मशून्यताग्राहस्य बहिर्धाशून्यताग्राहस्य यावदभावस्वभावशून्यताग्राहस्य स्मृत्युपस्थानासम्यक्प्रहाणर्द्धिपादेन्द्रियबलबोध्यंगग्राहस्यार्यमार्गध्यानान
प्रमाणारूप्यसमापत्तिग्राहस्य सर्वाभिज्ञाग्राहकस्य सर्वधारणीमुखग्राहकस्य दशबलवैशारद्यप्रतिसंविदावेणिकबुद्धधर्मग्राहकस्य सर्वाकारज्ञताग्राहकस्य निर्वाणग्राहक

पुनः
१४५

ना अध्यात्मशून्यतां तत्रस्थितो न पश्यति धर्मस्थिततामुपादाय॥ नाध्यात्मबहिर्धाशून्यतां तत्रस्थितो न पश्यति धर्मस्थिततामुपादाय॥ न बहिर्धाशून्यतां तत्रस्थितो न पश्यति
धर्मस्थिततामुपादाय॥ नाध्यात्मबहिर्धाशून्यतां तत्रस्थितो न पश्यति धर्मस्थिततामुपादाय॥ न शून्यताशून्यतां तत्रस्थितो न पश्यति धर्मस्थिततामुपादाय॥ न महाशू
न्यतां तत्रस्थितो न पश्यति धर्मस्थिततामुपादाय॥ न परमार्थशून्यतां तत्रस्थितो न पश्यति धर्मस्थिततामुपादाय॥ न संस्कृतशून्यतां तत्रस्थितो न
पश्यति धर्मस्थिततामुपादाय॥ नासंस्कृतशून्यतां तत्रस्थितो न पश्यति धर्मस्थिततामुपादाय॥ नात्यन्तशून्यतां तत्रस्थितो न पश्यति धर्मस्थिततामुपादाय॥ ना
नवदाग्रशून्यतां तत्रस्थितो न पश्यति धर्मस्थिततामुपादाय॥ नानवकारशून्यतां तत्रस्थितो न पश्यति धर्मस्थिततामुपादाय॥ न प्रकृतिशून्यतां तत्रस्थितो न
पश्यति धर्मस्थिततामुपादाय॥ न सर्वधर्मशून्यतां तत्रस्थितो न पश्यति धर्मस्थिततामुपादाय॥ न स्वलक्षणशून्यतां तत्रस्थितो न पश्यति धर्मस्थिततामुपादाय॥
नानुपलम्भशून्यतां तत्रस्थितो न पश्यति धर्मस्थिततामुपादाय॥ नाभावशून्यतां तत्रस्थितो न पश्यति धर्मस्थिततामुपादाय॥ न स्वभावशून्यतां तत्रस्थितो न पश्यति
धर्मस्थिततामुपादाय॥ नाभावस्वभावशून्यतां तत्रस्थितो न पश्यति धर्मस्थिततामुपादाय॥ न स्मृत्युपस्थानानि तत्रस्थितो न पश्यति धर्मस्थिततामुपादाय॥ न सम्य
क्प्रहाणानि तत्रस्थितो न पश्यति धर्मस्थिततामुपादाय॥ न ऋद्धिपादांस्तत्रस्थितो न पश्यति धर्मस्थिततामुपादाय॥ नेन्द्रियाणि तत्रस्थितो न पश्यति धर्मस्थिततामुपा
दाय॥ न बलानि तत्रस्थितो न पश्यति धर्मस्थिततामुपादाय॥ न बोध्यंगानि तत्रस्थितो न पश्यति धर्मस्थिततामुपादाय॥ नार्याष्टांगमार्गं तत्रस्थितो न पश्यति ध
र्मस्थिततामुपादाय॥ नार्यसत्यानि तत्रस्थितो न पश्यति धर्मस्थिततामुपादाय॥ न ध्यानानि तत्रस्थितो न पश्यति धर्मस्थिततामुपादाय॥ नाप्रमाणानि तत्र
स्थितो न पश्यति धर्मस्थिततामुपादाय॥ नारूप्यसमापत्तीस्तत्रस्थितो न पश्यति धर्मस्थिततामुपादाय॥ नाष्टौ विमोक्षांस्तत्रस्थितो न पश्यति धर्मस्थिततामुपा
दाय॥ न नवानुपूर्वविहारसमापत्तीस्तत्रस्थितो न पश्यति धर्मस्थिततामुपादाय॥ न शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि तत्रस्थितो न पश्यति धर्मस्थि
ततामुपादाय॥ नाभिज्ञां तत्रस्थितो न पश्यति धर्मस्थिततामुपादाय॥ न समाधीस्तत्रस्थितो न पश्यति धर्मस्थिततामुपादाय॥ न धारणीमुखानि तत्रस्थितो न
पश्यति धर्मस्थिततामुपादाय॥ न दशतथागतबलानि तत्रस्थितो न पश्यति धर्मस्थिततामुपादाय॥ वैशारद्यानि प्रतिसंविदानि तत्रस्थितो न पश्यति धर्मस्थि
तामुपादाय॥ न चतस्रः प्रतिसंविदस्तत्रस्थितो न पश्यति धर्मस्थिततामुपादाय॥ न महाकरुणां तत्रस्थितो न पश्यति धर्मस्थिततामुपादाय॥ नाष्टादशावेणि

प्र.प्र·

[illegible]द्व धर्मान् द्रक्ष्यसि न पश्यसि धर्मस्थितताम् उपादाय॥ न स्रोतआपत्तिफलं द्रक्ष्यसि न पश्यसि धर्मस्थितताम् उपादाय॥ न सकृदागामिफलं द्रक्ष्यसि न पश्यसि ध
र्मस्थितताम् उपादाय॥ नानागामिफलं द्रक्ष्यसि न पश्यसि धर्मस्थितताम् उपादाय॥ नार्हत्त्वं द्रक्ष्यसि न पश्यसि धर्मस्थितताम् उपादाय॥ न प्रत्येकबोधिं द्रक्ष्यसि
न पश्यसि धर्मस्थितताम् उपादाय॥ न मार्गाकारज्ञतां द्रक्ष्यसि न पश्यसि धर्मस्थितताम् उपादाय॥ न सर्वाकारज्ञतां द्रक्ष्यसि न पश्यसि धर्मस्थितताम् उपादाय
न सर्वाकारज्ञतां द्रक्ष्यसि न पश्यसि धर्मस्थितताम् उपादाय॥ न बोधिं न बुद्धं न बुद्धधर्मान् द्रक्ष्यसि न पश्यसि धर्मस्थितताम् उपादाय॥ आह। कियच्चिरचरि
तः स भगवन् बोधिसत्वो महासत्वो भवति य इह गंभीरायां प्रज्ञापारमितायां योगमापद्यते॥ भगवानाह॥ [illegible]॥ तस्मात् [illegible] पर्यायाय
बोधिसत्वो महासत्वो [illegible] गंभीरायां प्रज्ञापारमितायां योगमापद्यते ध्यानपारमितायां योगमापद्यते वीर्यपारमितायां योगमापद्यते
क्षान्तिपारमितायां योगमापद्यते। शीलपारमितायां योगमापद्यते। दानपारमितायां योगमापद्यते॥ तथा उपायकौशल्येन [illegible]। यथा
[illegible] पर्युपासित [illegible] ये स्वकुशलमूलेन [illegible] मानयि
तुं [illegible] कुशलमूलानि सह [illegible]
न [illegible] सह संवसति। [illegible]॥ [illegible] संक्रामति। सत्वान्यपि [illegible]
[illegible] गंभीरायां प्रज्ञापारमितायां योगमापद्यते [illegible] बोधिसत्वयानिकाः कुलपुत्राः कुलदुहितरश्च [illegible]
[illegible]
[illegible] प्रज्ञापारमितायां [illegible] पर्षदः प्रक्रमिष्यन्ति। ते पुनर
[illegible] कुलपुत्राः कुलदुहितरश्च [illegible] गंभीरायां प्रज्ञापारमितायां [illegible] प्रक्रमिष्यन्ति। [illegible]
[illegible] कुलपुत्राः कुलदुहितरश्च [illegible] गंभीरायां प्रज्ञापारमितायां [illegible]
[illegible] प्रज्ञापारमितायां [illegible]। ते न [illegible] संवर्तनीयेन कर्मणा [illegible] गंभीरायां प्रज्ञापारमिता

३५

प्रत्याख्यास्यन्ति। ते प्रज्ञापारमितां प्रत्याख्यायातीतानागतप्रत्युत्पन्नानां बुद्धानां भगवतां सर्वाकारज्ञतां प्रत्याख्यास्यन्ति। ते तेन प्रत्याख्यानव्यसनकर्माभिसंस्कारेण स
कृतेनोपचितेन धर्मव्यसनसंवर्तनीयेन कर्मणा कृतेनोपचितेन बहूनि वर्षाणि बहूनि वर्षशतानि बहूनि वर्षसहस्राणि बहूनि वर्षशतसहस्राणि बहूनि वर्ष
कोटीनियुतशतसहस्राणि नरकेषूपपत्स्यन्ते। ते महानरकान्महानरकं संक्रमिष्यन्ति। तेषां महानरकान्महानरकं संक्रामतां तेजःसंवर्तनी वा अप्संवर्तनी वा वायुसंवर्त
नी वा प्रादुर्भविष्यति। ततस्तेजःसंवर्तन्यां वा अप्संवर्तन्यां वा वायुसंवर्तन्यां वा प्रादुर्भूतायां अन्येषु लोकधातुषु महानरकेषूपपत्स्यन्ते। तत्रोपपन्नास्तत्र प्र
क्षिप्ताः। तत्रोपपन्नाः समानास्ते महानरकान्महानरकं संक्रमिष्यन्ति। तेषां महानरकान्महानरकं संक्रामतां पुनरेव तेजःसंवर्तनी वा अप्संवर्तनी वा वायुसंव
र्तनी वा प्रादुर्भविष्यति। ततस्तेजःसंवर्तन्यां वा अप्संवर्तन्यां वा वायुसंवर्तन्यां वा प्रादुर्भूतायां अन्येषु लोकधातुषु महानरकेषूपपत्स्यन्ते। तत्रोपपन्नास्तत्र प्र
क्षिप्ताः तत्रोपपन्नास्ते महानरकान्महानरकं संक्रमिष्यन्ति। तत्रापि पुनरेव तेजःसंवर्तनी वा अप्संवर्तनी वा वायुसंवर्तनी वा प्रादुर्भविष्यति। ततस्तेजःसंव
र्तन्यामप्संवर्तन्यां वा वायुसंवर्तन्यां वा प्रादुर्भूतायां पूर्वस्यां दिशि महानरकेषूपपत्स्यन्ते। दक्षिणस्यां दिशि महानरकेषूपपत्स्यन्ते। पश्चिमस्यां दिशि महानरकेषू
पपत्स्यन्ते। उत्तरस्यां दिशि महानरकेषूपपत्स्यन्ते। उत्तरपूर्वस्यां दिशि महानरकेषूपपत्स्यन्ते। पूर्वदक्षिणस्यां दिशि महानरकेषूपपत्स्यन्ते। दक्षिणपश्चिमायां दि
शि महानरकेषूपपत्स्यन्ते। पश्चिमोत्तरस्यां दिशि महानरकेषूपपत्स्यन्ते॥ उपरिष्टाद्दिशि महानरकेषूपपत्स्यन्ते। अधस्ताद्दिशि महानरकेषूपपत्स्यन्ते॥ तत्रापि मह
नरकान्महानरकं संक्रमिष्यन्ति। तत्रापि पुनरेव संवर्तनी वा अप्संवर्तनी वा वायुसंवर्तनी वा प्रादुर्भविष्यति। ततस्तेजःसंवर्तन्यां वा अप्संवर्तन्यां वा वायुसंवर्तन्यां वा प्रा
दुर्भूतायां पुनरेव ततश्च्युत्वा तेन धर्मव्यसनसंवर्तनीयेन कर्मणा [illegible] पुनरपि [illegible] उपपत्स्यन्ते। ते पुनरेव महानरकान्महानरकं संक्रमिष्यन्ति। तत्रोपपन्नाम
हानरकेषूपपन्ना विचित्राणि दुःखानि प्रत्यनुभविष्यन्ति। तीव्राणि नैरयिकाणि दुःखानि प्रत्यनुभविष्यन्ति। यावत् पुनरेव तेजःसंवर्तनी वा अप्संवर्तनी वा वायुसंवर्तनी वा
प्रादुर्भविष्यति॥ ततस्तेजःसंवर्तन्यां वा अप्संवर्तन्यां वा वायुसंवर्तन्यां वा प्रादुर्भूतायां ततश्च्युत्वा पूर्वस्यां दिशि लोकधातुषूपपत्स्यन्ते तिर्यग्योनिकानां
सभागतायै। एवं दक्षिणस्यां दिशि पश्चिमायामुत्तरस्यां दिशि उत्तरपूर्वस्यां पूर्वदक्षिणस्यां दक्षिणपश्चिमायां पश्चिमोत्तरस्यां दिश्यधस्तादुपरिष्टाद्दिशि
लोकधातुषूपपत्स्यन्ते तिर्यग्योनिकानां सभागतायै। पुनरेव यावत् समन्ताद्दशसु दिक्षु सर्वलोकधातुषूपपत्स्य [illegible] यमलोके उपपत्स्यन्ते तत्रोपपन्नाश्च दुः

प्रथम·

सवर्तनीयं कर्म क्षपयित्वा कदाचित्कर्हिचिन्मनुष्यप्रतिलाभं लभते तस्यान्यत्र यत्रोपपद्यते तत्र जात्यन्धः कुले प्रपद्यते न च अल्पकुले वा पपद्यते
दुष्कुले पपद्यते कि धनकान कुले पपद्यते तत्र तत्रोपपद्यमानाः समानाः अश्वतरविपाकं [illegible] श्वतरविपाकं [illegible] कालश्वतरविपाकं [illegible]
पतेति। अहस्तकाश्वहरि पांके। [illegible] काश्वतरविपाकं। कुष्ठिनश्वतरविपाकं किल्विषाश्वतरविपाकं कुब्जकाश्वतरविपाकं। यत्तेन बहु दुःखं वा न सं [illegible]
गच्छता प्रत्यनुभवति। यथा पितृकर्म व्यसनसंवर्तनीयस्य कर्मणः कृतस्योपचितस्य निष्ठस्य समाप्तस्य परिपूर्णस्य विपाकेन। [illegible] नरके पत्रानि
कर्मणे चायं कृतं पूर्वं भगवन्तानां तथा धर्मव्यसनसंवर्तनीयस्य कर्मणः कृतस्योपचितस्य प्रतिवेदिका विनयति। भगवानाह। प्रतिवादि कतिभिन्द
पुत्र नरके श्रमस्य धर्मव्यसनसंवर्तनीयस्य कर्मणः कृतस्योपचितस्य मार्गमेतानि प्रज्ञापारमितादेश धर्मानां दानपारमितां प्रतिवहितव्याम स्यते [illegible]
ति जात्र [illegible] वहिर्मस्मानि [illegible] तथा नेष धर्माविनयान [illegible] तन्नं दं तथागता अर्हता सम्यक्संबुद्धेन त्रिपिटे [illegible] प्रतिपद्य [illegible]
वधिष्यति तत्र तत्र कालमूपहत्य पर्वतं कालमूपहत्य मत्स्यं [illegible] तथा सर्वं सविधं कृत्वा पत्रं तत्रानं सविधं कृत्वा कामास्य यं [illegible]
यं वर्णं प्रज्ञापारमितामभावानां [illegible] प्रतिवहिताम स्यते पर्वतां [illegible] अहयिष्यति। न च लपूर्वं [illegible] पत्राद [illegible]
न [illegible] धर्मदूषकानां [illegible] प्रपत्न [illegible] नाधदित्या [illegible]
[illegible] भगवान [illegible] पूर्तितः [illegible] वादिनयाः [illegible] पात्रं [illegible]
सन्नाप [illegible] पृथक् प्रज्ञापारमितादि पयति धर्मदूषकस्य प [illegible] सावदितव्याने नायक [illegible] निक्रायाम लौकिकावति॥ आह॥ नरकस्य पुनर्ह
गर्भस्य धर्मदूषकस्य पुद्गलस्य गत्रापपन्नस्यालप्तावस्य प्रमाणमस्याऽ॥ भगवानाह॥ तिष्ठतु श्रमन [illegible] पुत्र धर्मदूषकस्य पुद्गलस्य गत्रापपन्नस्यालप्तावस्य
[illegible] धर्मदूषकस्य पुद्गलस्य गत्रापपन्नस्यालप्तावस्य प्रमाणं [illegible] स्वाद् [illegible] मान [illegible] ने वा [illegible] मातृकं [illegible] द्वः [illegible]
स्यवालादपरः [illegible] तथा [illegible] निशान्तरं [illegible] धर्मदूषकस्य [illegible] प्रमाणं यत्र [illegible] पतिरवि नतारा
नात्र [illegible] सन्दर्भी पुत्रश्रावकाणां मकापीदिदं तस्याऽसलतावस्य प्रमाणं एवि ष्यति॥ आह। भगवान्त्राणि [illegible] मायां कनतायामालोकः कृत्वा विद्यानन

धर्मव्यसनसंवर्तनीयेन कर्मणा कृतेनोपचितेन धर्मदूषकपुद्गलाः [illegible] सत्त्वं परिगृहीष्यति॥ भगवानाह। [illegible] पुत्र पश्चिमायां [illegible] आलोककृता
हविष्यति। यदनेन धर्मव्यसनसंवर्तनीयेन कर्मणा कृतेनोपचितेन [illegible] समाप्तेन परिपूर्णेन देवेषु [illegible] नवतां [illegible] वं विनेयमसां [illegible]
[illegible] धर्मव्यसनसंवर्तनीयस्य कर्मणः [illegible] विनिर्दिष्टा। [illegible] विनं कृत्वा [illegible] प्रतिक्षिपति। माहे [illegible] मी [illegible]
नि दुःखानि [illegible] रूपम। कथं [illegible] कर्म [illegible] कायकर्म वा कर्म मनस्कर्म [illegible] वा [illegible] रहितो वा [illegible] इमं निर्दिष्टं तेन [illegible]
सद्धर्मप्रतिक्षेपकस्य पुद्गलस्य माहे वा इमया [illegible] नि दुःखानि [illegible] तथागतज्ञानपथं धर्मविनयं तथा संघं वा नपर्युपास्य [illegible] पूर्व
[illegible] तृप्यपथं [illegible] दानादि [illegible] अ [illegible] वेदयमिति। पुनरपि [illegible] तथागतं नमस्य [illegible] धर्मप्रतिक्षेपकस्य कर्मस्य [illegible]
तेनापचितेन धर्मव्यसनसंवर्तनीयकर्म कृतम्यधिकं [illegible] भगवानाह॥ धर्मप्रतिक्षेपकस्य कर्मस्य [illegible] कृतेनोपचितेन धर्मव्यसनसंवर्तनीयं कर्म कृतमपि
[illegible] वतन्ततस्य [illegible] धर्मविनयमाह पूर्ववद् प्रतिक्षिपति वधिष्यति। यश्च मार्गो हीनां प्रज्ञापारमितां [illegible] मस्यां प्रज्ञापारमितायास् [illegible]
[illegible] प्रतिवहितया [illegible] भगवतां बोधिर्दूषिता भवति प्रतिवहिता भवति [illegible] अधि [illegible] प्रतिवहितया [illegible] अनागत प्रत्युत्पन्नानां बुद्धानां भगवतां स
र्वाकारज्ञता दूषिता भवति प्रतिवहिता भवति॥ सर्वाकारज्ञता दूषितया प्रतिवहितया धर्मो दूषितो भवति प्रतिवहितो भवति। धर्मे प्रतिवहिते न संघः प्र
तिवहितो। न सौकिकी सम्यग्दृष्टिः प्रतिवहिता भवति। लौकिक्या सम्यग्दृष्ट्या प्रतिवहितया दानपारमिता प्रतिवहिता भवति। शीलपारमिता प्रतिवहिता
भवति। क्षान्तिपारमिता प्रतिवहिता भवति। वीर्यपारमिता प्रतिवहिता भवति। ध्यानपारमिता प्रतिवहिता भवति। प्रज्ञापारमिता प्रतिवहिता भवति॥
अध्यात्मशून्यता प्रतिवहिता भवति। बहिर्धाशून्यता प्रतिवहिता भवति। अध्यात्मबहिर्धाशून्यता प्रतिवहिता भवति॥ शून्यताशून्यता प्रतिवहिता भवति॥ महाशून्य
ता प्रतिवहिता भवति। परमार्थशून्यता प्रतिवहिता भवति। संस्कृतशून्यता प्रतिवहिता भवति। असंस्कृतशून्यता प्रतिवहिता भवति। अत्यन्तशून्यता प्रतिवहि
ता भवति। अनवराग्रशून्यता प्रतिवहिता भवति। अनवकारशून्यता प्रतिवहिता भवति। प्रकृतिशून्यता प्रतिवहिता भवति। सर्वधर्मशून्यता प्रतिवहिता भवति
लक्षणशून्यता प्रतिवहिता भवति॥ अनुपलंभशून्यता प्रतिवहिता भवति। अभावशून्यता प्रतिवहिता भवति। स्वभावशून्यता प्रतिवहिता भवति। अभावस्व
भावशून्यता प्रतिवहिता भवति॥ चत्वारि स्मृत्युपस्थानानि प्रतिवहितानि भवन्ति। सम्यक्प्रहाणानि प्रतिवहितानि भवन्ति। चत्वार ऋद्धिपादा प्रतिवहिता भवन्ति

प्रथम

पंचेंद्रियाणि प्रतिविहितानि भवंति। पंचबलानि प्रतिविहितानि भवंति॥ सप्तबोध्यंगानि प्रतिविहितानि भवंति॥ आर्याष्टांगमार्गः प्रतिविहितो भवति। आर्यसत्यानि प्रतिविहितानि भवंति॥ ध्यानानि प्रतिविहितानि भवंति। अप्रमाणानि प्रतिविहितानि भवंति॥ आरूप्यसमापत्तयः प्रतिविहिता भवंति। अष्टौ विमोक्षाः प्रतिविहिता भवंति॥ नवानुपूर्वविहारसमापत्तयः प्रतिविहिता भवंति॥ शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि प्रतिविहितानि भवंति॥ पंचाभिज्ञाः प्रतिविहिता भवंति॥ सर्वसमाधयः प्रतिविहिता भवंति॥ सर्वधारणीमुखानि प्रतिविहितानि भवंति॥ दश तथागतबलानि प्रतिविहितानि भवंति। चत्वारि वैशारद्यानि प्रतिविहितानि भवंति। चतस्रः प्रतिसंविदः प्रतिविहितानि भवंति॥ महाकरुणा प्रतिविहिता भवति॥ अष्टादशावेणिका बुद्धधर्माः प्रतिविहिता भवंति॥ सर्वज्ञता प्रतिविहिता भवति॥ मार्गाकारज्ञता प्रतिविहिता भवति। सर्वाकारज्ञता प्रतिविहिता भवति॥ सर्वाकारज्ञतायां प्रतिविहितया॥ उपायासंख्ययाप्रमाणस्य पंचस्कंधः परिगृहीता भवंति॥ सुभूतिराह। उपायासंख्यया [illegible] पूर्वस्कंधं परिगृह्णा उपायमसंख्येयमप्रमाणं [illegible] मेनस्यं न [illegible] परिगृहीतं भवति॥ [illegible] प्रज्ञापारमितां प्रतिव[illegible]॥ [illegible] मांगृहीतां प्रज्ञापारमितां प्रतिवक्ष्यंति॥ भगवानाह॥ चतुर्भिः सुभूते आकारैः [illegible] मांगृहीतां प्रज्ञापारमितां प्रतिवक्ष्यंति॥ [illegible]॥ कतमैर्भगवंश्चतुर्भिः॥ भगवानाह॥ मानाधिष्ठिताश्च [illegible] परिपाचयंति। [illegible] मांगृहीतां प्रज्ञापारमितां प्रतिवक्ष्यंति॥ अनेन सुभूते प्रथमेनाकारेण मांगृहीतां प्रज्ञापारमितां प्रतिवक्ष्यंति॥ [illegible] पूर्वधर्मप[illegible]धनानि विपत्स्यंति॥ नाधिमात्रकेन प्रसादेन प्रतिपत्स्यंते। अनेन द्वितीयेनाकारेण मांगृहीतां प्रज्ञापारमितां प्रतिवक्ष्यंति। पापमित्रहस्तगताश्च सुभूते [illegible] पूर्वपा[illegible] अनेन तृतीयेनाकारेण मांगृहीतां प्रज्ञापारमितां प्रतिवक्ष्यंति। [illegible] कर्षयिष्यंति परांश्च संसादयिष्यंति। अनेन चतुर्थेनाकारेण मांगृहीतां प्रज्ञापारमितां प्रतिवक्ष्यंति॥ आह॥ अनधिमात्रा भगवन्निमां प्रज्ञापारमितानधियुक्तेन कुशलमूलवद्भिः पापमित्रहस्तगतैः॥ भगवानाह॥ एवमेतत् सुभूते अनधिमात्रयं गृहीतां प्रज्ञापारमितानधियुक्तैः [illegible] कुशलमूलैः [illegible] पापमित्रहस्तगतैः॥ आह॥ कियद्गंभीरा भगवन्नियं प्रज्ञापारमिता यथेयं नाधिमात्रा॥ भगवानाह॥ रूपं सुभूते अबद्धममुक्तं॥ तत्कस्य हेतोः। रूपस्वभावो हि सुभूते रूपं। वेदना सुभूते अबद्धा अमुक्ता। तत्कस्य हेतोः॥ वेदनास्वभावा हि सुभूते वेदना॥ संज्ञा सुभूते अबद्धा अमुक्ता॥ तत्कस्य हेतोः॥ संज्ञास्वभावा हि सुभूते संज्ञा॥ संस्काराः सुभूते अबद्धा अमुक्ताः॥ तत्कस्य हेतोः॥ संस्कारास्वभावा हि सुभूते संस्काराः॥ विज्ञानं सुभूते अबद्धममुक्तं॥ तत्कस्य हेतोः॥ विज्ञानस्वभावं हि सुभूते विज्ञानं॥ चक्षुः सुभूते अबद्धममुक्तं॥ तत्कस्य हेतोः॥ चक्षुःस्वभावं हि सुभूते चक्षुः॥ श्रोत्रं सुभूते अबद्धममुक्तं॥ तत्कस्य हेतोः॥ श्रोत्रस्वभावं हि सुभूते श्रोत्रं॥ घ्राणं सुभूते अबद्धममुक्तं॥ तत्कस्य हेतोः॥ घ्राणस्वभावं

3४

हि सुभूते घ्राणं॥ जिह्वा सुभूते अबद्धामुक्ता॥ तत्कस्य हेतोः॥ जिह्वास्वभावा हि सुभूते जिह्वा॥ कायः सुभूते अबद्धोऽमुक्तः॥ तत्कस्य हेतोः। कायस्वभावो हि सुभूते कायः॥ मनः सुभूते अबद्धामुक्तः॥ तत्कस्य हेतोः॥ मनःस्वभावो हि सुभूते मनः॥ रूपं सुभूते अबद्धममुक्तं॥ तत्कस्य हेतोः। रूपस्वभावो हि सुभूते रूपं॥ शब्दः सुभूते अबद्धममुक्तं॥ तत्कस्य हेतोः॥ शब्दस्वभावो हि सुभूते शब्दः॥ गंधः सुभूते अबद्धोऽमुक्तः॥ तत्कस्य हेतोः॥ गंधस्वभावो हि सुभूते गंधः॥ रसः सुभूते अबद्धोऽमुक्तः॥ तत्कस्य हेतोः॥ रसस्वभावो हि सुभूते रसः॥ स्पर्शः सुभूते अबद्धोऽमुक्तः॥ तत्कस्य हेतोः॥ स्पर्शस्वभावो हि सुभूते स्पर्शः॥ धर्माः सुभूते अबद्धा अमुक्ताः॥ तत्कस्य हेतोः॥ धर्मास्वभावा हि सुभूते धर्माः॥ चक्षुर्विज्ञानं सुभूते अबद्धममुक्तं॥ तत्कस्य हेतोः॥ चक्षुर्विज्ञानस्वभावो हि सुभूते चक्षुर्विज्ञानं॥ श्रोत्रविज्ञानं सुभूते अबद्धममुक्तं॥ तत्कस्य हेतोः॥ श्रोत्रविज्ञानस्वभावो हि सुभूते श्रोत्रविज्ञानं॥ घ्राणविज्ञानं सुभूते अबद्धममुक्तं॥ तत्कस्य हेतोः॥ घ्राणविज्ञानस्वभावो हि सुभूते घ्राणविज्ञानं॥ जिह्वाविज्ञानं सुभूते अबद्धममुक्तं॥ तत्कस्य हेतोः॥ जिह्वाविज्ञानस्वभावो हि सुभूते जिह्वाविज्ञानं॥ कायविज्ञानं सुभूते अबद्धममुक्तं॥ तत्कस्य हेतोः॥ कायविज्ञानस्वभावो हि सुभूते कायविज्ञानं॥ मनोविज्ञानं सुभूते अबद्धममुक्तं॥ तत्कस्य हेतोः॥ मनोविज्ञानस्वभावो हि सुभूते मनोविज्ञानं॥ चक्षुःसंस्पर्शः सुभूते अबद्धोऽमुक्तः॥ तत्कस्य हेतोः॥ चक्षुःसंस्पर्शस्वभावो हि सुभूते चक्षुःसंस्पर्शः॥ श्रोत्रसंस्पर्शः सुभूते अबद्धोऽमुक्तः॥ तत्कस्य हेतोः॥ श्रोत्रसंस्पर्शस्वभावो हि सुभूते श्रोत्रसंस्पर्शः॥ घ्राणसंस्पर्शः सुभूते अबद्धोऽमुक्तः॥ तत्कस्य हेतोः॥ घ्राणसंस्पर्शस्वभावो हि घ्राणसंस्पर्शः॥ जिह्वासंस्पर्शः सुभूते अबद्धोऽमुक्तः॥ तत्कस्य हेतोः॥ जिह्वासंस्पर्शस्वभावो हि सुभूते जिह्वासंस्पर्शः॥ कायसंस्पर्शः सुभूते अबद्धोऽमुक्तः॥ तत्कस्य हेतोः॥ कायसंस्पर्शस्वभावो हि सुभूते कायसंस्पर्शः॥ मनःसंस्पर्शः सुभूते अबद्धोऽमुक्तः॥ तत्कस्य हेतोः॥ मनःसंस्पर्शस्वभावो हि सुभूते मनःसंस्पर्शः॥ चक्षुःसंस्पर्शप्रत्ययवेदना सुभूते अबद्धामुक्ता॥ तत्कस्य हेतोः॥ चक्षुःसंस्पर्शप्रत्ययवेदनास्वभावा हि सुभूते चक्षुःसंस्पर्शप्रत्ययवेदना॥ श्रोत्रसंस्पर्शप्रत्ययवेदना सुभूते अबद्धामुक्ता॥ तत्कस्य हेतोः॥ श्रोत्रसंस्पर्शप्रत्ययवेदनास्वभावा हि सुभूते श्रोत्रसंस्पर्शप्रत्ययवेदना॥ घ्राणसंस्पर्शप्रत्ययवेदना सुभूते अबद्धामुक्ता॥ तत्कस्य हेतोः॥ घ्राणसंस्पर्शप्रत्ययवेदनास्वभावा हि सुभूते घ्राणसंस्पर्शप्रत्ययवेदना॥ जिह्वासंस्पर्शप्रत्ययवेदना सुभूते अबद्धामुक्ता॥ तत्कस्य हेतोः॥ जिह्वासंस्पर्शप्रत्ययवेदनास्वभावा हि सुभूते जिह्वासंस्पर्शप्रत्ययवेदना॥ कायसंस्पर्शप्रत्ययवेदना सुभूते अबद्धामुक्ता॥ तत्कस्य हेतोः॥ कायसंस्पर्शप्रत्ययवेदनास्वभावा हि सुभूते कायसंस्पर्शप्रत्ययवेदना॥ मनःसंस्पर्शप्रत्ययवेदना सुभूते अबद्धामुक्ता॥ तत्कस्य हेतोः॥ मनःसंस्पर्शप्रत्ययवेदनास्वभावा हि सुभूते मनःसंस्पर्शप्रत्ययवेदना॥ पृथिवीधातुः सुभूते अबद्धोऽमुक्तः॥ तत्कस्य हेतोः॥ पृथिवीधातुस्वभावो हि सुभूते पृथिवीधातुः॥ अब्धातुः सुभूते अबद्धोऽमुक्तः॥ तत्कस्य हेतोः॥ अब्धातुस्वभावो हि सुभूते अब्धातुः॥ तेजोधातुः सुभू

प्रथम

ऽबद्धोऽमुक्तः॥ तत्कस्य हेतोः॥ तेजोधातुस्वभावो हि सुभूते तेजोधातुः॥ वायुधातुः सुभूते अबद्धोऽमुक्तः॥ तत्कस्य हेतोः॥ वायुधातुस्वभावो हि वायुधातुः॥ आकाशधातुः सुभूते अबद्धोऽमुक्तः॥ तत्कस्य हेतोः॥ आकाशधातुस्वभावो हि सुभूते आकाशधातुः॥ विज्ञानधातुः सुभूते अबद्धोऽमुक्तः॥ तत्कस्य हेतोः॥ विज्ञानधातुस्वभावो हि सुभूते विज्ञानधातुः॥ अविद्या सुभूते अबद्धाऽमुक्ता॥ तत्कस्य हेतोः॥ अविद्यास्वभावा हि सुभूते अविद्या॥ संस्काराः सुभूते अबद्धाऽमुक्ताः॥ तत्कस्य हेतोः॥ संस्कारास्वभावा हि सुभूते संस्काराः॥ विज्ञानं सुभूते ऽबद्धोऽमुक्तः॥ तत्कस्य हेतोः॥ विज्ञानस्वभावो हि सुभूते विज्ञानं॥ नामरूपं सुभूते अबद्धोऽमुक्तः॥ तत्कस्य हेतोः॥ नामरूपस्वभावो हि सुभूते नामरूपं॥ षडायतनं सुभूते अबद्धोऽमुक्तः॥ तत्कस्य हेतोः॥ षडायतनस्वभावो हि सुभूते षडायतनं॥ स्पर्शः सुभूते अबद्धोऽमुक्तः॥ तत्कस्य हेतोः॥ स्पर्शस्वभावो हि सुभूते स्पर्शः॥ वेदना सुभूते ऽबद्धाऽमुक्ता॥ तत्कस्य हेतोः॥ वेदनास्वभावा हि सुभूते वेदना॥ तृष्णा सुभूते अबद्धाऽमुक्ता॥ तत्कस्य हेतोः॥ तृष्णास्वभावा हि सुभूते तृष्णा॥ उपादानं सुभूते अबद्धोऽमुक्तः॥ तत्कस्य हेतोः॥ उपादानस्वभावो हि सुभूते उपादानः॥ भवः सुभूते ऽबद्धोऽमुक्तः॥ तत्कस्य हेतोः॥ भवस्वभावो हि सुभूते भवः॥ जातिः सुभूते अबद्धाऽमुक्ता॥ तत्कस्य हेतोः॥ जातिस्वभावा हि सुभूते जातिः॥ जरामरणं सुभूते अबद्धोऽमुक्तः॥ तत्कस्य हेतोः॥ जरामरणस्वभावो हि सुभूते जरामरणं॥ दानपारमिता सुभूते अबद्धाऽमुक्ता॥ तत्कस्य हेतोः॥ दानपारमितास्वभावा हि सुभूते दानपारमिता॥ शीलपारमिता सुभूते अबद्धा तत्कस्य हेतोः॥ शीलपारमितास्वभावा हि सुभूते शीलपारमिता॥ क्षान्तिपारमिता सुभूते अबद्धाऽमुक्ता॥ तत्कस्य हेतोः॥ क्षान्तिपारमितास्वभावा हि सुभूते क्षान्तिपारमिता॥ वीर्यपारमिता सुभूते अबद्धाऽमुक्ता॥ तत्कस्य हेतोः॥ वीर्यपारमितास्वभावा हि सुभूते वीर्यपारमिता॥ ध्यानपारमिता सुभूते अबद्धाऽमुक्ता॥ तत्कस्य हेतोः॥ ध्यानपारमितास्वभावा हि सुभूते ध्यानपारमिता॥ प्रज्ञापारमिता सुभूते अबद्धाऽमुक्ता॥ तत्कस्य हेतोः॥ प्रज्ञापारमितास्वभावा हि सुभूते प्रज्ञापारमिता॥ अध्यात्मशून्यता सुभूते अबद्धाऽमुक्ता। तत्कस्य हेतोः॥ अध्यात्मशून्यतास्वभावा हि सुभूते अध्यात्मशून्यता॥ बहिर्धाशून्यता सुभूते अबद्धाऽमुक्ता। तत्कस्य हेतोः॥ बहिर्धाशून्यतास्वभावा हि सुभूते बहिर्धाशून्यता॥ अध्यात्मबहिर्धाशून्यता सुभूते अबद्धाऽमुक्ता॥ तत्कस्य हेतोः॥ अध्यात्मबहिर्धाशून्यतास्वभावा हि सुभूते अध्यात्मबहिर्धाशून्यता॥ शून्यताशून्यता सुभूते अबद्धाऽमुक्ता॥ तत्कस्य हेतोः॥ शून्यताशून्यतास्वभावा हि सुभूते शून्यताशून्यता॥ महाशून्यता सुभूते अबद्धाऽमुक्ता॥ तत्कस्य हेतोः॥ महाशून्यतास्वभावा हि सुभूते महाशून्यता॥ परमार्थशून्यता सुभूते अबद्धाऽमुक्ता॥ तत्कस्य हेतोः॥ परमार्थशून्यतास्वभावा हि सुभूते परमार्थशून्यता॥ संस्कृतशून्यता सुभूते अबद्धाऽमुक्ता॥ तत्कस्य हेतोः॥ संस्कृतशून्यतास्वभावा हि सुभूते संस्कृतशून्यता॥ असंस्कृतशून्यता सुभूते अबद्धाऽमुक्ता॥ तत्कस्य हे-

३२

तोः॥ असंस्कृतशून्यतास्वभावा हि सुभूते असंस्कृतशून्यता॥ अत्यन्तशून्यता सुभूते अबद्धाऽमुक्ता॥ तत्कस्य हेतोः॥ अत्यन्तशून्यतास्वभावा हि सुभूते अत्यन्तशून्यता॥ अनवराग्रशून्यता सुभूते अबद्धाऽमुक्ता। तत्कस्य हेतोः॥ अनवराग्रशून्यतास्वभावा हि सुभूते अनवराग्रशून्यता॥ अनवकारशून्यता सुभूते अबद्धाऽमुक्ता॥ तत्कस्य हेतोः॥ अनवकारशून्यतास्वभावा हि सुभूते अनवकारशून्यता॥ प्रकृतिशून्यता सुभूते अबद्धाऽमुक्ता॥ तत्कस्य हेतोः। प्रकृतिशून्यतास्वभावा हि सुभूते प्रकृतिशून्यता॥ सर्वधर्मशून्यता सुभूते अबद्धाऽमुक्ता॥ तत्कस्य हेतोः॥ सर्वधर्मशून्यतास्वभावा हि सुभूते सर्वधर्मशून्यता॥ स्वलक्षणशून्यता सुभूते अबद्धाऽमुक्ता॥ तत्कस्य हेतोः॥ स्वलक्षणशून्यतास्वभावा हि सुभूते स्वलक्षणशून्यता॥ अनुपलम्भशून्यता सुभूते अबद्धाऽमुक्ता॥ तत्कस्य हेतोः॥ अनुपलम्भशून्यतास्वभावा हि सुभूते अनुपलम्भशून्यता॥ अभावशून्यता सुभूते अबद्धाऽमुक्ता। तत्कस्य हेतोः॥ अभावशून्यतास्वभावा हि सुभूते अभावशून्यता॥ स्वभावशून्यता सुभूते अबद्धाऽमुक्ता। तत्कस्य हेतोः॥ स्वभावशून्यतास्वभावा हि सुभूते स्वभावशून्यता॥ अभावस्वभावशून्यता सुभूते अबद्धाऽमुक्ता॥ तत्कस्य हेतोः॥ अभावस्वभावशून्यतास्वभावा हि सुभूते अभावस्वभावशून्यता॥ स्मृत्युपस्थानानि सुभूते अबद्धान्यमुक्तानि। तत्कस्य हेतोः॥ स्मृत्युपस्थानस्वभावान्येव सुभूते स्मृत्युपस्थानानि॥ सम्यक्प्रहाणानि सुभूते अबद्धान्यमुक्तानि॥ तत्कस्य हेतोः॥ सम्यक्प्रहाणस्वभावान्येव सुभूते सम्यक्प्रहाणानि॥ ऋद्धिपादाः सुभूते अबद्धा अमुक्ताः॥ तत्कस्य हेतोः॥ ऋद्धिपादाः स्वभावा एव सुभूते ऋद्धिपादाः॥ इन्द्रियाणि सुभूते अबद्धान्यमुक्तानि॥ तत्कस्य हेतोः॥ इन्द्रियाणि स्वभावान्येव सुभूते इन्द्रियाणि॥ बलानि सुभूते अबद्धान्यमुक्तानि॥ तत्कस्य हेतोः॥ बलानि स्वभावान्येव सुभूते बलानि॥ बोध्यङ्गानि सुभूते अबद्धान्यमुक्तानि॥ तत्कस्य हेतोः॥ बोध्यङ्गानि स्वभावान्येव सुभूते बोध्यङ्गानि॥ आर्याष्टाङ्गमार्गः सुभूते अबद्धोऽमुक्तः॥ तत्कस्य हेतोः॥ आर्याष्टाङ्गमार्गः स्वभाव एव आर्याष्टाङ्गमार्गः॥ आर्यसत्यानि सुभूते अबद्धान्यमुक्तानि॥ तत्कस्य हेतोः॥ आर्यसत्यानि स्वभावान्येव सुभूते आर्यसत्यानि॥ ध्यानानि सुभूते अबद्धान्यमुक्तानि॥ तत्कस्य हेतोः॥ ध्यानानि स्वभावान्येव सुभूते ध्यानानि॥ अप्रमाणानि सुभूते अबद्धान्यमुक्तानि॥ तत्कस्य हेतोः॥ अप्रमाणानि स्वभावान्येव सुभूते अप्रमाणानि॥ आरूप्यसमापत्तयः सुभूते अबद्धा अमुक्ता तत्कस्य हेतोः॥ आरूप्यसमापत्तयः स्वभावा एव सुभूते आरूप्यसमापत्तयः॥ विमोक्षाः सुभूते अबद्धाऽमुक्ताः। तत्कस्य हेतोः। विमोक्षाः स्वभावा एव सुभूते विमोक्षाः॥ अनुपूर्वविहारसमापत्तयः सुभूते अबद्धाऽमुक्ताः॥ तत्कस्य हेतोः॥ अनुपूर्वविहारसमापत्तयः स्वभावा एव सुभूते अनुपूर्वविहारसमापत्तयः॥ शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि सुभूते अबद्धान्यमुक्तानि॥ तत्कस्य हेतोः॥ शून्यतानिमित्ताप्रणिहितविमोक्षमुखाः स्वभा-

प्रथम·

नैव सुभूते शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि ॥ अभिज्ञा सुभूते ऽबद्धा अमुक्ता ॥ तत्कस्य हेतोः ॥ अभिज्ञास्वभावेनैव सुभूते अभिज्ञा ॥ समाधयः सुभूते ऽबद्धा अमुक्ताः ॥ तत्कस्य हेतोः ॥ समाधिस्वभावेनैव सुभूते समाधयः ॥ धारणीमुखानि सुभूते ऽबद्धान्यमुक्तानि ॥ तत्कस्य हेतोः ॥ धारणीमुखस्वभावेनैव सुभूते धारणीमुखानि ॥ तथागतबलानि सुभूते ऽबद्धान्यमुक्तानि ॥ तत्कस्य हेतोः ॥ तथागतबलस्वभावेनैव सुभूते तथागतबलानि ॥ वैशारद्यानि सुभूते ऽबद्धान्यमुक्तानि ॥ तत्कस्य हेतोः ॥ वैशारद्यस्वभावेनैव सुभूते वैशारद्यानि ॥ प्रतिसंविदः सुभूते ऽबद्धा अमुक्ताः ॥ तत्कस्य हेतोः ॥ प्रतिसंवित्स्वभावेनैव सुभूते प्रतिसंविदः ॥ महाकरुणा सुभूते ऽबद्धा अमुक्ता ॥ तत्कस्य हेतोः ॥ महाकरुणास्वभावेनैव सुभूते महाकरुणा ॥ आवेणिकबुद्धधर्माः सुभूते ऽबद्धा अमुक्ताः ॥ तत्कस्य हेतोः ॥ आवेणिकबुद्धधर्मस्वभावेनैव सुभूते आवेणिकबुद्धधर्माः ॥ सर्वज्ञता सुभूते ऽबद्धा अमुक्ता ॥ तत्कस्य हेतोः ॥ सर्वज्ञतास्वभावेनैव सुभूते सर्वज्ञता ॥ मार्गाकारज्ञता सुभूते ऽबद्धा अमुक्ता ॥ तत्कस्य हेतोः ॥ मार्गाकारज्ञतास्वभावेनैव सुभूते मार्गाकारज्ञता ॥ सर्वाकारज्ञता सुभूते ऽबद्धा अमुक्ता ॥ तत्कस्य हेतोः ॥ सर्वाकारज्ञतास्वभावेनैव सुभूते सर्वाकारज्ञता ॥ रूपं सुभूते पूर्वान्ततो ऽबद्धम् अमुक्तं ॥ तत्कस्य हेतोः ॥ पूर्वान्तास्वभावं हि सुभूते रूपं ॥ रूपं सुभूते अपरान्ततो ऽबद्धम् अमुक्तं ॥ तत्कस्य हेतोः ॥ अपरान्तास्वभावं हि सुभूते रूपं ॥ रूपं प्रत्युत्पन्नं सुभूते ऽबद्धम् अमुक्तं ॥ तत्कस्य हेतोः ॥ प्रत्युत्पन्नास्वभावं हि सुभूते रूपं ॥ वेदना सुभूते पूर्वान्ततो ऽबद्धा अमुक्ता ॥ तत्कस्य हेतोः ॥ पूर्वान्तास्वभावा हि सुभूते वेदना ॥ वेदना सुभूते अपरान्ततो ऽबद्धा अमुक्ता ॥ तत्कस्य हेतोः ॥ अपरान्तास्वभावा हि सुभूते वेदना ॥ प्रत्युत्पन्ना सुभूते वेदना ऽबद्धा अमुक्ता ॥ तत्कस्य हेतोः ॥ प्रत्युत्पन्नास्वभावा हि सुभूते वेदना ॥ संज्ञा सुभूते पूर्वान्ततो ऽबद्धा अमुक्ता ॥ तत्कस्य हेतोः ॥ पूर्वान्तास्वभावा हि सुभूते संज्ञा ॥ संज्ञा सुभूते अपरान्ततो ऽबद्धा अमुक्ता ॥ तत्कस्य हेतोः ॥ अपरान्तास्वभावा हि सुभूते संज्ञा ॥ प्रत्युत्पन्ना सुभूते संज्ञा ऽबद्धा अमुक्ता ॥ तत्कस्य हेतोः ॥ प्रत्युत्पन्नास्वभावा हि सुभूते संज्ञा ॥ संस्काराः सुभूते पूर्वान्ततो ऽबद्धा अमुक्ताः ॥ तत्कस्य हेतोः ॥ पूर्वान्तास्वभावा हि सुभूते संस्काराः ॥ संस्काराः सुभूते अपरान्ततो ऽबद्धा अमुक्ताः ॥ तत्कस्य हेतोः ॥ अपरान्तास्वभावा हि सुभूते संस्काराः ॥ प्रत्युत्पन्नाः सुभूते संस्काराः ऽबद्धा अमुक्ताः ॥ तत्कस्य हेतोः ॥ प्रत्युत्पन्नास्वभावा हि सुभूते संस्काराः ॥ विज्ञानं सुभूते पूर्वान्ततो ऽबद्धम् अमुक्तं ॥ तत्कस्य हेतोः ॥ पूर्वान्तास्वभावं हि सुभूते विज्ञानं ॥ विज्ञानम् अपरान्ततो ऽबद्धम् अमुक्तं ॥ तत्कस्य हेतोः ॥ अपरान्तास्वभावं हि सुभूते विज्ञानं ॥ प्रत्युत्पन्नं सुभूते विज्ञानम् अबद्धम् अमुक्तं ॥ तत्कस्य हेतोः ॥ प्रत्युत्पन्नास्वभावं हि सुभूते विज्ञानं ॥ चक्षुः सुभूते पूर्वान्ततो ऽबद्धम् अमुक्तं ॥ तत्कस्य हेतोः ॥ पूर्वान्तास्वभावं हि सुभूते चक्षुः ॥ चक्षुः

3

सुभूते अपरान्ततो ऽबद्धम् अमुक्तं ॥ तत्कस्य हेतोः ॥ अपरान्तास्वभावं हि सुभूते चक्षुः ॥ प्रत्युत्पन्नं सुभूते चक्षुर् अबद्धम् अमुक्तं ॥ तत्कस्य हेतोः ॥ प्रत्युत्पन्नास्वभावं हि सुभूते चक्षुः ॥ श्रोत्रं सुभूते पूर्वान्ततो ऽबद्धम् अमुक्तं ॥ तत्कस्य हेतोः ॥ पूर्वान्तास्वभावं हि सुभूते श्रोत्रं ॥ श्रोत्रं सुभूते अपरान्ततो ऽबद्धम् अमुक्तं ॥ तत्कस्य हेतोः ॥ अपरान्तास्वभावं हि सुभूते श्रोत्रं ॥ प्रत्युत्पन्नं सुभूते श्रोत्रम् अबद्धम् अमुक्तं ॥ तत्कस्य हेतोः ॥ प्रत्युत्पन्नास्वभावं हि सुभूते श्रोत्रं ॥ घ्राणं पूर्वान्ततो ऽबद्धम् अमुक्तं ॥ तत्कस्य हेतोः ॥ पूर्वान्तास्वभावं हि सुभूते घ्राणं ॥ घ्राणम् अपरान्ततो ऽबद्धम् अमुक्तं ॥ तत्कस्य हेतोः ॥ अपरान्तास्वभावं हि सुभूते घ्राणं ॥ प्रत्युत्पन्नं सुभूते घ्राणम् अबद्धम् अमुक्तं ॥ तत्कस्य हेतोः ॥ प्रत्युत्पन्नास्वभावं हि सुभूते घ्राणं ॥ जिह्वा पूर्वान्ततो ऽबद्धा अमुक्ता ॥ तत्कस्य हेतोः ॥ पूर्वान्तास्वभावा हि सुभूते जिह्वा ॥ जिह्वा सुभूते अपरान्ततो ऽबद्धा अमुक्ता ॥ तत्कस्य हेतोः ॥ अपरान्तास्वभावा हि सुभूते जिह्वा ॥ प्रत्युत्पन्ना सुभूते जिह्वा ऽबद्धा अमुक्ता ॥ तत्कस्य हेतोः ॥ प्रत्युत्पन्नास्वभावा हि सुभूते जिह्वा ॥ कायः सुभूते पूर्वान्ततो ऽबद्धो ऽमुक्तः ॥ तत्कस्य हेतोः ॥ पूर्वान्तास्वभावो हि सुभूते कायः ॥ कायः सुभूते अपरान्ततो ऽबद्धो ऽमुक्तः ॥ तत्कस्य हेतोः ॥ अपरान्तास्वभावो हि सुभूते कायः ॥ प्रत्युत्पन्नः सुभूते कायो ऽबद्धो ऽमुक्तः ॥ तत्कस्य हेतोः ॥ प्रत्युत्पन्नास्वभावो हि सुभूते कायः ॥ मनः सुभूते पूर्वान्ततो ऽबद्धम् अमुक्तं ॥ तत्कस्य हेतोः ॥ पूर्वान्तास्वभावं हि सुभूते मनः ॥ मनः सुभूते अपरान्ततो ऽबद्धम् अमुक्तं ॥ तत्कस्य हेतोः ॥ अपरान्तास्वभावं हि सुभूते मनः ॥ प्रत्युत्पन्नं सुभूते मनो ऽबद्धम् अमुक्तं ॥ तत्कस्य हेतोः ॥ प्रत्युत्पन्नास्वभावं हि सुभूते मनः ॥ रूपं सुभूते पूर्वान्ततो ऽबद्धम् अमुक्तं ॥ तत्कस्य हेतोः ॥ पूर्वान्तास्वभावं हि सुभूते रूपं ॥ रूपं सुभूते अपरान्ततो ऽबद्धम् अमुक्तं ॥ तत्कस्य हेतोः ॥ अपरान्तास्वभावं हि सुभूते रूपं ॥ प्रत्युत्पन्नं सुभूते रूपम् अबद्धम् अमुक्तं ॥ तत्कस्य हेतोः ॥ प्रत्युत्पन्नास्वभावं हि सुभूते रूपं ॥ शब्दः सुभूते पूर्वान्ततो ऽबद्धो ऽमुक्तः ॥ तत्कस्य हेतोः ॥ पूर्वान्तास्वभावो हि सुभूते शब्दः ॥ शब्दः सुभूते अपरान्ततो ऽबद्धो ऽमुक्तः ॥ तत्कस्य हेतोः ॥ अपरान्तास्वभावो हि सुभूते शब्दः ॥ प्रत्युत्पन्नः सुभूते शब्दो ऽबद्धो ऽमुक्तः ॥ तत्कस्य हेतोः ॥ प्रत्युत्पन्नास्वभावो हि सुभूते शब्दः ॥ गंधः सुभूते पूर्वान्ततो ऽबद्धो ऽमुक्तः ॥ तत्कस्य हेतोः ॥ पूर्वान्तास्वभावो हि सुभूते गंधः ॥ गंधः सुभूते अपरान्ततो ऽबद्धो ऽमुक्तः ॥ तत्कस्य हेतोः ॥ अपरान्तास्वभावो हि सुभूते गंधः ॥ प्रत्युत्पन्नः सुभूते गंधो ऽबद्धो ऽमुक्तः ॥ तत्कस्य हेतोः ॥ प्रत्युत्पन्नास्वभावो हि सुभूते गंधः ॥ रसः सुभूते पूर्वान्ततो ऽबद्धो ऽमुक्तः ॥ तत्कस्य हेतोः ॥ पूर्वान्तास्वभावो हि सुभूते रसः ॥ रसः सुभूते अपरान्ततो ऽबद्धो ऽमुक्तः ॥ तत्कस्य हेतोः ॥ अपरान्तास्वभावो हि सुभूते रसः ॥ प्रत्युत्पन्नः सुभूते रसो ऽबद्धो ऽमुक्तः ॥ तत्कस्य हेतोः ॥ प्रत्युत्पन्नास्वभावो हि सुभूते रसः ॥ स्प्रष्टव्यं सुभूते पूर्वान्ततो ऽबद्धम् अमुक्तं ॥ तत्कस्य हे

५५न

ना॥ पूर्वान्तास्वभावो हि सुभूते स्पर्शः॥ स्पर्शः सुभूते अपरान्ततो ऽबद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ अपरान्तास्वभावो हि सुभूते स्पर्शः॥ प्रत्युत्पन्नः सुभूते स्पर्शो ऽबद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नास्वभावो हि सुभूते स्पर्शः॥ धर्माः सुभूते पूर्वान्ततो ऽबद्धा अमुक्ताः॥ तत्कस्य हेतोः॥ पूर्वान्तास्वभावा हि सुभूते धर्माः॥ प्रत्युत्पन्नाः सुभूते धर्मा ऽबद्धा अमुक्ताः॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नास्वभावा हि सुभूते धर्माः॥ चक्षुर्विज्ञानं सुभूते पूर्वान्ततो ऽबद्धम् अमुक्तं॥ तत्कस्य हेतोः॥ पूर्वान्तास्वभावं हि सुभूते चक्षुर्विज्ञानं॥ चक्षुर्विज्ञानं सुभूते अपरान्ततो ऽबद्धम् अमुक्तं॥ तत्कस्य हेतोः॥ अपरान्तास्वभावं हि सुभूते चक्षुर्विज्ञानं॥ प्रत्युत्पन्नं [illegible] हि सुभूते चक्षुर्विज्ञानमबद्धममुक्तं॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नास्वभावं हि सुभूते चक्षुर्विज्ञानं॥ श्रोत्रविज्ञानं सुभूते पूर्वान्ततो ऽबद्धम् अमुक्तं॥ तत्कस्य हेतोः॥ पूर्वान्तास्वभावं हि सुभूते श्रोत्रविज्ञानं॥ श्रोत्रविज्ञानं सुभूते अपरान्ततो ऽबद्धम् अमुक्तं॥ तत्कस्य हेतोः॥ अपरान्तास्वभावं हि सुभूते श्रोत्रविज्ञानं॥ प्रत्युत्पन्नं सुभूते श्रोत्रविज्ञानमबद्धममुक्तं॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नास्वभावं हि सुभूते श्रोत्रविज्ञानं॥ घ्राणविज्ञानं सुभूते पूर्वान्ततो ऽबद्धम् अमुक्तं॥ तत्कस्य हेतोः॥ पूर्वान्तास्वभावं हि सुभूते घ्राणविज्ञानं॥ घ्राणविज्ञानं सुभूते अपरान्ततो ऽबद्धम् अमुक्तं॥ तत्कस्य हेतोः॥ अपरान्तास्वभावं हि सुभूते घ्राणविज्ञानं। प्रत्युत्पन्नं सुभूते घ्राणविज्ञानमबद्धममुक्तं॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नास्वभावं हि सुभूते घ्राणविज्ञानं॥ जिह्वाविज्ञानं सुभूते पूर्वान्ततो ऽबद्धम् अमुक्तं॥ तत्कस्य हेतोः॥ पूर्वान्तास्वभावं हि सुभूते जिह्वाविज्ञानं॥ जिह्वाविज्ञानं सुभूते अपरान्ततो ऽबद्धम् अमुक्तं॥ तत्कस्य हेतोः॥ अपरान्तास्वभावं हि सुभूते जिह्वाविज्ञानं। प्रत्युत्पन्नं सुभूते जिह्वाविज्ञानमबद्धममुक्तं॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नास्वभावं हि सुभूते जिह्वाविज्ञानं॥ कायविज्ञानं सुभूते पूर्वान्ततो ऽबद्धम् अमुक्तं। पूर्वान्तास्वभावं हि सुभूते कायविज्ञानं॥ कायविज्ञानं सुभूते अपरान्ततो ऽबद्धम् अमुक्तं॥ तत्कस्य हेतोः॥ अपरान्तास्वभावं हि सुभूते कायविज्ञानं॥ प्रत्युत्पन्नं सुभूते कायविज्ञानमबद्धममुक्तं॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नास्वभावं हि सुभूते कायविज्ञानं॥ मनोविज्ञानं सुभूते पूर्वान्ततो ऽबद्धम् अमुक्तं॥ तत्कस्य हेतोः॥ पूर्वान्तास्वभावं हि सुभूते मनोविज्ञानं॥ मनोविज्ञानं सुभूते अपरान्ततो ऽबद्धम् अमुक्तं॥ तत्कस्य हेतोः॥ अपरान्तास्वभावं हि सुभूते मनोविज्ञानं॥ प्रत्युत्पन्नं सुभूते मनोविज्ञानमबद्धममुक्तं॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नास्वभावं हि सुभूते मनोविज्ञानं॥ चक्षुःसंस्पर्शः सुभूते पूर्वान्ततो ऽबद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ पूर्वान्तास्वभावो हि सुभूते चक्षुःसंस्पर्शः॥ चक्षुःसंस्पर्शः सुभूते अपरान्ततो ऽबद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ अपरान्तास्वभावो हि सुभूते चक्षुःसंस्पर्शः॥ प्रत्युत्पन्नः सुभूते चक्षुःसंस्पर्शो ऽबद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नास्वभावो हि सुभूते चक्षुःसंस्पर्शः॥ श्रोत्रसंस्पर्शः सुभूते पूर्वान्ततो ऽबद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ पूर्वान्तास्वभावो हि सुभूते श्रोत्रसंस्पर्शः॥

६०

श्रोत्रसंस्पर्शः सुभूते अपरान्ततो ऽबद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ अपरान्तास्वभावो हि सुभूते श्रोत्रसंस्पर्शः॥ प्रत्युत्पन्नः सुभूते श्रोत्रसंस्पर्शो ऽबद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नास्वभावो हि सुभूते श्रोत्रसंस्पर्शः॥ घ्राणसंस्पर्शः सुभूते पूर्वान्ततो ऽबद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ पूर्वान्तास्वभावो हि सुभूते घ्राणसंस्पर्शः॥ घ्राणसंस्पर्शः सुभूते अपरान्ततो ऽबद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ अपरान्तास्वभावो हि सुभूते घ्राणसंस्पर्शः॥ प्रत्युत्पन्नः सुभूते घ्राणसंस्पर्शो ऽबद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नास्वभावो हि सुभूते घ्राणसंस्पर्शः॥ जिह्वासंस्पर्शः सुभूते पूर्वान्ततो ऽबद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ पूर्वान्तास्वभावो हि सुभूते जिह्वासंस्पर्शः॥ जिह्वासंस्पर्शः सुभूते अपरान्ततो ऽबद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ अपरान्तास्वभावो हि सुभूते जिह्वासंस्पर्शः॥ प्रत्युत्पन्नः सुभूते जिह्वासंस्पर्शो ऽबद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नास्वभावो हि सुभूते जिह्वासंस्पर्शः॥ कायसंस्पर्शः सुभूते पूर्वान्ततो ऽबद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ पूर्वान्तास्वभावो हि सुभूते कायसंस्पर्शः॥ कायसंस्पर्शः सुभूते अपरान्ततो ऽबद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ अपरान्तास्वभावो हि सुभूते कायसंस्पर्शः॥ प्रत्युत्पन्नः सुभूते कायसंस्पर्शो ऽबद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नास्वभावो हि सुभूते कायसंस्पर्शः॥ मनःसंस्पर्शः सुभूते पूर्वान्ततो ऽबद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ पूर्वान्तास्वभावो हि सुभूते मनःसंस्पर्शः॥ मनःसंस्पर्शः सुभूते अपरान्ततो ऽबद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ अपरान्तास्वभावो हि सुभूते मनःसंस्पर्शः॥ प्रत्युत्पन्नः सुभूते मनःसंस्पर्शो ऽबद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नास्वभावो हि सुभूते मनःसंस्पर्शः॥ चक्षुःसंस्पर्शप्रत्ययवेदना सुभूते पूर्वान्ततो ऽबद्धा ऽमुक्ता॥ तत्कस्य हेतोः॥ पूर्वान्तास्वभावा हि सुभूते चक्षुःसंस्पर्शप्रत्ययवेदना॥ चक्षुःसंस्पर्शप्रत्ययवेदना सुभूते अपरान्ततो ऽबद्धा ऽमुक्ता॥ तत्कस्य हेतोः॥ अपरान्तास्वभावा हि सुभूते चक्षुःसंस्पर्शप्रत्ययवेदना॥ प्रत्युत्पन्ना सुभूते चक्षुःसंस्पर्शप्रत्ययवेदना ऽबद्धा ऽमुक्ता॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नास्वभावा हि सुभूते चक्षुःसंस्पर्शप्रत्ययवेदना॥ श्रोत्रसंस्पर्शप्रत्ययवेदना सुभूते पूर्वान्ततो ऽबद्धा ऽमुक्ता॥ तत्कस्य हेतोः॥ पूर्वान्तास्वभावा हि सुभूते श्रोत्रसंस्पर्शप्रत्ययवेदना॥ श्रोत्रसंस्पर्शप्रत्ययवेदना सुभूते अपरान्ततो ऽबद्धा ऽमुक्ता॥ तत्कस्य हेतोः॥ अपरान्तास्वभावा हि सुभूते श्रोत्रसंस्पर्शप्रत्ययवेदना॥ प्रत्युत्पन्ना सुभूते श्रोत्रसंस्पर्शप्रत्ययवेदना ऽबद्धा ऽमुक्ता॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नास्वभावा हि सुभूते श्रोत्रसंस्पर्शप्रत्ययवेदना॥ घ्राणसंस्पर्शप्रत्ययवेदना सुभूते पूर्वान्ततो ऽबद्धा ऽमुक्ता॥ तत्कस्य हेतोः॥ पूर्वान्तास्वभावा हि सुभूते घ्राणसंस्पर्शप्रत्ययवेदना॥ घ्राणसंस्पर्शप्रत्ययवेदना सुभूते अपरान्ततो ऽबद्धा ऽमुक्ता॥ तत्कस्य हेतोः॥ अपरान्तास्वभावा हि सुभूते घ्राणसंस्पर्शप्रत्ययवेदना॥ प्रत्युत्पन्ना सुभूते घ्राणसंस्पर्शप्रत्ययवेदना ऽबद्

प्रथम

ऽमुक्ता॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नावस्तुत्वाद्धि सुभूते घ्राणसंस्पर्शप्रत्ययवेदना॥ जिह्वासंस्पर्शप्रत्ययवेदना या सुभूते पूर्वान्ततो ऽवद्धा ऽमुक्ता॥ तत्कस्य हेतोः॥ पूर्वान्तावस्तुत्वं हि सुभूते जिह्वासंस्पर्शप्रत्ययवेदना॥ जिह्वासंस्पर्शप्रत्ययवेदना या सुभूते अपरान्ततो ऽवद्धा ऽमुक्ता॥ तत्कस्य हेतोः॥ अपरान्तावस्तुत्वाद्धि सुभूते जिह्वासंस्पर्शप्रत्ययवेदना॥ जिह्वासंस्पर्शप्रत्ययवेदना या सुभूते प्रत्युत्पन्ना ऽवद्धा ऽमुक्ता। तत्कस्य हेतोः॥ प्रत्युत्पन्नावस्तुत्वाद्धि सुभूते जिह्वासंस्पर्शप्रत्ययवेदना॥ कायसंस्पर्शप्रत्ययवेदना या सुभूते पूर्वान्ततो ऽवद्धा ऽमुक्ता॥ तत्कस्य हेतोः॥ पूर्वान्तावस्तुत्वं हि सुभूते कायसंस्पर्शप्रत्ययवेदना॥ कायसंस्पर्शप्रत्ययवेदना या सुभूते अपरान्ततो ऽवद्धा ऽमुक्ता॥ तत्कस्य हेतोः॥ अपरान्तावस्तुत्वं हि सुभूते कायसंस्पर्शप्रत्ययवेदना॥ प्रत्युत्पन्नावस्तुत्वाद्धि सुभूते कायसंस्पर्शप्रत्ययवेदना ऽवद्धा ऽमुक्ता॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नावस्तुत्वाद्धि सुभूते कायसंस्पर्शप्रत्ययवेदना॥ मनःसंस्पर्शप्रत्ययवेदना या सुभूते पूर्वान्ततो ऽवद्धा ऽमुक्ता। तत्कस्य हेतोः॥ पूर्वान्तावस्तुत्वाद्धि सुभूते मनःसंस्पर्शप्रत्ययवेदना॥ मनःसंस्पर्शप्रत्ययवेदना या सुभूते अपरान्ततो ऽवद्धा ऽमुक्ता॥ तत्कस्य हेतोः॥ पूर्वान्ता। अपरान्तावस्तुत्वं हि सुभूते मनःसंस्पर्शप्रत्ययवेदना॥ प्रत्युत्पन्ना सुभूते मनःसंस्पर्शप्रत्ययवेदना ऽवद्धा ऽमुक्ता॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नावस्तुत्वाद्धि सुभूते मनःसंस्पर्शप्रत्ययवेदना॥ पृथिवीधातुः सुभूते पूर्वान्ततो ऽवद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ पूर्वान्तावस्तुत्वाद्धि सुभूते पृथिवीधातुः॥ पृथिवीधातुः सुभूते अपरान्ततो ऽवद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ अपरान्तावस्तुत्वाद्धि सुभूते पृथिवीधातुः॥ प्रत्युत्पन्नः सुभूते पृथिवीधातुः ऽवद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नावस्तुत्वाद्धि सुभूते पृथिवीधातुः॥ अब्धातुः सुभूते पूर्वान्ततो ऽवद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ पूर्वान्तावस्तुत्वाद्धि सुभूते अब्धातुः॥ अब्धातुः सुभूते अपरान्ततो ऽवद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ अपरान्तावस्तुत्वाद्धि सुभूते अब्धातुः॥ प्रत्युत्पन्नः सुभूते अब्धातुः ऽवद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नावस्तुत्वाद्धि सुभूते अब्धातुः॥ तेजोधातुः सुभूते पूर्वान्ततो ऽवद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ पूर्वान्तावस्तुत्वाद्धि सुभूते तेजोधातुः॥ तेजोधातुः सुभूते अपरान्ततो ऽवद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ अपरान्तावस्तुत्वाद्धि सुभूते तेजोधातुः॥ प्रत्युत्पन्नः सुभूते तेजोधातुः ऽवद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नावस्तुत्वाद्धि सुभूते तेजोधातुः। वायुधातुः सुभूते पूर्वान्ततो ऽवद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ पूर्वान्तावस्तुत्वाद्धि सुभूते वायुधातुः॥ वायुधातुः सुभूते अपरान्ततो ऽवद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ अपरान्तावस्तुत्वाद्धि सुभूते वायुधातुः। प्रत्युत्पन्नः सुभूते वायुधातुः ऽवद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नावस्तुत्वाद्धि सुभूते वायुधातुः॥ आकाशधातुः सुभूते पूर्वान्ततो ऽवद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ पूर्वान्तावस्तुत्वाद्धि सुभूते आकाशधातुः॥ आकाशधातुः सुभूते अपरान्ततो ऽवद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ अपरान्तावस्तुत्वाद्धि सुभूते आकाशधातुः॥ प्रत्युत्पन्नः सुभूते

४१

ते आकाशधातुः ऽवद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नावस्तुत्वाद्धि सुभूते आकाशधातुः॥ विज्ञानधातुः सुभूते पूर्वान्ततो ऽवद्धो ऽमुक्तः तत्कस्य हेतोः॥ पूर्वान्तावस्तुत्वाद्धि सुभूते विज्ञानधातुः॥ विज्ञानधातुः सुभूते अपरान्ततो ऽवद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ अपरान्तावस्तुत्वाद्धि सुभूते विज्ञानं॥ प्रत्युत्पन्नः सुभूते विज्ञानधातुः ऽवद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नावस्तुत्वाद्धि सुभूते विज्ञानधातुः॥ अविद्या या सुभूते पूर्वान्ततो ऽवद्धा ऽमुक्ता॥ तत्कस्य हेतोः॥ पूर्वान्तावस्तुत्वाद्धि सुभूते अविद्या॥ अविद्या या सुभूते अपरान्ततो ऽवद्धा ऽमुक्ता॥ तत्कस्य हेतोः॥ अपरान्तावस्तुत्वाद्धि सुभूते अविद्या॥ प्रत्युत्पन्ना सुभूते अविद्या ऽवद्धा ऽमुक्ता॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नावस्तुत्वाद्धि सुभूते अविद्या॥ संस्कारा सुभूते पूर्वान्ततो ऽवद्धा ऽमुक्ताः॥ तत्कस्य हेतोः॥ पूर्वान्तावस्तुत्वाद्धि सुभूते संस्काराः॥ संस्कारा ऽपि सुभूते अपरान्ततो ऽवद्धा ऽमुक्ताः॥ तत्कस्य हेतोः॥ अपरान्तावस्तुत्वाद्धि सुभूते संस्काराः॥ प्रत्युत्पन्नाः सुभूते संस्कारा ऽवद्धा ऽमुक्ताः॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नावस्तुत्वाद्धि सुभूते संस्काराः॥ विज्ञानं सुभूते पूर्वान्ततो ऽवद्धं ऽमुक्तं॥ तत्कस्य हेतोः॥ पूर्वान्तावस्तुत्वाद्धि सुभूते विज्ञानं॥ विज्ञानं सुभूते अपरान्ततो ऽवद्धा ऽमुक्तः॥ तत्कस्य हेतोः॥ अपरान्तावस्तुत्वाद्धि सुभूते विज्ञानं॥ प्रत्युत्पन्नं सुभूते विज्ञानं अवद्धा ऽमुक्तं॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नावस्तुत्वाद्धि सुभूते विज्ञानं॥ नामरूपं सुभूते पूर्वान्ततो ऽवद्धा ऽमुक्तः॥ तत्कस्य हेतोः॥ पूर्वान्तावस्तुत्वाद्धि सुभूते नामरूपं॥ नामरूपं सुभूते अपरान्ततो ऽवद्धा ऽमुक्तः॥ तत्कस्य हेतोः॥ अपरान्तावस्तुत्वाद्धि सुभूते नामरूपं॥ प्रत्युत्पन्नं सुभूते नामरूपमवद्धममुक्तं॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नावस्तुत्वाद्धि सुभूते नामरूपं॥ षडायतनं सुभूते पूर्वान्ततो ऽवद्धा ऽमुक्तः॥ तत्कस्य हेतोः॥ पूर्वान्तावस्तुत्वाद्धि सुभूते षडायतनं॥ षडायतनं सुभूते अपरान्ततो ऽवद्धा ऽमुक्तः॥ तत्कस्य हेतोः॥ अपरान्तावस्तुत्वाद्धि सुभूते षडायतनं॥ प्रत्युत्पन्नं सुभूते षडायतनमवद्धममुक्तं॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नावस्तुत्वाद्धि सुभूते षडायतनं॥ स्पर्शः सुभूते पूर्वान्ततो ऽवद्धो ऽमुक्तः॥ तत्कस्य हेतोः। पूर्वान्तावस्तुत्वाद्धि सुभूते स्पर्शः॥ स्पर्शः सुभूते अपरान्ततो ऽवद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ अपरान्तावस्तुत्वाद्धि सुभूते स्पर्शः॥ प्रत्युत्पन्नं सुभूते स्पर्शो ऽवद्धो ऽमुक्तः॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नावस्तुत्वाद्धि सुभूते स्पर्शः॥ वेदना या सुभूते पूर्वान्ततो ऽवद्धा ऽमुक्ता॥ तत्कस्य हेतोः॥ पूर्वान्तावस्तुत्वाद्धि सुभूते वेदना॥ वेदना या सुभूते अपरान्ततो ऽवद्धा ऽमुक्ता॥ तत्कस्य हेतोः॥ अपरान्तावस्तुत्वाद्धि सुभूते वेदना॥ प्रत्युत्पन्नं सुभूते वेदना ऽवद्धा ऽमुक्ता॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नावस्तुत्वाद्धि सुभूते वेदना॥ तृष्णा या सुभूते पूर्वान्ततो ऽवद्धा ऽमुक्ता॥ तत्कस्य हेतोः॥ पूर्वान्तावस्तुत्वाद्धि सुभूते तृष्णा॥ तृष्णा या सुभूते अपरान्ततो ऽवद्धा ऽमुक्ता॥ तत्कस्य हेतोः॥ अपरान्तावस्तुत्वाद्धि सुभूते तृष्णा॥ प्रत्युत्पन्ना सुभूते तृष्णा ऽवद्धा ऽमुक्ता॥ तत्कस्य हेतोः॥ प्रत्युत्पन्नावस्तुत्वा

उपन॰

दितव्यः॥ पुनरपरं सुभूते येऽवैवर्तिका बोधिसत्वा महासत्वा धर्मपर्यवाप्तिसूत्रं गेयं व्याकरणं गाथोदानं निदानमवदानं [illegible] कथं वैपुल्यं [illegible] धर्मान्
दानाय देशयति। तस्यैवं भवति मयास्व धर्मदानं ददतः। एवं भवति सर्वसत्वानामनेन धर्मदानेनाशयप्रतिपूरिर्भवतु तेन धर्मदानं सर्वसत्वैः सार्धं
साधारणं कृत्वानुत्तरायां सम्यक्संबोधौ परिणामयति। तैः सुभूते आकारैस्तैर्लिङ्गैस्तैर्निमित्तैः समन्वागतो बोधिसत्वो महासत्वोऽवैवर्तिको वेदि-
तव्यः। पुनरपरं सुभूते अवैवर्तिकस्य बोधिसत्वस्य महासत्वस्य महासत्वस्य गम्भीरेषु बुद्धधर्मेषु नास्ति काङ्क्षा नास्ति विचिकित्सा ग्राहः। केन कार-
णेन तथा अवैवर्तिकस्य बोधिसत्वस्य महासत्वस्य गम्भीरेषु धर्मेषु नास्ति काङ्क्षा। नास्ति विमतिर्नास्ति विचिकित्सा। तथा वा नाह। यथा हि सुभू-
ते अवैवर्तिको बोधिसत्वो महासत्वो न किंचिद्धर्मं समनुपश्यति। रूपं वा वेदनां वा संज्ञां वा संस्कारान् वा विज्ञानं वा चक्षुर्वा श्रोत्रं वा॥ घ्राणं वा जिह्वां
वा कायं वा मनो वा। रूपं वा शब्दं वा गन्धं वा रसं वा स्पर्शं वा धर्मं वा। चक्षुर्विज्ञानं वा श्रोत्रविज्ञानं वा घ्राणविज्ञानं वा जिह्वाविज्ञानं वा का-
यविज्ञानं वा मनोविज्ञानं वा। चक्षुःसंस्पर्शं वा श्रोत्रसंस्पर्शं वा घ्राणसंस्पर्शं वा जिह्वासंस्पर्शं वा कायसंस्पर्शं वा मनःसंस्पर्शं वा॥ चक्षुःसंस्पर्शप्रत्य-
यवेदनां वा वेदनां। श्रोत्रसंस्पर्शप्रत्ययवेदनां वा वेदनां। घ्राणसंस्पर्शप्रत्ययां वा वेदनां। घ्राणसंस्पर्शप्रत्ययवा। जिह्वासंस्पर्शप्रत्ययां वा वेदनां। कायसं-
स्पर्शप्रत्ययां वा वेदनां। मनःसंस्पर्शप्रत्ययां वा वेदनां॥ पृथिवीधातुं वा। आब्धातुं वा। वायुधातुं वा। आकाशधातुं वा। विज्ञानधातुं वा। नामरूपं वा ष-
डायतनं वा। स्पर्शं वा वेदनां वा तृष्णां वा उपादानं वा भवं वा जातिं वा जरामरणं वा। दानपारमितां वा शीलपारमितां वा क्षान्तिपारमितां वा
वीर्यपारमितां वा। ध्यानपारमितां वा प्रज्ञापारमितां वा। अध्यात्मशून्यतां वा बहिर्धाशून्यतां वा अध्यात्मबहिर्धाशून्यतां वा शून्यताशून्यतां वा म-
हाशून्यतां वा परमार्थशून्यतां वा संस्कृतशून्यतां वा असंस्कृतशून्यतां वा अत्यन्तशून्यतां वा अनवराग्रशून्यतां वा अनवकारशून्यतां वा प्रकृतिशू-
न्यतां वा सर्वधर्मशून्यतां वा स्वलक्षणशून्यतां वा अनुपलम्भशून्यतां वा अभावशून्यतां वा स्वभावशून्यतां वा अभावस्वभावशून्यतां वा स्मृत्युपस्था-

२७०

नानि वा सम्यक्प्रहाणानि वा ऋद्धिपादानि वा इन्द्रियाणि वा बलानि वा बोध्यङ्गानि वा आर्याष्टाङ्गमार्गं वा आर्यसत्यानि वा ध्यानानि वा अप्रमाणानि वा आ-
रूप्यसमापत्तीर्वा विमोक्षान् वा अनुपूर्वविहारसमापत्तीर्वा शून्यतां वा आनिमित्तं वा अप्रणिहितं वा अभिज्ञां वा समाधीन् वा धारणीमुखानि वा तथाग-
तबलानि वा वैशारद्यानि वा प्रतिसंविदो वा महामैत्रीं वा महाकरुणां वा आवेणिकबुद्धधर्मान् वा स्रोतआपत्तिफलं वा सकृदागामिफलं वा अना-
गामिफलं वा अर्हत्वं वा प्रत्येकबोधिं वा मार्गाकारज्ञतां वा सर्वाकारज्ञतां वा अनुत्तरामपि सम्यक्संबोधिं समनुपश्यति। यत्र काङ्क्षां वा विमतिं वा विचि-
कित्सां वा उत्पादयेत्। तैः सुभूते आकारैस्तैर्लिङ्गैस्तैर्निमित्तैः समन्वागतो बोधिसत्वो महासत्वोऽवैवर्तिको वेदितव्यः॥ पुनरपरं सुभूते अवैवर्तिको बोधि-
सत्वो महासत्वः स्निग्धेन कायकर्मणा समन्वागतो भवति। स्निग्धेन वाक्कर्मणा समन्वागतो भवति स्निग्धेन मनस्कर्मणा समन्वागतो भवति। तैः सुभूते आ-
कारैस्तैर्लिङ्गैस्तैर्निमित्तैः समन्वागतो भवति बोधिसत्वो महासत्वः अवैवर्तिको वेदितव्यः॥ पुनरपरं सुभूते अवैवर्तिको बोधिसत्वो महासत्वो मैत्रे-
ण कायकर्मणा समन्वागतो भवति। मैत्रेण वाक्कर्मणा समन्वागतो भवति। मैत्रेण मनस्कर्मणा समन्वागतो भवति। तैः सुभूते आकारैस्तैर्लिङ्गैस्तैर्नि-
मित्तैः समन्वागतो बोधिसत्वो महासत्वोऽवैवर्तिको वेदितव्यः। पुनरपरं सुभूते अवैवर्तिको बोधिसत्वो महासत्वो न पञ्चभिर्नीवरणैः सार्धं संवसति यदि-
दं कामच्छन्देन व्यापादेन स्त्यानमिद्धेन औद्धत्यकौकृत्येन विचिकित्सया। तैः सुभूते आकारैस्तैर्लिङ्गैस्तैर्निमित्तैः समन्वागतो बोधिसत्वो महासत्वो-
ऽवैवर्तिको वेदितव्यः। पुनरपरं सुभूते अवैवर्तिकस्य बोधिसत्वस्य महासत्वस्य सर्वेण सर्वमनुशया नास्ति। तैः सुभूते आकारैस्तैर्लिङ्गैस्तैर्निमि-
त्तैः समन्वागतो बोधिसत्वो महासत्वोऽवैवर्तिको वेदितव्यः॥ पुनरपरं सुभूते अवैवर्तिको बोधिसत्वो महासत्वोऽभिक्रामन् वा प्रतिक्रामन् वा नव्याक्षि-
प्तमनस्कोऽविक्षिप्तः प्रक्रामति। अभिक्रामन् वा प्रतिक्रामन् वा उपस्थितस्मृतिरभिक्रामति। उपस्थितस्मृतिः प्रक्रामति। स स्मृत एवागच्छति स्मृत एव गच्छति स्मृ-
त एव क्रामति। स्मृत एव तिष्ठति स्मृत एव निषीदति स्मृत एव शय्यां कल्पयति। न सहसा भूमौ पादमुत्क्षिपति। न सहसा भूमौ पादं निक्षिपति। स्मृत एव पादमुत्क्षिपति।
स्मृत एव पादं निक्षिपति। स पश्यन्नेव भूमिप्रदेशमाक्रामति। तैः सुभूते आकारैस्तैर्लिङ्गैस्तैर्निमित्तैः समन्वागतो बो-
धिसत्वो महासत्वः अवैवर्तिको वेदितव्यः। पुनरपरं सुभूते बोधिसत्वस्य महासत्वस्य चीवरपरिभोगमनजुगुप्सनीयो भवति चोक्षसमुदाचारः। सुभूते अ-
वैवर्तिको बोधिसत्वो महासत्वो भवति शुचिनिरामगन्धवेदमलापगतात्यावापश्च भवति। तैः सुभूते आकारैस्तैर्लिङ्गैस्तैर्निमित्तैः समन्वाग-
तो बोधिसत्वो महासत्वोऽवैवर्तिको वेदितव्यः। पुनरपरं सुभूते यानीमानि मनुष्याणामशीतिः क्रिमिकुलसहस्राणि कायेऽवनिश्रितमेव कायं खाद-
न्ति तान्यवैवर्तिकस्य बोधिसत्वस्य महासत्वस्य सर्वेण सर्वं सर्वथा न संविद्यन्ते। तथा हि सुभूते यानि कुशलमूलानि बोधिसत्वस्य महासत्वस्य सर्व-

प्र.भ. लोकासङ्ख्यातानिसर्वलोकप्रवनानिगनागस्यबोधिसत्वस्यमहासत्वस्यान्वमीतिःक्रिमिकुलसहस्राणिकायेनसन्निश्रयन्ते·यथायथसततंबोधिसत्वस्यम
हासत्वस्यानिकुशलमूलानिविवर्द्धन्ते।यथायथाबोधिसत्वोमहासत्वःकायपरिशुद्धिंप्रतिगृह्णाति।वाक्परिशुद्धिंप्रतिगृह्णाति।चित्तपरिशुद्धिंपरिशुद्धिं
परिगृह्णाति।त्रिभिःसततंस्थानैरितिलिङ्गैरितिनिमित्तैःसमन्वागतोबोधिसत्वोमहासत्वःवेदितव्यः।एवमुक्तआयुष्मान्सततिर्भगवन्तमेतदवोच
।कथंपुनर्भगवन्बोधिसत्वस्यमहासत्वस्यकायपरिशुद्धिर्भवति·चित्तपरिशुद्धिर्भवति।भगवानाह।यथायथासततंबोधिसत्वस्यमहासत्वस्यानि
कुशलमूलानिविवर्द्धन्ते।तथातथैववाक्चित्तवक्राकायवाक्चित्तकौटिल्यंकुशलमूलैःपरिशोधयति।तथातथासौत्रिविधंकायेनसुचरितंभव
ति।त्रिविधंमनःसुचरितंभवति।त्रिविधंमनःसुचरितंभवति।अयंबोधिसत्वस्यमहासत्वस्यमहासत्वस्यानिकुशलमूलानिविवर्द्धन्ते।अप्रवक्त
मिश्रप्रत्येकबुद्धभूमिसमतिक्रामतिनवस्तुकोटिंसाक्षात्करोति।इयमपिसततंबोधिसत्वस्यमहासत्वस्यकायवाक्चित्तपरिशुद्धिर्वेदितव्या।त्रिभिःसततं
स्थानैरितिलिङ्गैरितिनिमित्तैःसमन्वागतोबोधिसत्वोमहासत्वोनवैवर्तिकोवेदितव्यः॥पुनरपरंसततंनवैवर्तिकोबोधिसत्वोमहासत्वोनलोकमत्का
नअभिकगुरुकोभवति।नचीवरपिण्डपातगुरुकोभवति।नपात्रफलगुरुकोभवति।नैकाशनगुरुकोभवति।नालंपथ्यकगुरुकोभवति।नप्रकपिण्डगु
रुकोभवति।नानन्ध्यगुरुकोभवति।नवृक्षमूलगुरुकोभवति।नाल्पकाशगुरुकोभवति।नस्मशानगुरुकोभवति।ननिषद्यगुरुकोभवति।नैकाशनगु
रुकोभवति।नालंपथ्यकगुरुकोभवति।नप्रफपिण्डगुरुकोभवति।नानन्ध्यगुरुकोभवति।नवृक्षमूलगुरुकोभवति।नाल्पकाशगुरुकोभवति।नअभ्य
वकाशगुरुकोभवति।ननिषद्यगुरुकोभवति।नयाथासंस्तरगुरुकोभवति।नत्रिचीवरगुरुकोभवति।सर्वाद्धुतधुतानिसमायवर्तते।त्रिभिःसततंस्थाने
रितिलिङ्गैरितिनिमित्तैःसमन्वागतोबोधिसत्वोमहासत्वोनवैवर्तिकोवेदितव्यः॥पुनरपरंसततंनवैवर्तिकोबोधिसत्वोमहासत्वोलाभसत्कारश्लोक
गुरुकोभवति।नमात्सर्यचित्तमुत्पादयति।नदौःशील्यचित्तमुत्पादयति।नव्यापादचित्तमुत्पादयति।नकौशीद्यचित्तमुत्पादयति।नासमाहितचित्तमुत्पादयति।न
दौष्प्रज्ञचित्तमुत्पादयति।नर्षचित्तमुत्पादयति।त्रिभिःसततंस्थानैरितिलिङ्गैरितिनिमित्तैःसमन्वागतोबोधिसत्वोमहासत्वोनवैवर्तिकोवेदितव्यः॥पुन
रपरंसततंबोधिसत्वोमहासत्वःछिन्नपृथिवीभवति।गम्भीरनयवीलेक्षोभवति।सत्कृत्यश्रवणतोधर्मंशृणोति।यश्चकश्चित्स्वनातोधर्मंशृणोति
तंसर्वप्रज्ञापारमितयासंशोधयति।यानिचानिलौकिकानिकार्याणितानिप्रज्ञापारमितामार्गस्वधर्मतायासंशोधयति।नकश्चिद्धर्मंसमनुपश्यति
याधर्मधातुर्नानुयुक्तो·सर्वकंप्रज्ञापारमितायायुज्यमानंसमनुपश्यति।इमानिसततंअवैवर्तिकस्यबोधिसत्वस्यमहासत्वस्यअवैवर्तिक
लक्षणानिवेदितव्यानि।सचेत्पुनःसततंअवैवर्तिकस्यबोधिसत्वस्यमहासत्वस्यमारःपापीयानष्टौमहानरकान्निर्मितानिनिर्मीतः।यत्रैकैक

२८।

स्मिन्महानरकेवहूनिबोधिसत्वशतानिवहूनिबोधिसत्वसहस्राणि।वहूनिबोधिसत्वकोटीशतानिवहूनिबोधिसत्वकोटीसहस्राणि।वहूनिबोधिस
त्वकोटीनियुतसहस्राणिदह्यमानानिपच्यमानानितीव्राःखराःकटुकावेदनावेदयमानान्यभिनिर्मायदर्शयेत्दर्शयित्वाचैवंबोधिसत्वाय
महासत्वायवदेत्।इमेबोधिसत्वामहासत्वाअवैवर्तिकाकथगतेनव्याकृताअस्त्वेनष्टहनरकपूपपन्नाः।त्वमपिनेनाधिककथगतेनव्याकृतो
यस्त्वमवैवर्तिकतायांव्याकृतः।पुनरपित्वमवाधिचित्तंप्रतिनिःसृजेत्।एवंत्वंनरकेनोपपत्स्यसे।तदात्वंस्वर्गपरायणोभविष्यसि।सचेत्ततःसततंबोधिसत्व
स्यमहासत्वस्यचित्तंनक्षुभ्यति।नकाङ्क्षतिनविचिकित्सति।वदितव्यंव्याकृतायबोधिसत्वोमहासत्वःसुपोर्थकेकथगतेनहरिःसम्यक्संबुद्धेर्नियताय
बोधिसत्वोमहासत्वोनवैवर्तिकधर्मोच्छिन्नाः।अस्थानंसततंअनवकाशमयदवैवर्तिकाबोधिसत्वामहासत्वानिनरकवान्तिर्यग्योनौवायमलोकेवा
पपद्यते।नदस्यनञ्चिद्याः।त्रिभिःसततंस्थानैरितिलिङ्गैरितिनिमित्तैःसमन्वागतोबोधिसत्वोमहासत्वोनवैवर्तिकोवेदितव्यः॥पुनरपरंसततंस
वैबोधिसत्वंमहासत्वंमारःपापीयान्श्रमणवेषेणैत्यसंक्रम्यैवंवदेत्।यत्त्वयापूर्वंश्रुतंमयासत्वया।दानपारमितायापरिशोधयितव्या।एवंत्वयाशी
लपारमितापरिशोधयितव्या।एवंत्वयाक्षान्तिपारमितापरिशोधयितव्या।एवंत्वयावीर्यपारमितापरिशोधयितव्याः।एवंत्वयाध्यान
पारमितापरिशोधयितव्या।एवंत्वयाप्रज्ञापारमितापरिशोधयितव्या।एवंत्वयाअध्यात्मशून्यतापरिशोधयितव्या।एवंत्वयाबहि
र्धाशून्यतापरिशोधयितव्या।एवंत्वयाअध्यात्मबहिर्धाशून्यतापरिशोधयितव्या।एवंत्वयाशू
न्यताशून्यतापरिशोधयितव्याः।एवंत्वयामहाकरुणापरिशोधयि।एवंत्वयामहाशून्यतापरिशोधयितव्या।एवंत्वयापरमार्थशून्यता
परिशोधयितव्याः।एवंत्वयासंस्कृतशून्यतापरिशोधयितव्याः।एवंत्वयाअसंस्कृतशून्यतापरिशोधयितव्याः।एवंत्वयाअत्यन्तशून्य
तापरिशोधयितव्या।एवंत्वयाअनवराग्रशून्यतापरिशोधयितव्या।एवंत्वयाअनवकारशून्यतापरिशोधयितव्या।एवंत्वयाप्रकृतिशू
न्यताविवर्जितापरिशोधयितव्या।एवंत्वयासर्वधर्मशून्यतापरिशोधयितव्या।एवंत्वयास्वलक्षणशून्यतापरिशोधयितव्या।एवंत्वयाअनु
पलम्भशून्यतापरिशोधयितव्या।एवंत्वयाअभावशून्यतापरिशोधयितव्या।एवंत्वयास्वभावशून्यतापरिशोधयितव्या।एवंत्वयाअभाव
स्वभावशून्यतापरिशोधयितव्या॥एवंत्वयास्मृत्युपस्थानानिपरिशोधयितव्यानि।एवंत्वयाऋद्धिपादाःपरिशोधयितव्या।एवंत्वयाइ
न्द्रियाणिपरिशोधयितव्यानि।एवंत्वयाबोध्यङ्गानिपरिशोधयितव्यानि।एवंत्वयाआर्याष्टाङ्गमार्गःपरिशोधयितव्यः।एवंत्वयाआर्यस

प्र ३

ग्यानि परिन्दापयितव्यानि। त्वं मया ध्यानानि परिन्दापयितव्यानि। त्वं मया अप्रमाणानि परिन्दापयितव्यानि। त्वं मया आरूप्यसमाप
त्तयः परिन्दापयि/परिन्दापयितव्याः। त्वं मया विमोक्षानि परिन्दापयितव्यानि। त्वं मया अनुपूर्वविहारसमापत्तयः परिन्दापयितव्या। त्व
म्मया शून्यता परिन्दापयितव्या। त्वं मया आनिमित्तं परिन्दापयितव्या। त्वं मया अप्रणिहितं परिन्दापयितव्या। त्वं मया अभिज्ञाः परिन्दा
पयितव्या॥ त्वं मया समाधयः परिन्दापयितव्या। त्वं मया धारणीमुखानि परिन्दापयितव्यानि। त्वं मया तथागतबलानि परिन्दापयित
व्यानि। त्वं मया वैशारद्यानि परिन्दापयितव्यानि। त्वं मया महामैत्री परिन्दापयितव्याः। त्वं मयाऽष्टादशावेणिकबुद्धधर्माः परिन्दापयितव्याः
त्वं मया सर्वज्ञता परिन्दापयितव्या॥ त्वं मया मार्गाकारज्ञता परिन्दापयितव्या। त्वं मया सर्वाकारज्ञता परिन्दापयितव्या। त्वं मयानुत्तरास
म्यक्संबोधिः परिन्दापयितव्या। त्रुतिदशभयत्वपार्वेऽतीतानागतप्रत्युत्पन्नास्तथागतानामर्हतां सम्यक्संबुद्धानां सश्रावकानां प्रथमचित्तोत्पादमु
पादाय। यावत्सद्धर्मस्थितिः तस्मिन्नन्तराणि कुशलमूलानि तानि सर्वाण्यनुमोदितानि त्वया इति दशाय प्रतिनिः सृजय त्वया ब्रानेन बुद्धवचनेन
दत्सम्यक्संबुद्धानां लोभितं कविता मतम्। यदहं साधु त्राद्बुद्धवचनमेतत्कथं गतत्वाधितं। स च बोधिसत्वो महासत्वः श्रुत्वा ति कांक्षति विचिकित्सति
देतव्यं नायं बोधिसत्वो महासत्वो व्याकृतस्तैः पौर्वकैस्तथागतैरर्हद्भिः सम्यक्संबुद्धैरनियतो वतायं बोधिसत्वानायं बोधिसत्वोऽवैवर्त्य धात्विः
यच्चात्पुनर्बोधिसत्वो महासत्वो न कांक्षति न कांक्षति न विचिकित्सति धर्मतां प्रतिसरति संस्कारमनत्वादप्रतिसनाति न परस्पृहयाग
च्छत्यपरप्रणेयश्च भवति। दानपारमितायामपरप्रणेयश्च भवति। शीलपारमितायामपरप्रणेयश्च भवति। [illegible] पारमितायामपरप्रणेयश्च भवति।
वीर्यपारमितायामपरप्रणेयश्च भवति। ध्यानपारमितायामपरप्रणेयश्च भवति। प्रज्ञापारमितायामपरप्रणेयश्च भवति। अध्यात्मशून्यतायामप
रप्रणेयश्च भवति बहिर्धाशून्यतायामपरप्रणेयश्च भवति। अध्यात्मबहिर्धाशून्यतायामपरप्रणेयश्च भवति। शून्यताशून्यतायामपरप्रणे
यश्च भवति। संस्कृता महाशून्यतायामपरप्रणेयश्च भवति॥ स्मृत्युपस्थानेष्वपरप्रणेयश्च भवति। परमार्थशून्यतायामपरप्रणेयश्च भवति। सं
स्कृतशून्यतायामपरप्रणेयश्च भवति। असंस्कृतशून्यतायामपरप्रणेयश्च भवति। अत्यन्तशून्यतायामपरप्रणेयश्च भवति। अनवराग्रशून्यता
यामपरप्रणेयश्च भवति। अनवकारशून्यतायामपरप्रणेयश्च भवति। प्रकृतिशून्यतायामपरप्रणेयश्च भवति· सर्वधर्मशून्यतायामपरप्रणेय
श्च भवति। स्वलक्षणशून्यतायामपरप्रणेयश्च भवति। अनुपलम्भशून्यतायामपरप्रणेयश्च भवति। स्वलक्षणशून्यतायामपरप्रणेयश्च भवति।
अभावशून्यतायामपरप्रणेयश्च भवति। स्वभावशून्यतायामपरप्रणेयश्च भवति। अभावस्वभावशून्यतायामपरप्रणेयश्च भवति। स्मृत्युपस्था

२५२

श्री

नेष्वपरप्रणेयश्च भवति। सम्यक्प्रहाणेष्वपरप्रणेयश्च भवति। ऋद्धिपादेष्वपरप्रणेयश्च भवति। इन्द्रियेष्वपरप्रणेयश्च भवति। बलेष्वपरप्र
णेयश्च भवति। बलेष्वपरप्रणेयश्च भवति। बोध्यङ्गेष्वपरप्रणेयश्च भवति। बोध्यङ्गेष्वपरप्रणेयश्च भवति। आर्याष्टाङ्गमार्गेऽपरप्रणेयश्च भवति
आर्यसत्येष्वपरप्रणेयश्च भवति। ध्यानेष्वपरप्रणेयश्च भवति। अप्रमाणेष्वपरप्रणेयश्च भवति। आरूप्यसमापत्तिष्वपरप्रणेयश्च भवति। अष्ट
सु विमोक्षेष्वपरप्रणेयश्च भवति। नवस्वनुपूर्वविहारसमापत्तिष्वपरप्रणेयश्च भवति। शून्यतानिमित्ताप्रणिहितविमोक्षमुखेष्वपरप्रणेय
श्च भवति। अभिज्ञास्वपरप्रणेयश्च भवति। समाधिष्वपरप्रणेयश्च भवति। धारणीमुखेष्वपरप्रणेयश्च भवति। दशसु तथागतबलेष्वपरप्रणेय
श्च भवति। चतुर्षु वैशारद्येष्वपरप्रणेयश्च भवति। शून्यतानिमित्ताप्रणिहितविमोक्षमुखे चतसृषु प्रतिसंवित्स्वपरप्रणेयश्च भवति। महामै
त्र्यामपरप्रणेयश्च भवति। महाकरुणायामपरप्रणेयश्च भवति। अष्टादशस्वावेणिकबुद्धधर्मेष्वपरप्रणेयश्च भवति। स्रोतआपत्तिफलेऽ
परप्रणेयश्च भवति। सकृदागामिफलेऽपरप्रणेयश्च भवति। अनागामिफलेऽपरप्रणेयश्च भवति। अर्हत्त्वेऽपरप्रणेयश्च भवति। प्रत्येकबो
धेऽपरप्रणेयश्च भवति। अनुत्तरायां सम्यक्संबोधा [illegible] न परस्पृहया गच्छति। प्रत्येकबुद्धधर्मतायामसंहार्यो भवति।
मारेण पापीयसा त्वमवस्तृतेन नव यावैवर्त्तिको बोधिसत्वो महासत्वः श्रावकयानिकैश्च प्रत्येकबुद्धयानिकैश्च अप्रणुद्यो बुद्धधर्मेत्वप्यनु
त्तरायाः सम्यक्संबोधेर्नियतध्वयं स खलु बोधिसत्वो महासत्वो वैवर्त्तिकधातोः स्थितः अपरप्रणेयश्च भवति॥ सा तथागतस्यार्हतः सम्यक्संबुद्ध
स्य श्रद्धया गच्छति। प्रागेव श्रावकयानिकानां श्रद्धया गच्छेत् इदं स्थानं विद्यते। प्रागेव प्रत्येकबुद्धयानिकानां श्रद्धया गच्छेत्। नेदं स्थानं विद्य
ते। प्रागेव मारस्य पापीयसः श्रद्धया गच्छेत् इदं स्थानं विद्यते प्रागेवान्यतीर्थिकानामन्यनिप्राजकानां श्रद्धया गच्छेन्नेदं स्थानं विद्यते। तत्कस्य
हेतोः तथाहि स न कञ्चिद्धर्मं समनुपश्यति यस्य स श्रद्धया गच्छेत्। रूपं वा रूपस्य वा तथतां न समनुपश्यति। वेदनां वा वेदनाया वा तथतां न
समनुपश्यति। संज्ञां वा संज्ञाया वा तथतां न समनुपश्यति। संस्कारान्वा संस्काराणां वा तथतां न समनुपश्यति। विज्ञानं वा विज्ञानस्य वा तथतां न
समनुपश्यति। चक्षुर्वा चक्षुषो वा तथतां न समनुपश्यति। श्रोत्रं वा श्रोत्रस्य वा तथतां न समनुपश्यति। घ्राणं वा घ्राणस्य वा तथतां न समनुपश्यति।
जिह्वां वा जिह्वाया वा तथतां न समनुपश्यति। कायं वा कायस्य वा तथतां न समनुपश्यति। मनो वा मनसो वा तथतां न समनुपश्यति। रूपं वा रूपस्य
वा तथतां न समनुपश्यति। शब्दं वा शब्दस्य वा तथतां न समनुपश्यति। गन्धं वा गन्धस्य वा तथतां न समनुपश्यति। रसं वा रसस्य वा तथतां न सम


0 cms.
5
10
15
20
25
30
35
40

नुपश्यति।स्पर्शम्वास्पर्शस्यवातथतांनसमनुपश्यति।धर्मम्वाधर्मस्यवातथतांनसमनुपश्यति चक्षुर्विज्ञानम्वाचक्षुर्विज्ञानस्यवातथतांनसमनुपश्य
ति।श्रोत्रविज्ञानंवाश्रोत्रविज्ञानस्यतथतांनसमनुपश्यति।घ्राणविज्ञानंवाघ्राणविज्ञानस्यतथतांनसमनुपश्यति।जिह्वाविज्ञानम्वाजिह्वाविज्ञान
स्यतथतांनसमनुपश्यति।कायविज्ञानंवाकायविज्ञानस्यतथतांनसमनुपश्यति।मनोविज्ञानम्वामनोविज्ञानस्यतथतांनसमनुपश्यति।चक्षुःसं
स्पर्शंवाचक्षुःसंस्पर्शस्यतथतांनसमनुपश्यति।श्रोत्रसंस्पर्शम्वाश्रोत्रसंस्पर्शतथतान्नसमनुपश्यति।घ्राणसंस्पर्शम्वाघ्राणसंस्पर्शतथतां
नसमनुपश्यति।जिह्वासंस्पर्शम्वाजिह्वासंस्पर्शतथतान्नसमनुपश्यति।कायसंस्पर्शम्वाकायसंस्पर्शतथतांनसमनुपश्यति।मनःसंस्पर्श
म्वामनःसंस्पर्शस्यतथतांनसमनुपश्यति।चक्षुःसंस्पर्शप्रत्ययवेदनांवाचक्षुःसंस्पर्शप्रत्ययवेदनायावातथतांनसमनुपश्यति।श्रोत्रसंस्प
र्शप्रत्ययवेदनाम्वाश्रोत्रसंस्पर्शप्रत्ययवेदनायावातथतान्नसमनुपश्यति।घ्राणसंस्पर्शप्रत्ययवेदनाम्वाघ्राणसंस्पर्शप्रत्ययवेदनायावातथ
तान्नसमनुपश्यति।जिह्वासंस्पर्शप्रत्ययवेदनांवाजिह्वासंस्पर्शप्रत्ययवेदनायातथतान्नसमनुपश्यति।कायसंस्पर्शप्रत्ययवेदनायांवा
कायसंस्पर्शप्रत्ययवेदनायावातथतान्नसंसमनुपश्यति।मनःसंस्पर्शप्रत्ययवेदनांवामनःसंस्पर्शप्रत्ययवेदनायावातथतान्नसमनुपश्य
ति।पृथिवीधातुम्वापृथिवीधातोर्वातथतान्नसमनुपश्यति।अब्धातुम्वाअब्धातोर्वातथतान्नसमनुपश्यति।तेजोधातुम्वातेजोधातोर्वातथतां
नसमनुपश्यति।वायुधातुम्वावायुधातोर्वातथतान्नसमनुपश्यति।आकाशधातुम्वाआकाशधातोर्वातथतान्नसमनुपश्यति।विज्ञानधा
तुम्वाविज्ञानधातोर्वातथतांनसमनुपश्यति।।अविद्याम्वाअविद्यायावातथतान्नसमनुपश्यति।संस्कारान्म्वासंस्काराणाम्वातथतान्नसम
नुपश्यति।।विज्ञानम्वाविज्ञानस्यवातथतान्नसमनुपश्यति।नामरूपम्वानामरूपस्यवातथतान्नसमनुपश्यति।षडायतनम्वाषडा
यतनस्यवातथतान्नसमनुपश्यति।स्पर्शम्वास्पर्शस्यवातथतान्नसमनुपश्यति।वेदनायाम्वावेदनायावातथतान्नसमनुपश्यति।तृष्णां
वातृष्णायावातथतान्नसमनुपश्यति।उपादानम्वाउपादानस्यतथतान्नसमनुपश्यति।भवम्वाभवस्यतथताञ्चानसमनुपश्यति।जा
तिम्वाजातेर्वातथतान्नसमनुपश्यति।जरामरणम्वाजरामरणस्यतथतान्नसमनुपश्यति।दानपारमिताम्वादानपारमितायावा
नसमनुपश्यति।शीलपारमिताम्वाशीलपारमितायावातथतान्नसमनुपश्यति।क्षान्तिपारमिताम्वाक्षान्तिपारमितायाव
तथतान्नसमनुपश्यति।वीर्यपारमिताम्वावीर्यपारमितायावातथतान्नसमनुपश्यति।ध्यानपारमितांवाध्यानपारमितायावातथतान्नस

मनुपश्यति।प्रज्ञापारमिताम्वाप्रज्ञापारमितायावातथतान्नसमनुपश्यति।अध्यात्मशून्यताम्वाअध्यात्मशून्यतायानसमनुपश्यति।बहिर्धाशून्य
ताम्वाबहिर्धाशून्यतायानसमनुपश्यति।अध्यात्मबहिर्धाशून्यताम्वाअध्यात्मबहिर्धाशून्यतायांवानसमनुपश्यति।महाशून्यताम्वामहाशून्यता
याम्वानसमनुपश्यति।परमार्थशून्यताम्वापरमार्थशून्यतायावातथतान्नसमनुपश्यति।संस्कृतशून्यताम्वासंस्कृतशून्यतायावातथतान्नसमनु
पश्यति।असंस्कृतशून्यतांवाअसंस्कृतशून्यतायावातथतान्नसमनुपश्यति।सर्वधर्मशून्यताम्वासर्वधर्मशून्यतायावातथतान्नसमनुपश्यति।स्वल
क्षणशून्यताम्वास्वलक्षणशून्यतायावातथतान्नसमनुपश्यति।अनुपलम्भशून्यताम्वाअनुपलम्भशून्यतायावातथतान्नसमनुपश्यति।अभावशू
न्यतायावातथतान्नसमनुपश्यति।स्वभावशून्यताम्वास्वभावशून्यतायाम्वातथतान्नसमनुपश्यति।अभावस्वभावशून्यतायांवातथतान्नसम
नुपश्यति।स्मृत्युपस्थानानिवास्मृत्युपस्थानानांवातथतान्नसमनुपश्यति।ऋद्धिपादांवाऋद्धिपादानांवातथतान्नसमनुपश्यति।इन्द्रियाणि
वाइन्द्रियाणाम्वातथतान्नसमनुपश्यति।बलानिवाबलानाम्वातथतान्नसमनुपश्यति।बोध्यङ्गानिवाबोध्यङ्गानांवातथतान्नसमनुपश्यति।
आर्याष्टाङ्गमार्गम्वातथतान्नसमनुपश्यति।आर्यसत्यानिवाआर्यसत्यानाम्वातथतान्नसमनुपश्यति।ध्यानानिवाध्यानानाम्वातथतान्नसमनुपश्य
ति।अप्रमाणानिवाअप्रमाणानान्तथतानसमनुपश्यति।आरूप्यसमापत्तीर्वाआरूप्यसमापत्तीनाम्वातथतान्नसमनुपश्यति।विमोक्षाम्वावि
मोक्षाणाम्वातथतान्नसमनुपश्यति।विमोक्षाङ्गांवाविमोक्षाङ्गानांवातथतान्नसमनुपश्यति।नवानुपूर्वविहारसमापत्तीनांवातथतान्नसमनुपश्यति
शून्यताम्वाशून्यतायाम्वातथतान्नसमनुपश्यति।आनिमित्तंवातथतान्नसमनुपश्यति।अप्रणिहितम्वाअप्रणिहितस्यवातथतान्नसमनुपश्यति।अभि
ज्ञाम्वाअभिज्ञानाम्वातथतान्नसमनुपश्यति।समाधीम्वासमाधीनाम्वातथतान्नसमनुपश्यति।धारणीमुखानिवाधारणीमुखानान्तथतानस
मनुपश्यति।तथागतबलानिवातथागतबलानान्तथतानसमनुपश्यति।वैशारद्यानिवावैशारद्यानाम्वातथतान्नसमनुपश्यति।प्रति
संविदांवाप्रतिसंविदाम्वातथतान्नसमनुपश्यति।महामैत्रीम्वामहामैत्र्यावातथतान्नसमनुपश्यति।महाकरुणाम्वातथतान्नससमनुप
श्यति।महाकरुणाम्वातथतान्नसमनुपश्यति।आवेणिकबुद्धधर्माणाम्वातथतान्नसमनुपश्यति।स्रोतआपत्तिफलम्वास्रोतआपत्तिफ
लस्यतथतान्नसमनुपश्यति।सकृदागामिफलम्वासकृदागामिफलस्यवातथतान्नसमनुपश्यति।अनागामिफलम्वाअनागामिफलस्यतथतान्न
समनुपश्यति।अर्हत्वम्वाअर्हत्वस्यवातथतान्नसमनुपश्यति।प्रत्येकबोधिंवाप्रत्येकबोधेर्वातथतान्नसमनुपश्यति।मार्गाकारज्ञताम्वामार्गाका



प्रथम

नकृतायाः स्थानान्न समनुपश्यति सर्वाकारज्ञतास्वा नेपथ्यो सर्वाकारज्ञतायां गतयान्त समनुपश्यति। बोधिमपि न समनुपश्यति बोधिपर्यापन्नं तथागतं
न समनुपश्यति। एभिः सुभूते आकारैर्लिंगैर्निमित्तैः समन्वागतो बोधिसत्त्वो महासत्त्वो ऽवैवर्त्तिको वेदितव्यः। पुनरपरं सुभूते मारः पापीयां
भिक्षुवेषेण बोधिसत्त्वं महासत्त्वमुपसंक्रम्यैवमवदत्। संसारावचारिके घानेषा बोधिसत्त्वचारिका इहैव त्वं दुःखस्यान्तं कुरु। स खलु पुनर्मारः
पापीयां बोधिसत्त्वस्य महासत्त्वस्य मार्गप्रतिरूपकं दर्शयति। यं मार्गप्रतिरूपकं संसारावचरं च नं लौकिकं यदि वा [illegible] संज्ञामुपदर्शयति। य
दि वा प्रथमं ध्यानमुपदर्शयति। यदि वा द्वितीयं ध्यानमुपदर्शयति। यदि वा तृतीयं ध्यानमुपदर्शयति। यदि वा मैत्रीमुपदर्शयति। यदि वा क
रुणामुपदर्शयति। यदि वा मुदितामुपदर्शयति। यदि वा ऽऽकाशानन्त्यायतनमुपदर्शयति। यदि वा विज्ञानानन्त्यायतनमुपदर्शयति। यदि वा ऽऽकि
ञ्चन्यायतनमुपदर्शयति। यदि वा नैवसंज्ञानासंज्ञायतनमुपदर्शयति। अयं मार्गः अयं मार्गः एष्यं प्रतिपद्यस्व येन मार्गेण यया प्रतिपदा स्रोतआ
पत्तिफलमनुप्राप्स्यसि सकृदागामिफलमनुप्राप्स्यसि अनेन त्वमायुष्मन् मार्गेणानया प्रतिपदा इहैव दुःखस्यान्तं करिष्यसि। न त्वं भूयस्तानि संसारा
वचराणि दुःखानि प्रत्यनुभविष्यसि। इहैवाद्य आत्मना वेदनाभिनिवृत्तो भविष्यसि। किमस्य मन्यमात्मभावं परिगृहीतं मन्यसे। स च सुभूते
एवं बोधिसत्त्वस्य महासत्त्वस्य चित्तं न क्षुभ्यति। न चलत्युत्त्रसति नासौ भवति। बहुकं नाम अयं भिक्षुर्यो मार्गप्रतिरूपकं दर्शयति। यन्मार्गप्र
तिरूपकं नैव स्रोतआपत्तिफलसाक्षात्क्रियायै संवर्त्तते न सकृदागामिफलसाक्षात्क्रियायै संवर्त्तते नानागामिफलसाक्षात्क्रियायै संवर्त्तते ना
र्हत्त्वफलसाक्षात्क्रियायै संवर्त्तते न प्रत्येकबुद्धसाक्षात्क्रियायै संवर्त्तते नानुत्तरायाः सम्यक्संबोधेः साक्षात्क्रियायै संवर्त्तते। उत्तरं चा
स्य हर्ष उत्पद्यते। बहुकं नाम अयं भिक्षुर्यो मम संगमुपादिशति। यत्तस्यैतां सर्गीपज्ञा सर्वबुद्धिप्रियानबुद्धिक्रियायै। तस्मै व मारः पापीयांबो
धिसत्त्वं महासत्त्वं हर्षितं विदित्वैवमवदति। इच्छसि त्वं कुलपुत्र द्रष्टुं ये बोधिसत्त्वे महासत्त्वे गंगानदीवालुकोपमान् बुद्धान् भगवतः उपस्थिताश्ची
वरपिण्डपात्रशयनासनग्लानप्रत्ययभैषज्यपरिष्कारैर्गंगानदीवालुकोपमानामेव तथागतानामर्हतां सम्यक्संबुद्धानामन्तिके दानपा
रमिता परिपूरिता। शीलपारमिता परिपूरिता। क्षान्तिपारमिता परिपूरिता। वीर्यपारमिता परिपूरिता। ध्यानपारमिता परिपूरिता। प्रज्ञा
पारमिता परिपूरिता। गंगानदीवालुकोपमांश्च तथागतान् पर्युपासिता परिपृच्छा परिप्रश्नीकृता। कथं बोधिसत्त्वयानस्यार्थ्यं कथं बोधि
सत्त्वेन महासत्त्वेन यानस्थातव्यं॥ दानपारमितायां चरता। शीलपारमितायां चरता। क्षान्तिपारमितायां चरता। वीर्यपारमितायां चरता। ध्यान

२६

पारमितायां चरता। प्रज्ञापारमितायां चरता॥ अध्यात्मशून्यतायां चरता। बहिर्द्धाशून्यतायां चरता। अध्यात्मबहिर्द्धाशून्यतायां चरता। शून्यता
शून्यतायां चरता। महाशून्यतायां चरता। परमार्थशून्यतायां चरता। संस्कृतशून्यतायां चरता। असंस्कृतशून्यतायां चरता। अत्यन्तशून्यतायां चरता।
अनवराग्रशून्यतायां चरता। अनवकारशून्यतायां चरता। प्रकृतिशून्यतायां चरता। सर्वधर्मशून्यतायां चरता। स्वलक्षणशून्यतायां चर
ता। अनुपलम्भशून्यतायां चरता। अभावशून्यतायां चरता। स्वभावशून्यतायां चरता। अभावस्वभावशून्यतायां चरता। स्मृत्युपस्थानेषु चरता।
सम्यक्प्रहाणेषु चरता। ऋद्धिपादेषु चरता। इन्द्रियेषु चरता॥ बलेषु चरता। बोध्यङ्गेषु चरता। आर्याष्टाङ्गमार्गे चरता। आर्यसत्येषु चरता।
ध्यानेषु चरता। अप्रमाणेषु चरता। आरूप्यसमापत्तिषु चरता। अष्टासु विमोक्षेषु चरता॥ नवस्वनुपूर्वविहारसमापत्तिषु चरता। शून्यतानिमि
त्ताप्रणिहितविमोक्षमुखेषु चरता। अभिज्ञासु चरता॥ समाधिषु चरता। धारणीमुखेषु चरता। दशसु तथागतबलेषु चरता। चतुर्षु वैशारद्ये
षु चरता। चतसृषु प्रतिसंविदेषु चरता॥ महामैत्र्यां चरता। महाकरुणायां चरता। अष्टादशस्वावेणिकेषु बुद्धधर्मेषु चरता। सर्वज्ञतायां चरता। मार्गा
कारज्ञतायां चरता। सर्वाकारज्ञतायां चरता। [illegible] एवमाव बोधिसत्त्वे महासत्त्वे नन्दना
सम्यक्संबोधि [illegible] कथाश्चिते [illegible] सा सर्वाकारज्ञतानानुप्राप्ता। पुनस्त्वमनुप्राप्स्यस्यनुत्तरां सम्यक्सं
बो[illegible]धि॥ बोधिसत्त्वस्य महासत्त्वस्यैवं भाष्यमाणस्य चित्तस्यान्यथात्वं भवति। नाग्रस्यति। न संत्रस्यति। न संत्रासमापद्यते। भूयस्य बहु हर्ष उत्पद्यते
तां बहुकं नाम [illegible] यो मम संप्रकाशयति। येः [illegible] स्रोतआपत्तिफलमनुप्राप्स्यामि सकृदागामिफलमनुप्राप्स्यामि अनागामि
फलमनुप्राप्स्यामि अर्हत्त्वमनुप्राप्स्यामि प्रत्येकबोधिमनुप्राप्स्यामि मार्गाकारज्ञतामनुप्राप्स्यामि सर्वाकारज्ञतामनुप्राप्स्यामि। तस्य स मारः पापी
यां बोधिसत्त्वस्य महासत्त्वस्य चित्तस्यानवलीनतां विदित्वा तस्मिन्नेव पृथिवीप्रदेशे स्मयकृत्वा भिक्षूनभिनिर्मिमीते। अनुमत सर्वैरर्हत्क्षी
णास्रवा ये अनुत्तरायै सम्यक्संबोधये संप्रस्थिता अभूवन्। ते सर्वेऽर्हत्त्वे स्थिताः कृतः त्वमनुत्तरां सम्यक्संबोधिमभिसंबोत्स्यसे। स चेत्सुभूते बोधि
सत्त्वस्य महासत्त्वस्यैवं भवति। मारो वतायं पापीयां मार्गप्रतिरूपकमुपदिशति। न च बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्प्रत्युदा
वर्त्तते ऽनुत्तरायाः सम्यक्संबोधेः। न च श्रावकभूमौ वा प्रत्येकबुद्धभूमौ वा पतिष्यति। उक्तं चास्येवमेव पुनस्त्वमनवकाशो यद्बोधिसत्त्वो महास
त्त्वो महासत्त्वः दानपारमितायां चरन्। शीलपारमितायां चरन्। क्षान्तिपारमितायां चरन्। वीर्यपारमितायां चरन्। ध्यानपारमितायां चरन्


0 cms.
5
10
15
20
25
30
35
40

प्रज्ञ·

ना प्रज्ञापारमितायां चरन्। यावत्सर्वाकारज्ञतां [illegible] ज्ञानं सम्यक्संबोधिमभिसंबुध्यते [illegible] इदं स्थानं विद्यते। पुनरपरं सुभूते अवैवर्त्तिक
स्य बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरत [illegible] यथा [illegible] प्रज्ञापारमिता प्रतिसंयुक्तै
र्मनसिकारैर्विरहितस्य न परिहीयते। दानपारमिता न परिहीयते। शीलपारमिता न परिहीयते। क्षान्तिपारमिता न परिहीयते। वीर्यपारमिता
न परिहीयते। ध्यानपारमिता न परिहीयते। प्रज्ञापारमिता न परिहीयते। अध्यात्मशून्यता न परिहीयते। बहिर्धाशून्यता न परिहीयते। अध्या
त्मबहिर्धाशून्यता न परिहीयते। शून्यताशून्यता न परिहीयते। महाशून्यता न परिहीयते। परमार्थशून्यता न परिहीयते। संस्कृतशून्यता न परि
हीयते। असंस्कृतशून्यता न परिहीयते। अत्यन्तशून्यता न परिहीयते। अनवराग्रशून्यता न परिहीयते। अनवकारशून्यता न परिहीयते। प्रकृति
शून्यता न परिहीयते। सर्वधर्मशून्यता न परिहीयते। स्वलक्षणशून्यता न परिहीयते। अनुपलम्भशून्यता न परिहीयते। अभावशून्यता न परि
हीयते। स्वभावशून्यता न परिहीयते। अभावस्वभावशून्यता न परिहीयते॥ स्मृत्युपस्थानानि न परिहीयते। सम्यक्प्रहाणानि न परिहीयते।
[illegible] ऋद्धिपादानि न परिहीयते। इन्द्रियानि न परिहीयते। बलानि न परिहीयते। बोध्यङ्गानि न परिहीयते। आर्याष्टाङ्गमार्गानि न परिहीयते। आ
र्यसत्यानि न परिहीयते। ध्यानानि न परिहीयते। अप्रमाणानि न परिहीयते। आरूप्यसमापत्तीनि न परिहीयते। विमोक्षानि न परिहीयते।
अनुपूर्वविहारसमापत्तीनि न परिहीयते। शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि न परिहीयते। अभिज्ञानि न परिहीयते। समाधीनि
न परिहीयते। धारणीमुखानि न परिहीयते। तथागतबलानि न परिहीयते। चतुर्वैशारद्यानि न परिहीयते। चतस्रः प्रतिसंविदानि
परिहीयते। महामैत्री न परिहीयते। महाकरुणा न परिहीयते। अष्टादश [illegible] न परिहीयते। आवेणिकबुद्धधर्मानि न परिहीयते। सर्वज्ञता न प
रिहीयते। मार्गाकारज्ञता न परिहीयते। सर्वाकारज्ञता न परिहीयते॥ पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्यैवं भवति। यावन्न कर्मपथा
न परिहीयते अनुत्तरायाः सम्यक्संबोधेः। एभिः सुभूते आकारैर्लिङ्गैर्निमित्तैः समन्वागतो बोधिसत्त्वो महासत्त्वः अवैवर्त्तिको वेदितव्यः। अथ
सुभूतिरायुष्मान् [illegible] तद्वोचत्। कतमैर्भगवन्नवैवर्त्तिको बोधिसत्त्वो महासत्त्वो विवर्त्तते अनुत्तरायाः सम्यक्संबोधेः। एभिः सुभूते आकारै
र्लिङ्गैर्निमित्तैः समन्वागतो बोधिसत्त्वो महासत्त्वो विवर्त्तते। अवैवर्त्तिकः सुभूते संज्ञातो [illegible] रूपसंज्ञायाः सुभूते विवर्त्तते अनुत्त
राः सम्यक्संबोधेः वेदनासंज्ञाया विवर्त्तते। संज्ञासंज्ञाया विवर्त्तते। संस्कारसंज्ञाया विवर्त्तते। विज्ञानसंज्ञाया विवर्त्तते। धातुसंज्ञाया विव
र्त्तते। आयतनसंज्ञाया विवर्त्तते। रागसंज्ञाया विवर्त्तते। द्वेषसंज्ञाया विवर्त्तते। मोहसंज्ञाया विवर्त्तते। दृष्टिसंज्ञाया विवर्त्तते। पारमितासं

२८१

ज्ञाया विवर्त्तते। शून्यताशून्यताया विवर्त्तते। स्मृत्युपस्थानसंज्ञाया विवर्त्तते। सम्यक्प्रहाणसंज्ञाया विवर्त्तते। ऋद्धिपादसंज्ञाया विवर्त्तते। इन्द्रिय
संज्ञाया विवर्त्तते। बलसंज्ञाया विवर्त्तते। बोध्यङ्गसंज्ञाया विवर्त्तते। आर्याष्टाङ्गमार्गसंज्ञाया विवर्त्तते। आर्यसत्यसंज्ञाया विवर्त्तते। ध्यानसंज्ञाया
विवर्त्तते। अप्रमाणसंज्ञाया विवर्त्तते। आरूप्यसमापत्तिसंज्ञाया विवर्त्तते। अनुपूर्वविहारसमापत्तिसंज्ञाया विवर्त्तते। शून्यतानिमित्ताप्रणि
हितविमोक्षमुखसंज्ञाया विवर्त्तते। अभिज्ञासंज्ञाया विवर्त्तते। समाधिसंज्ञाया विवर्त्तते। धारणीमुखसंज्ञाया विवर्त्तते। तथागतबलसंज्ञाया
विवर्त्तते। वैशारद्यसंज्ञाया विवर्त्तते। प्रतिसंवित्संज्ञाया विवर्त्तते। महामैत्रीसंज्ञाया विवर्त्तते। महाकरुणासंज्ञाया विवर्त्तते। आवेणिकबु
द्धधर्मसंज्ञाया विवर्त्तते। स्रोतआपत्तिफलसंज्ञाया विवर्त्तते। सकृदागामिफलसंज्ञाया विवर्त्तते। अनागामिफलसंज्ञाया विवर्त्तते। अर्हत्व
संज्ञाया विवर्त्तते। प्रत्येकबोधिसंज्ञाया विवर्त्तते। सम्यक्संबोधिसंज्ञाया विवर्त्तते। श्रावकसंज्ञाया विवर्त्तते। प्रत्येकबुद्धसंज्ञाया विवर्त्तते। बोधि
सत्त्वसंज्ञाया विवर्त्तते। बुद्धसंज्ञाया विवर्त्तते। तत्कस्य हेतोः। तथा ह्यवैवर्त्तिको बोधिसत्त्वो महासत्त्वः स्वलक्षणशून्यताया विवर्त्तते। धर्मेषु सर्वे
बोधिसत्त्वा [illegible] न पि धर्मेनोपलभ्यते। अनुपलम्भमानो [illegible] नोत्पादयति [illegible]। अनुत्पादकाभि
[illegible] बोधिसत्त्वो [illegible] अवैवर्त्तिक [illegible] आकारैर्लिङ्गैर्निमित्तैः समन्वागतो बोधिसत्त्वो महासत्त्वो वेदितव्यः॥ ॥
[illegible] साहस्रिकायाः प्रज्ञापारमितायाः परिवर्त [illegible] ॥ पुनरपरं सुभूते मारः पापीयां बोधिसत्त्वस्य महासत्त्वस्य उपसंक्रम्यैवं वक्ष्य
ति [illegible] आकाशसमा॥ ॥सर्वाकारज्ञता अभावस्वभावा स्वलक्षणशून्या [illegible] पि धर्म आकाशसमा अभावस्वभावः स्वलक्षणशून्यतान
आकाशसमेषु सर्वधर्मेषु अभावस्वभावेषु स्वलक्षणशून्येषु कश्चिद्धर्म उपलभ्यते। [illegible] सम्बुद्धता [illegible] सर्वत्र
[illegible] आकाशसमा धर्मा अभावस्वभावाः स्वलक्षणशून्याः निरर्थकस्त्वं [illegible] यदनुत्तरां सम्यक्संबोधिमभिसंबोद्धव्याः
नेदं सम्यक्संबोधिमभिसंबोधि [illegible] सम्बोधव्याः। नेदं सम्यक्संबुद्धभाषितं। [illegible] मनसिकारा [illegible] दीर्घमायुष्मन्
[illegible] अनुत्तरायाः स
म्यक्संबोधेर्विवर्त्तयति। किं तु आकाशसमाः सर्वधर्मा अभावस्वभावाः स्वलक्षणशून्याः [illegible] न पश्यति न पृच्छति [illegible] आका
शसमत्वभावस्वभावस्वलक्षणशून्यता [illegible] सर्वाकारज्ञतामभिसंबुध्य सर्वसत्त्वानां धर्मं देशयिष्यामि [illegible]

आपत्तिफले प्रतिष्ठापयिष्यामः सकृदागामिफले प्रतिष्ठापयिष्यामः। अर्हत्वे प्रतिष्ठापयिष्यामः। प्रत्येकबोधौ प्रतिष्ठापयिष्यामः। अनुत्तरायां सम्यक्संबोधौ प्रतिष्ठापयिष्यामः॥ न बोधिसत्वेन महासत्वेन प्रथमचित्तोत्पादाय मांधर्मीकृत्वाहं चित्तेन। यात्व्यमसंहार्यचित्तेन भवितव्यम्॥ सानद्रहं चित्ताचैया अकम्प्यचित्तया असंहार्यचित्तया समन्वागतः स्वपारमितासु चरन् बोधिसत्वन्याममवक्रामति। अथ खलु सुभूतिर्भगवन्तमेतदवोचत्। किं पुनर्भगवन्नवैवर्तिको बोधिसत्वो महासत्वोऽवैवर्तिको वदितव्यः। उताहो वैवर्तिको वदितव्यः। भगवानाह। अवैवर्तिकः सुभूते बोधिसत्वो महासत्वोऽवैवर्तिको वदितव्यः॥ आह। कथं भगवन्नवैवर्तिको वक्तव्यः। वैवर्तिको बोधिसत्व अवैवर्तिको वक्तव्यः। भगवानाह॥ यः सुभूते बोधिसत्वो महासत्वः श्रावकभूमेर्वा प्रत्येकबुद्धभूमेर्वा विवर्त्तितः। अयं सुभूते वैवर्तिको बोधिसत्वो महासत्वोऽवैवर्तिको वदितव्यः। यः पुनः सुभूते बोधिसत्वः श्रावकभूमेर्वा प्रत्येकबुद्धभूमेर्वा नाविवर्तितः। अयं सुभूते अवैवर्तिको बोधिसत्वो महासत्वो मानसपापीयसा न शक्यो विवेचयितुमनुत्तरायाः सम्यक्संबोधेः॥ पुनरपरं सुभूते आकारैरवैवर्तिको बोधिसत्वो महासत्वो वैवर्तिको वक्तव्यः। त्रिः सयत आकारैर्न लिङ्गैर्न निमित्तैः समन्वागतः सोऽवैवर्तिकफलं कथं वदितव्यः। येनाकारैर्येलिङ्गैर्येनिमित्तैः समन्वागतः सोऽवैवर्तिको बोधिसत्वो महासत्वो मानसपापीयसा न शक्यो विवेचयितुमनुत्तरायाः सम्यक्संबोधेः॥ पुनरपरं सुभूते आकारैरवैवर्तिको बोधिसत्वो महासत्वः प्रथमं ध्यानं समापद्यते। द्वितीयं ध्यानं समापद्यते। तृतीयं ध्यानं समापद्यते। चतुर्थं ध्यानं समापद्यते। मैत्रीं समापद्यते। करुणां समापद्यते। मुदितां समापद्यते। उपेक्षां समापद्यते। आकाशानन्त्यायतनं समापद्यते। विज्ञानानन्त्यायतनं समापद्यते। आकिञ्चन्यायतनं समापद्यते। नैवसंज्ञानासंज्ञायतनं समापद्यते॥ विज्ञानानन्त्यायतनं समापद्यते। निरोधसमापत्तिं समापद्यते॥ पुनरपरं सुभूते आकारैरभिवैवर्तिको बोधिसत्वो महासत्वश्चत्वारि स्मृत्युपस्थानानि समापद्यते। चत्वारि सम्यक्प्रहाणानि समापद्यते॥ चत्वारि ऋद्धिपादानि समापद्यते। पञ्चेन्द्रियाणि समापद्यते। पञ्चबलानि समापद्यते। सप्त बोध्यङ्गानि समापद्यते। आर्याष्टाङ्गमार्गं समापद्यते। शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि हितां समाधीन् समापद्यते। पञ्चाभिज्ञां निर्हरति निर्हरति। स चतुर्भिर्ध्यानैश्चतुर्भिरप्रमाणैश्चतसृभिरारूप्यसमापत्तिभिर्निरोधसमापत्तेः पनिवयं करोति। बलानि स्मृत्युपस्थानानि लावयति। बलानि सम्यक्प्रहाणानि लावयति। बलानि ऋद्धिपादान् लावयति। पञ्चबलानि लावयति। सप्तबोध्यङ्गानि लावयति। आर्याष्टाङ्गमार्गं लावयति। आर्यसत्यानि लावयति। शून्यतानिमित्ताप्र

वरेधं

णिहितां समाधीन् लावयति न समापद्यते। न च ध्यानफलं परिगृह्णाति। नाप्रमाणफलं परिगृह्णाति। नारूप्यसमापत्तिफलं परिगृह्णाति। न निरोधसमापत्तिफलं परिगृह्णाति। न स्रोतआपत्तिफलं परिगृह्णाति। न सकृदागामिफलं परिगृह्णाति। नानागामिफलं परिगृह्णाति। नार्हत्वं परिगृह्णाति। न प्रत्येकबोधिं परिगृह्णाति। आकाङ्क्षमाणः सचित्तमुत्पादं परिगृह्णाति। यत्र सत्वान् सत्वानामर्थं करोति। तमात्मभावं परिगृह्णाति। एभिः सुभूते आकारैरेभिर्लिङ्गैरेभिर्निमित्तैः समन्वागतो बोधिसत्वो महासत्वोऽवैवर्तिको वदितव्यः॥ पुनरपरं सुभूतेऽवैवर्तिको बोधिसत्वो महाबोधिमनसिकारेण समन्वागतो बोधिचित्तेन वा विरहितो न रूपगुरुको भवति। न लक्षणगुरुको भवति। नाश्रयगुरुको भवति। न दानगुरुको भवति। न शीलगुरुको भवति। न क्षान्तिगुरुको भवति। न वीर्यगुरुको भवति। न ध्यानगुरुको भवति। प्रज्ञागुरुको भवति॥ नाध्यात्मशून्यतागुरुको भवति। न बहिर्धाशून्यतानेपतिगुरुको भवति। नाध्यात्मबहिर्धाशून्यतागुरुको भवति। न शून्यताशून्यतागुरुको भवति। न महाशून्यतागुरुको भवति। न परमार्थशून्यतागुरुको भवति। न संस्कृतशून्यतागुरुको भवति। नासंस्कृतशून्यतागुरुको भवति। नात्यन्तशून्यतागुरुको भवति। नानवराग्रशून्यतागुरुको भवति। नानवकारशून्यतागुरुको भवति। न प्रकृतिशून्यतागुरुको भवति। न सर्वधर्मशून्यतागुरुको भवति। न स्वलक्षणशून्यतागुरुको भवति। नानुपलम्भशून्यतागुरुको भवति। नाभावशून्यतागुरुको भवति। न स्वभावशून्यतागुरुको भवति। नाभावस्वभावशून्यतागुरुको भवति। न स्मृत्युपस्थानगुरुको भवति। न सम्यक्प्रहाणगुरुको भवति। न ऋद्धिपादगुरुको भवति। नेन्द्रियगुरुको भवति। न बलगुरुको भवति। न बोध्यङ्गगुरुको भवति। नार्याष्टाङ्गमार्गगुरुको भवति। नार्यसत्यगुरुको भवति। न ध्यानगुरुको भवति। नाप्रमाणगुरुको भवति। नारूप्यसमापत्तिगुरुको भवति। नाष्टविमोक्षगुरुको भवति। नानुपूर्वविहारसमापत्तिगुरुको भवति। न शून्यतानिमित्ताप्रणिहितविमोक्षगुरुको भवति। नाभिज्ञागुरुको भवति। न समाधिगुरुको भवति। न धारणीमुखगुरुको भवति। न धारणीमुखगुरुको भवति। न दशतथागतबलगुरुको भवति। न चतुर्वैशारद्यगुरुको भवति। न चतुःप्रतिसम्वित्गुरुको भवति। नाभिज्ञागुरुको भवति। न समाधिगुरुको भवति। न धारणीमुखगुरुको भवति। न दशतथागतबलगुरुको भवति। न चतुर्वैशारद्यगुरुको भवति। न चतुःप्रतिसम्विद्गुरुको भवति। न महामैत्रीगुरुको भवति। न महाकरुणागुरुको। नाष्टादशावेणिकबुद्धधर्मगुरुको भवति। न स्रोतआपत्तिफलगुरुको भवति। न सकृदागामिफलगुरुको भवति। नानागामिफलगुरुको भवति। नार्हत्वगुरुको भवति। न प्रत्येकबोधिगुरुको भवति। न प्रत्येकबोधिगुरुको भव


0 cms.
5
10
15
20
25
30
35
40

प्रथम

सननाउकथं योगमनुयुक्तो विहरति। तत्कस्य हेतोः। स ह्यसि सप्रकृतिशून्यतायां स्थितो न कस्यचिद्धर्मस्य हीनत्वं वा [illegible] वा समनुपश्यति॥ सन
योनकथं योगमनुयुक्तो विहरति। तत्कस्य हेतोः। स ह्यसि स्वलक्षणशून्येषु सर्वधर्मेषु न कस्यचिद्धर्मस्योहनसंभवं समनुपश्यति॥ न सनाक
योगमनुयुक्तो विहरति। तत्कस्य हेतोः। स ह्यसि सप्रकृतिशून्यतायां स्थितो न कस्यचिद्धर्मस्याल्पत्वं वा [illegible] समनुपश्यति॥ न युक्तकथं
योगमनुयुक्तो विहरति। तत्कस्य हेतोः। स ह्यसि सर्वधर्मशून्यतायां स्थितो न कस्यचिद्धर्मस्य नाशं [illegible] प्रति[illegible] समनुपश्यति॥ नया
मकथं योगमनुयुक्तो विहरति। तत्कस्य हेतोः। स ह्यसि अभावशून्यतायां स्थितो न कस्यचिद्धर्मस्य संग्रहं वा असंग्रहं वा समनुपश्य
॥ न नगनकथं योगमनुयुक्तो विहरति। तत्कस्य हेतोः। स ह्यसि [illegible]शून्यतायां स्थितो न कस्यचिद्धर्मस्य चयं वा अपचयं वा समनुपश्य
ति॥ न निगमकथं योगमनुयुक्तो विहरति। [illegible] न जीवकथं योगमनुयुक्तो विहरति। न तन्तुकथं योगमन
।नात्मकथं योगमनुयुक्तो विहरति। न सत्त्वकथं योगमनुयुक्तो एवंति विहरति। न पुद्गलकथं योगमनुयुक्तो विहरति। न म
युक्तो विहरति। न पोषकथं मनुयुक्तो विहरति। न पुरुषकथं योगमनुयुक्तो एवंति विहरति। न कारककथं योगमनुयुक्तो विहरति। न वेदककथं योगम
नुजकथं योगमनुयुक्तो एवंति विहरति। मनमानवकथं योगमनुयुक्तो विहरति। न पश्यककथं योगमनुयुक्तो विहरति॥ अन्येऽपि प्रज्ञापारमिताकथं योगमनु
नयुक्तो विहरति। न ज्ञानककथं योगमनुयुक्तो विहरति। न [illegible] प्रतिसंयुक्तैर्मनसिकारैः सदानपारमितायाङ्गेन न मात्सर्ययोगमनुयुक्तो विहरति। शीलप
का विहरति। [illegible] विहरति। क्षान्तिपारमितायाङ्गेन न क्रोधयोगमनुयुक्तो विहरति। वीर्यपारमिताया
नमितायाङ्गेन न [illegible] योगमनुयुक्तो विहरति। [illegible] विक्षेपयोगमनुयुक्तो विहरति। प्रज्ञापारमितायाङ्गेन न दौःप्रज्ञ्या
ङ्गेन न कौसीद्ययोगमनुयुक्तो विहरति। ध्यानपारमितायाङ्गेन [illegible]॥ नाधर्मकामः सर्वधर्मभाणी च न त्वरते धर्मस्य वर्णवादी भवति। सम्मि
गमनुयुक्तो विहरति। स सर्वधर्मशून्यतायाङ्गेन धर्मकामो भवति। [illegible] श्रावकप्रत्येकबुद्धयानिकाः कुलपुत्रा वा कुलदुहितरो वा मनसि कृत्वा यांस
प्रकामो भवति। [illegible] बोधिसत्त्वा [illegible] दर्शनाय च यत्र
मक्षयाभिसमादापयति। निवेशयति। विनयति। प्रतिष्ठापयति। [illegible] सम्यक्संबुद्धानां [illegible] मनसिकारैः [illegible] विहरति। यत्र बुद्ध मनसिका
कथं गृह्णाति। प्रियकथा [illegible]

२

नेः। तत्कस्य हेतोः। तथा हि प्रायेण सुभूते अवैवर्तिको बोधिसत्त्वो महासत्त्वः कामधातुप्रतिसंयुक्तान्मनसिकारानुत्पादयति। दशसकुशलक
र्मपथप्रवर्तमानाः [illegible] प्रथमं ध्यानमुत्पादयति। द्वितीयं ध्यानमुत्पादयति। तृतीयं ध्यानमुत्पादयति। चतुर्थं ध्यानमुत्पादयति। मैत्रीमुत्पा
दयति। करुणामुत्पादयति। मुदितामुत्पादयति। आकाशानन्त्यायतनमुत्पादयति समापत्तिमुत्पादयति। आकिञ्चन्यायतनमुत्पादयति। नैवसंज्ञानासंज्ञायतनसमा
पत्तिमुत्पादयति। तत्रापि [illegible] यदुत संमुखीभावतः [illegible] सम्यक्संबुद्धानि [illegible] काले [illegible]
हि निर्मितैः समन्वागतो बोधिसत्त्वो महासत्त्वो अवैवर्तिको वेदितव्यः॥ पुनरपरं सुभूते अवैवर्तिकस्य बोधिसत्त्वस्य प्रज्ञापारमितायां चरतो
ऽध्यात्मशून्यतायां स्थितस्य बहिर्धाशून्यतायां स्थितस्य अध्यात्मबहिर्धाशून्यतायां स्थितस्य। शून्यताशून्यतायां स्थितस्य। महाशून्यता
यां स्थितस्य परमार्थशून्यतायां स्थितस्य। संस्कृतशून्यतायां स्थितस्य। असंस्कृतशून्यतायां स्थितस्य। अनवराग्रशून्यतायां स्थितस्य। अनव
कारशून्यतायां स्थितस्य। प्रकृतिशून्यतायां स्थितस्य। महाशून्यतायां स्थितस्य। परमार्थशून्यतायां स्थितस्य। सर्वधर्मशून्यतायां स्थितस्य।
स्वलक्षणशून्यतायां स्थितस्य। अनुपलम्भशून्यतायां स्थितस्य। अभावशून्यतायां स्थितस्य। स्वभावशून्यतायां स्थितस्य। अभावस्वभाव
शून्यतायां स्थितस्य। स्मृत्युपस्थानेषु स्थितस्य। सम्यक्प्रहाणेषु स्थितस्य। ऋद्धिपादेषु स्थितस्य। इन्द्रियेषु स्थितस्य। बलेषु स्थितस्य
बोध्यङ्गेषु स्थितस्य। आर्याष्टाङ्गमार्गे स्थितस्य। आर्यसत्येषु स्थितस्य। ध्यानेषु स्थितस्य। अप्रमाणेषु स्थितस्य। आरूप्यसमापत्तिषु स्थितस्य। वि
मोक्षेषु स्थितस्य। नवानुपूर्वविहारसमापत्तिषु स्थितस्य। शून्यतानिमित्ताप्रणिहितविमोक्षे स्थितस्य। अभिज्ञासु स्थितस्य। समाधिषु स्थितस्य। धा
रणीमुखेषु स्थितस्य। तथागतबलेषु स्थितस्य। वैशारद्येषु स्थितस्य। प्रतिसंविल्सु स्थितस्य। महामैत्र्यां स्थितस्य। महाकरुणायां स्थितस्य। अष्टा
दशावेणिकबुद्धधर्मेषु स्थितस्य। एवमपि न तत्र अवैवर्तिको [illegible] न चावैवर्तिका विचिकित्सास्य नोत्पद्यते। निःसंशयो भवति। स्वकायां भूमौ
न काङ्क्षति। न विचिकित्सति। तत्कस्य हेतोः। तथा हि स सुभूते अणुमपि धर्मं न समनुपश्यति। यो विवर्तेत वा न चाविवर्तेत॥ तद्यथापि नाम सुभूते पृ
थग्जनः। स्रोतआपन्नः। स्रोतआपत्तिफलभूमौ स्थितो न काङ्क्षति। न चिकित्सति। स्वकायां भूमौ प्रत्येकबुद्धः प्रत्येकबुद्धभूमौ स्थितो न
काङ्क्षति न विचिकित्सति। स्वकायां भूमौ बोधिसत्त्वो महासत्त्वो भूमौ स्थितो न काङ्क्षति न विचिकित्सति। स्वकायां भूमौ सम्यक्संबुद्धः सम्य
विचिकित्सति क्संबुद्धभूमौ स्थितो न काङ्क्षति न विचिकित्सति। स्वकायां भूमौ। एवमेव सुभूते बोधिसत्त्वो महासत्त्वः स्वकायां भूमौ स्थितो

प्रथम

नकांक्षतिनविचिकित्सतिसगाग्रावेवर्त्ततमोत्सितावुद्धकृत्यंपनिलभयति।सचास्येवबुद्धत्रमोत्सितानकांक्षतिसत्वांश्चपनिपाचयत्यन्त
त्यन्तानिवमानकर्माणिवृध्यते।नचमानकर्मासमसनगच्छति।सर्वाणिचानिमानकर्माणिविवर्जयतिनलीयतेनिवर्त्तते।यथापिनामम
त्याप्रथमानकर्यकारीआनन्तर्यविन्नाविनहितायावत्।मनसामानवमनुवर्त्ततेनवास्यतदानन्तर्यचित्तंनअक्रामतिमरणपर्यन्तेपिअन्
पितुमनुवर्त्ततेनवास्यतत्सन्ध्यानंयावत्मनसाकालंनवसेवमनः एवमेवअवैवर्त्तिकस्यबोधिसत्वस्यमहासत्वस्यतदवैवर्त्तिकचित्तंस्थितंमचेव
र्त्तिकत्मोखविकल्पविषंपनकश्चनशिक्षणकल्पंसदेवमानुषासुरेणलोकेनविचलयितुं।तत्कस्यहेतोःकथाहि।सोनचित्तेनसदेवमा
नुषासुरस्यलोकस्यविवर्त्तयितुं।तत्कस्यहेतोःकथाहिसोनचित्तेनसदेवमानुषासुरंलोकमतिक्रम्यन्यामामेवआक्रमःस्वकायांतमोक्षितावि
स्तारपनमसानमिप्राप्तावुद्धकृत्यंपनिलभयतिसत्वांश्चपनिपाचयति।नबुद्धक्षेत्राबुद्धक्षेत्रंसंक्रामतिबुद्धानांभगवतांनर्व्वात्राय
वन्दनायधर्मश्रवनायचबुद्धक्षेत्रंबुद्धक्षेत्रंभगवतस्तुकुशलमूलान्यवरोपयति।तेभ्यःबुद्धेभ्योभगवद्भ्यःपनिपृच्छतिपनिप्रश्नयति।पर्य
पास्तेसखलुपुनःसुभूतेबोधिसत्वोमहासत्वःकथाशिक्षितःसत्वाश्चआसन्नानिमानकर्माणिवृध्यतेरूपाणि।नचोत्सन्नात्सन्नोमानकर्माण्या
त्मसनगतिमानिचमानकर्माण्युपायकौशलेनाप्तकाशात्लभयति।स्वकायांत्मोनकांक्षति।नविचिकित्सति।तत्कस्यहेतोःकथाहि
सनिक्कांकाशतकाशमकदयंसमनुपश्यति।तथाआनीयआतिव्यतिहरस्यनअवकप्रत्युकयुघर्ममोचिकत्सत्यथो।तत्कस्यहेतोः
तथाहिसुभूतेबोधिसत्वोमहासत्वःस्वलक्षणश्चपुनःकसत्विघर्मस्यात्यादन्यानिनाधर्मासंकेतान्याभ्यवदानस्यासमनुपश्यति।तस्यख
लपुनःसुभूतेबोधिसत्वस्यमहासत्वस्यआतिव्यतिहरस्यपिनवमक्षवतिनाहंनातिसंगोत्स्यनुत्तरांसम्यक्संबोधिमभिसंबोत्स्येवाहमनु
त्तरांसम्यक्संबोधि।तत्कस्यहेतोःकथाहिसुभूतेस्वलक्षणधर्म्यानुत्तरांसम्यक्संबोधिः।सखलुपुनःसुभूतेबोधिसत्वोमहासत्वःस्वका
यांत्मोक्षितःतत्कस्यहेतोःबनवद्यंस्वकायांत्मोक्षितस्तत्कस्यहेतोःकथाहिसुभूतेअवैवर्त्तिकाबोधिसत्वामहासत्वाः।एवंस्थितापसं
हार्यसन्नानिनसमन्वागतोभवति।सचेत्पुनःसुभूतेअवैवर्त्तिकंबोधिसत्वंमहासत्वंमारःपापीयांबुद्धवेषेणापसंक्रम्यैवंवदेदिहैवदि
हेत्वमर्हत्वंप्राप्नुहिनत्वंव्याकृतोनुत्तरायांसम्यक्संबोधौनचत्वयानुत्पत्तिकेषुधर्मेषुक्षान्तिःप्रतिलब्धानत्वंव्याकृतोस्यकथागतै
नेहद्भिःसम्यक्संबुद्धैरनुत्तरायांसम्यक्संबोधौनचतेतान्याकारानिलिङ्गानितानिनिमित्तानियेनाकारेणलिङ्गेननिमित्तेनसम

२७८

भगतोबोधिसत्वोमहासत्वोव्याकृतोनुत्तरायांसम्यक्संबोधौ।सचेत्सुभूतेबोधिसत्वस्यैवंवदतःकृतानात्मलीयतेनचास्यविकल्पान्यथात्वंभवति।नच
मानसंसंक्रामयते।एवंदितव्यंसुभूतेबोधिसत्वेनमहासत्वेनव्याकृतोहंतथागतैरर्हद्भिःसम्यक्संबुद्धैरनुत्तरायांसम्यक्संबोधौ।तत्कस्यहेतोःत
थाहिममतेधर्माःसन्विद्यकायैर्धर्मैःसमन्वागतोबोधिसत्वोमहासत्वोव्याकृतोनुत्तरायांसम्यक्संबोधौ।सचेत्सुभूतेबोधिसत्वंमहासत्वंमारःपा
पीयोबुद्धवेषेणापसंक्रम्यमानाधिष्ठितोवपृच्छेत्कथात्।एवंकरत्मोवाप्रत्येकबुद्धकुलमोवासचेत्सुभूतेबोधिसत्वोमहासत्वस्येवंभवेन्मानाव
तायंपापीयांबुद्धवेषेणापसंक्रान्तोमानाधिष्ठितोवापृच्छेन्नपुनस्तथागतोर्हन्सम्यक्संबुद्धोबोधिसत्वंमहासत्वमेवंकरत्मोवाप्रत्येकबुद्धकु
मोवासमादापयति।सचेत्सुभूतेबोधिसत्वस्यमहासत्वस्यवैपुल्यसूत्राणिपठतःस्वाध्यायतोमारःपापीयांबुद्धवेषेणापसंक्रम्यैवंवदेन्नेतेबुद्धवचनं
गवहितिप्रतिमानन्यश्रवकर्मानसाधितान्येसत्वाकायत्वखलुनासिवदितव्यंसुभूतेबोधिसत्वेनमहासत्वेनसोनोवतायंपापीयांस्तानाधिष्ठिताजपृच्छ
यामानुत्तराःसम्यक्संबोधेर्विविचलितवदितव्यंसुभूतेव्याकृतोयंबोधिसत्वोमहासत्वःपौर्वकैस्तथागतैरर्हद्भिःसम्यक्संबुद्धैरनुत्तरायांसम्यक्सं
बोधौस्थितोयंबोधिसत्वोमहासत्वअवैवर्त्तिकोमोतत्कस्यहेतोःकथाहिसुभूतेअवैवर्त्तिकानांनिलिंगानिनिमित्तानिनिमानितास्संविद्यन्ते।यान्यवैवर्त्ति
कानांबोधिसत्वानाममतिःसुभूतेआकारानेतिलिङ्गैर्नेतिनिमित्तैःसमन्वागतोबोधिसत्वोमहासत्वोवैवर्त्तिकोवदितव्यः।।पुनरपरंसुभूतेअवैवर्त्ति
कोबोधिसत्वोऽवैवर्त्तिकोवदितव्यः।।पुनरपरंसुभूतेअवैवर्त्तिकोबोधिसत्वोमहासत्वःप्रज्ञापारमितायांचरनसद्धर्मपरिग्रहस्यकृतात्मपरित्या
गमपिकरोति।जीवितपरित्यागमपिकरोति।नचासौधर्मंपरित्यजति।सखलुपुनःसुभूतेबोधिसत्वोमहासत्वःसद्धर्मपरिग्रहस्यकृतेऽन्यमध्याग
मापघातायद्गोतानागतप्रत्युत्पन्नानांबुद्धानांभगवतांसद्धर्मपरिग्रहंकरोति।नचसद्धर्मपरित्यजति।तत्कस्यहेतोःकथाह्यस्यैवंभवति।नमे
सखलुपुनःसुभूतेबोधिसत्वोमहासत्वःसद्धर्मपरिग्रहंखलुकरोत्यतीतानागतप्रत्युत्पन्नबुद्धानांभगवतांपृच्छितारवकितेषांचसद्धर्मपरिग्रहःकृतो
भवति।तथागतासनेंद्धर्मस्यधर्मस्यकृतोबोधिसत्वोमहासत्वः।आत्मपरित्यागमपिकरोति।जीवितपरित्यागमपिकरोति।अहंसुभूतेतथाग
तोर्हन्सम्यक्संबुद्धःसर्वधर्माःशून्याइतिधर्मदेशयति।तत्रेकत्यामोहपुरुषाप्रतिक्रोशंतिप्रतिवहन्तिनेमेधर्मानेयविनयोनायंशास्तुःशास
नेऽत्रसुभूतेयत्तयात्मपरित्यागमपिकरोतिजीवितपरित्यागमपिकरोति।तत्रसुभूतेबोधिसत्वेनमहासत्वेनैवंप्रतिसंशिक्षितव्यं।
यपितन्नागताःतथागताःदेशयिष्यन्ति।अहमपितद्गणसंख्यातोमाहमपितद्व्याकृतःसमाप्यैवधर्मेयस्यधर्मस्यकृतेआत्मपरित्यागमपि

प्रथम

[illegible] जीवितपरित्यागमपि [illegible] वैवर्त्तिको बोधिसत्त्वो महासत्त्वः सद्धर्मपरिग्रहस्य कृतश आत्मपरित्यागमपि करोतीति गौ[illegible] प्रतिपत्त्यागमप्यागतानागता। त्रिभिः सुभूते आकारैर्लिङ्गैर्निमित्तैः समन्वागतो बोधिसत्त्वो महासत्त्वोऽवैवर्त्तिको धारयितव्यः। पुनरपरं सुभूते अवैवर्त्तिको बोधिसत्त्वो महासत्त्वस्तथागतस्यार्हतः सम्यक्संबुद्धस्य धर्मं देशयमानस्य न काङ्क्षति न विचिकित्सति। यदपि बुद्धा भगवन्तो [illegible] मे सुक्तानि तथागतगृहीतं वचनमविप्रणाशयति। तत्कस्य हेतोः। यथापि नाम ज्ञानं प्रतिलब्धः। अथायुष्मान् सुभूतिर्भगवन्तमेतदवोचत्। [illegible] धानस्य प्रतिलम्भत्वाद्बोधिसत्त्वस्य महासत्त्वस्य तथागतभाषिताः सूत्रान्ता न विप्रणाशस्य किं। एवं सागरनद्याः पञ्चव्यूढाया धानस्य प्रतिलम्भत्वा बोधिसत्त्वस्य महासत्त्वस्य तथागतभाषिताः सूत्रान्ता न विप्रणाशस्य किं। एवं सागरनद्याः पञ्चव्यूढाया धानस्य प्रतिलम्भत्वा बोधिसत्त्वस्य महासत्त्वस्य तथागतभाषिताः सूत्रान्ता न विप्रणाशस्य किं। आह। तथागतान्येवं भगवन्नर्हतां सम्यक्संबुद्धानां भाषितानि। अथ [illegible] भाषितानि देवताभाषितानि नागभाषितानि गन्धर्वभाषितानि [illegible] भूतभाषितानि किन्नरभाषितानि महोरगभाषितानि। भगवानाह। यत्किंचित् सुभूते [illegible] सर्वज्ञ बोधिसत्त्वो महासत्त्वो न काङ्क्षति न विचिकित्सति। तत्कस्य हेतोः। यथापि नाम धारणीप्रतिलब्धत्वात्। त्रिभिः सुभूते प्रतिलब्धत्वात्। त्रिभिः सुभूते आकारैर्लिङ्गैर्निमित्तैः समन्वागतो बोधिसत्त्वो महासत्त्वोऽवैवर्त्तिको धारयितव्यः॥ ॥ शतसाहस्र्याः प्रज्ञापारमितायामवैवर्त्तिकाकारलिङ्गपरिवर्त्तश्चतुर्थः ४॥ ८ ॥ ॥ अथ खल्वायुष्मान् सुभूतिर्भगवन्तमेतदवोचत्। महागुणसमन्वागतो भगवन्नवैवर्त्तिको बोधिसत्त्वो महासत्त्वोऽप्रमेयासंख्यापरिमाणगुणसमन्वागतो बोधिसत्त्वो महासत्त्वोऽपरिमितगुणसमन्वागतो। भगवन्नवैवर्त्तिको बोधिसत्त्वो महासत्त्वः। भगवानाह। एवमेतत् सुभूते एवमेतत्। महागुणसमन्वागतः सुभूतेऽवैवर्त्तिको बोधिसत्त्वो महासत्त्वोऽप्रमेयासंख्यापरिमितगुणसमन्वागतः सुभूतेऽवैवर्त्तिको बोधिसत्त्वो महासत्त्वः। अपरिमितगुणसमन्वागतः सुभूते बोधिसत्त्वो महासत्त्वः। तत्कस्य हेतोः। तथा ह्यनेन तापर्यन्तं ज्ञानं प्रतिलब्धमसाधारणं सर्वश्रावकप्रत्येकबुद्धैः। [illegible] स्थितोऽवैवर्त्तिको बोधिसत्त्वो महासत्त्वः प्रतिसंविदा प्रतिनिर्दिशति यानि प्रतिसंविद्भिर्निर्दिशति। सदेवमानुषासुरस्य लोकस्य प्रतिवचनं दातुं। सुभूतिराह। प्रतिबलो भगवान् तथागतोऽर्हन् सम्यक्संबुद्धो गङ्गानदीवालुकोपमान् कल्पान्

२१०

५६

वैवर्त्तिकस्य बोधिसत्त्वस्य महासत्त्वस्य [illegible] महासत्त्वस्याकारान् लिङ्गानि निमित्तानि निर्दिष्टं येनाकारेण लिङ्गेन निमित्तेन वैवर्त्तिको बोधिसत्त्वो महासत्त्वः प्रज्ञायते। साधु भगवन् गम्भीराणि गम्भीराणि स्थानानि निर्देष्टव्यानि। यत्र स्थितो बोधिसत्त्वो महासत्त्वः षट्पारमिताः [illegible] चत्वारि स्मृत्युपस्थानानि दृष्टानि परिपूरयति। चत्वारि सम्यक्प्रहाणानि परिपूरयति। चत्वार ऋद्धिपादान् परिपूरयति। पञ्चेन्द्रियाणि परिपूरयति। पञ्च बलानि परिपूरयति। सप्त बोध्यङ्गानि परिपूरयति। आर्याष्टाङ्गमार्गं परिपूरयति। आर्यसत्यानि परिपूरयति। ध्यानानि परिपूरयति। चत्वारि सम्यक्प्रहाणानि परिपूरयति। चत्वार ऋद्धिपादान् परिपूरयति। ध्यानानि परिपूरयति। अप्रमाणानि परिपूरयति। समाधीन् परिपूरयति। ध्यान[illegible] नि परिपूरयति। दशतथागतबलानि परिपूरयति। सर्वज्ञतामपि परिपूरयति। मार्गाकारज्ञतां परिपूरयति। सर्वज्ञतामपि परिपूरयति। भगवानाह। साधु साधु सुभूते साधु खलु पुनस्त्वं सुभूते यस्त्वमवैवर्त्तिकानां बोधिसत्त्वानां महासत्त्वानामर्थाय तथागतं गम्भीराणि गम्भीराणि स्थानानि परिपृच्छसि। गम्भीरमिति सुभूते शून्यताया एतदधिवचनमानिमित्तस्याप्रणिहितस्यानभिसंस्कारस्यानुत्पादस्याविनाशस्य निरोधस्य निर्वाणस्य [illegible] तथतायाकारस्य। धर्मधातोस्तदधिवचनं। एतानि तानि सुभूते गम्भीराणि गम्भीराणि स्थानानि परिपृच्छसि। [illegible] गम्भीरमिति सुभूते [illegible] अधिवचनं [illegible] निर्वाणस्यैतद् अधिवचनं न पुनः सर्वधर्माणाम्। भगवानाह। सर्वधर्माणामप्येतत् सुभूतेऽधिवचनं गम्भीरमिति। तत्कस्य हेतोः। रूपं सुभूते गम्भीरं वेदना सुभूते गम्भीरा संज्ञा सुभूते गम्भीरा। संस्काराः सुभूते गम्भीराः। विज्ञानं सुभूते गम्भीरं। चक्षुरपि सुभूते गम्भीरं। श्रोत्रमपि सुभूते गम्भीरं। घ्राणमपि सुभूते गम्भीरं। जिह्वामपि सुभूते गम्भीरां। कायोऽपि सुभूते गम्भीरो। मनोऽपि सुभूते गम्भीरं। रूपमपि सुभूते गम्भीरं। शब्दोऽपि सुभूते गम्भीरः। गन्धोऽपि सुभूते गम्भीरः। रसोऽपि सुभूते गम्भीरः। स्प्रष्टव्योऽपि सुभूते। धर्मोऽपि सुभूते गम्भीरः। चक्षुर्विज्ञानमपि सुभूते गम्भीरं। घ्राणविज्ञानमपि सुभूते गम्भीरं। जिह्वाविज्ञानमपि सुभूते गम्भीरं। कायविज्ञानमपि सुभूते गम्भीरं। मनोविज्ञानमपि सुभूते गम्भीरं॥ चक्षुःसंस्पर्शोऽपि सुभूते गम्भीरः। श्रोत्रसंस्पर्शोऽपि सुभूते गम्भीरः। घ्राणसंस्पर्शोऽपि सुभूते गम्भीरः। जिह्वासंस्पर्शोऽपि सुभूते गम्भीरः। कायसंस्पर्शोऽपि सुभूते गम्भीरः। मनःसंस्पर्शोऽपि सुभूते गम्भीरः॥ चक्षुःसंस्पर्शप्रत्ययवेदनापि सुभूते गम्भीरा। श्रोत्रसंस्पर्शप्रत्ययवेदनापि सुभूते गम्भीरा। घ्राणसंस्पर्शप्रत्ययवेदनापि सुभूते गम्भीरा। जिह्वासंस्पर्शप्रत्ययवेदनापि सुभूते गम्भीरा। कायसंस्पर्शप्रत्ययवेदनापि सुभूते गम्भीरा॥ अविद्यापि सुभूते

0 cms. 5 10 15 20 25 30 35 40

प्रथम

मनःसंस्पर्शप्रत्ययवेदनापि तथता गम्भीरा। पृथिवीधातुरपि तथता गम्भीरा। अब्धातुरपि तथता गम्भीरा। तेजोधातुरपि तथता गम्भीरा। वायुधातुरपि
तथता गम्भीरा। आकाशधातुरपि तथता गम्भीरा। विज्ञानधातुरपि तथता गम्भीरा। अविद्यापि तथता गम्भीरा। संस्कारा अपि तथता गंभीराः। विज्ञान
मपि तथता गम्भीरं। नामरूपमपि तथता गम्भीरं। षडायतनमपि तथता। स्पर्शोपि तथता गम्भीरः। वेदनापि तथता गम्भीरा। तृष्णापि तथता गं
भीरा। उपादानमपि तथता गम्भीरं। भवोपि तथता गम्भीरः। जातिरपि तथता गम्भीरा। जरामरणमपि तथता गंभीरं। स्पर्शोपि तथता गम्भी
रः। वेदनापि तथता गम्भीरा। तृष्णापि तथता गम्भीरा। उपादानमपि तथता गम्भीरं। भवोपि तथता गम्भीरः। जातिरपि तथता गम्भीरा। जराम
रणमपि तथता गम्भीरं। नामरूपमपि तथता गम्भीरं। षडायतनमपि तथता गम्भीरं। स्पर्शोपि तथता गम्भीरः। वेदनापि तथता गम्भीरा। दान
पारमितामपि तथता गम्भीरा। शीलपारमितामपि तथता गम्भीरा। क्षान्तिपारमितामपि तथता गम्भीरा। वीर्यपारमितामपि तथता गम्भीरा। ध्या
नपारमितामपि तथता गम्भीरा। प्रज्ञापारमितामपि तथता गम्भीरा। अध्यात्मशून्यतामपि तथता गम्भीरा। बहिर्धाशून्यतापि तथता गम्भी
रा। अध्यात्मबहिर्धाशून्यतापि तथता गम्भीरा। शून्यताशून्यतापि तथता गम्भीरा। महाशून्यतापि तथता गंभीरा। परमार्थशून्यतापि तथता गंभी
रा। महाशून्यतापि तथता गंभीरा। परमार्थशून्यतापि तथता गम्भीरा। संस्कृतशून्यतापि तथता गम्भीरा। असंस्कृतशून्यतापि तथता गंभीरा। अत्यन्त
शून्यतापि तथता गम्भीरा। अनवराग्रशून्यतापि तथता गम्भीरा। अनवकार तथता गम्भीरा। प्रकृतिशून्यतापि तथता गम्भीरा। सर्वधर्मशून्य
तापि तथता गम्भीरा। स्वलक्षणशून्यतापि तथता गम्भीरा। अनुपलम्भशून्यतापि तथता गम्भीरा। अभावशून्यतापि तथता गम्भीरा। स्वभावशू
न्यतापि तथता। अभावस्वभावशून्यतापि तथता गम्भीरा। स्मृत्युपस्थानान्यपि तथता गम्भीराणि। सम्यक्प्रहाणान्यपि तथता गम्भीराणि। ऋद्धि
पादान्यपि तथता गम्भीराणि। इन्द्रियाण्यपि तथता गम्भीराणि। बलान्यपि तथता गम्भीराणि। बोध्यङ्गान्यपि तथता गम्भीराणि। आर्याष्टां
गमार्गोपि तथता गम्भीरः। आर्यसत्यान्यपि तथता गम्भीराणि। ध्यानान्यपि तथता गम्भीराणि। अप्रमाणान्यपि तथता गम्भीराणि। आरूप्य
समापत्तयोपि तथता गम्भीराः। विमोक्षा अपि तथता गम्भीराः। नवानुपूर्वविहारसमापत्तयोपि तथता गम्भीराः। शून्यतानिमित्ताप्र
णिहितविमोक्षमुखान्यपि तथता गम्भीराणि। अभिज्ञा अपि तथता गम्भीराः। समाधयोपि तथता गम्भीराः। धारणीमुखान्यपि तथता गम्भी
राणि। दशतथागतबलान्यपि तथता गम्भीराणि। चत्वारि वैशारद्यान्यपि तथता गम्भीराणि। चतस्रः प्रतिसंविदोपि तथता गम्भीरा। महाक

रुणापि तथता गंभीरा। महाकरुणापि तथता गम्भीरा। आवेणिकबुद्धधर्मा अपि तथता गम्भीरा। [illegible] अपि तथता गम्भीरा। सर्वाकारज्ञ
तापि तथता गम्भीरा। बोधिरपि तथता गम्भीरा॥ कथं [illegible] रूपं गम्भीरं। कथं वेदना गम्भीरा। कथं संज्ञा गम्भीरा। कथं संस्कारा गंभीरा॥ क
थं विज्ञानं गंभीरं। कथं चक्षु गम्भीरं। कथं श्रोत्रं गंभीरं। कथं श्रोत्रं गंभीरं। कथं घ्राणं गम्भीरं। कथं जिह्वा गम्भीरं। कथं कायो गम्भीरो गम्भीरः।
कथं मनो गंभीरः। कथं रूपं गंभीरं। कथं शब्दो गम्भीरः। कथं गन्धो गम्भीरः। कथं रसो गम्भीरः। कथं स्पर्शो गम्भीरः। कथं धर्मा गम्भीराः। कथं
चक्षुर्विज्ञानं गम्भीरं। कथं श्रोत्रविज्ञानं गम्भीरं। कथं घ्राणविज्ञानं गम्भीरं। कथं जिह्वाविज्ञानं गम्भीरं। कथं कायविज्ञानं गम्भीरं। कथं
मनोविज्ञानं गंभीरं॥ कथं चक्षुःसंस्पर्शो गम्भीरः। कथं श्रोत्रसंस्पर्शो गम्भीरः। कथं घ्राणसंस्पर्शो गम्भीरः। कथं जिह्वासंस्पर्शो गम्भीरः।
कथं कायसंस्पर्शो गंभीरः। कथं मनःसंस्पर्शो गंभीरः। कथं चक्षुःसंस्पर्शप्रत्ययवेदना गम्भीरा॥ कथं श्रोत्रसंस्पर्शो गम्भीरः। कथं घ्राणसं
स्पर्शो गंभीरः। कथं श्रोत्रसंस्पर्शप्रत्ययवेदना गम्भीरा। कथं घ्राणसंस्पर्शप्रत्ययवेदना गम्भीरा। कथं जिह्वासंस्पर्शप्रत्ययवेदना गम्भीरा।
कथं कायसंस्पर्शप्रत्ययवेदना। कथं मनःसंस्पर्शप्रत्ययवेदना गंभीरा। कथं पृथिवीधातुर्गम्भीरः। कथमब्धातुर्गम्भीरः। कथं तेजोधातु
र्गम्भीरः। कथं वायुधातुर्गम्भीरः। कथमाकाशधातुर्गम्भीरः। कथं विज्ञानधातुर्गम्भीरः॥ कथमविद्या गम्भीरा। कथं संस्कारा गम्भीराः। कथं
विज्ञानं गंभीरं। कथं नामरूपं गंभीरं। कथं षडायतनं गम्भीरं। कथं स्पर्शो गम्भीरः। कथं वेदना गंभीरा। कथं वेदना गंभीरा। कथं तृष्णा ग
म्भीरा। कथमुपादानं गम्भीरं। कथं भवो गम्भीरः। कथं जातिर्गम्भीरा। कथं जरामरणं गंभीरं। कथं दानपारमिता गम्भीरा। कथं शीलपा
रमिता गंभीरा। कथं क्षान्तिपारमिता गम्भीरा। कथं वीर्यपारमिता गम्भीरा। कथं ध्यानपारमिता गम्भीरा। कथं प्रज्ञापारमिता गम्भीरा।
कथमध्यात्मशून्यता गंभीरा। कथं बहिर्धाशून्यता गम्भीरा॥ कथमध्यात्मबहिर्धाशून्यता गम्भीरा। कथं शून्यताशून्यता गम्भीरा। कथं महाशून्य
ता गंभीरा। कथं परमार्थशून्यता गंभीरा। कथं संस्कृतशून्यता गंभीरा। कथमसंस्कृतशून्यता गंभीरा। कथमत्यन्तशून्यता गंभीरा।
कथमनवराग्रशून्यता गंभीरा। कथमनवकारशून्यता गम्भीरा। कथं प्रकृतिशून्यता गम्भीरा। कथं सम्यक्प्रहाणानि गम्भीराणि।
कथमृद्धिपादा गम्भीरा। कथमिन्द्रियाणि गम्भीराणि। कथं बलानि गम्भीराणि। कथं बोध्यङ्गानि गंभीराणि। कथमार्याष्टाङ्गमा


0 cms.
5
10
15
20
25
30
35
40

प्रथम

र्गो गम्भीरः। कथमार्यसत्यानि गम्भीराणि। कथं ध्यानानि गम्भीराणि। कथमप्रमाणानि गम्भीराणि। कथमारूप्यसमापत्तयो गम्भीराः। क
थमष्टविमोक्षा गम्भीराः। कथमनुपूर्वविहारसमापत्तयो गम्भीराः। कथं शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि गम्भीराणि। कथमभिज्ञा
गम्भीराः। कथं समाधयो गम्भीराः। कथं धारणीमुखानि गम्भीराणि। कथं तथागतबलानि गम्भीराणि। कथं वैशारद्यानि गम्भीराणि। कथं प्रतिसंविदो
गम्भीराः। कथं महामैत्री गम्भीरा। कथं महाकरुणा गम्भीरा। कथमष्टादशावेणिकबुद्धधर्मा गम्भीराः। कथं स्रोतआपत्तिफलं गम्भीरं। कथं सकृदा
गामिफलं गम्भीरं। कथमनागामिफलं गम्भीरं। कथमर्हत्त्वं गम्भीरं। कथं प्रत्येकबोधिर्गम्भीरा। कथं सर्वज्ञता गम्भीरा। कथं मार्गाकारज्ञता गम्भी
रा। कथं सर्वाकारज्ञता गम्भीरा॥ यथा रूपस्य तथता तथा रूपं गम्भीरं। यथा वेदनायास्तथता तथा वेदना गम्भीरा। यथा संज्ञायास्तथता
तथा संज्ञा गम्भीरा। यथा संस्काराणां तथता तथा संस्कारा गम्भीराः। यथा विज्ञानस्य तथता तथा विज्ञानं गम्भीरं॥ यथा चक्षुषस्तथता तथा चक्षुर्गम्भी
रं। यथा श्रोत्रस्य तथता तथा श्रोत्रं गम्भीरं। यथा घ्राणस्य तथता तथा घ्राणं गम्भीरं। यथा जिह्वायास्तथता तथा जिह्वा गम्भीरा। यथा कायस्य
तथता तथा कायो गम्भीरः। यथा मनसस्तथता तथा मनो गम्भीरं॥ यथा रूपस्य तथता तथा रूपं गम्भीरं। यथा शब्दस्य तथता तथा शब्दो गम्भीरः। य
था गन्धस्य तथता तथा गन्धो गम्भीरः। यथा रसस्य तथता तथा रसो गम्भीरः। यथा स्प्रष्टव्यस्य तथता तथा स्प्रष्टव्यं गम्भीरं। यथा धर्माणां तथता तथा
धर्मा गम्भीराः। यथा चक्षुर्विज्ञानस्य तथता तथा चक्षुर्विज्ञानं गम्भीरं। यथा श्रोत्रविज्ञानस्य तथता तथा श्रोत्रविज्ञानं गम्भीरं। यथा घ्राणवि
ज्ञानस्य तथता तथा घ्राणविज्ञानं गम्भीरं। यथा जिह्वाविज्ञानस्य तथता तथा जिह्वाविज्ञानं गम्भीरं। यथा कायविज्ञानस्य तथता तथा काय
विज्ञानं गम्भीरं। यथा मनोविज्ञानस्य तथता तथा मनोविज्ञानं गम्भीरं। चक्षुःसंस्पर्शस्य तथता चक्षुःसंस्पर्शो गम्भीरः। यथा श्रोत्र
संस्पर्शस्य तथता तथा श्रोत्रसंस्पर्शो गम्भीरः। यथा घ्राणसंस्पर्शस्य तथता गम्भीरः। यथा जिह्वासंस्पर्शस्य तथता तथा जिह्वासंस
स्पर्शो गम्भीरः। यथा कायसंस्पर्शस्य तथता तथा कायसंस्पर्शो गम्भीरः। यथा मनःसंस्पर्शस्य तथता तथा मनःसंस्पर्शो गम्भीरः। यथा च
क्षुःसंस्पर्शप्रत्ययवेदनायास्तथता त। चक्षुःसंस्पर्शप्रत्ययवेदनायास्तथता तथा तथा चक्षुःसंस्पर्शप्रत्ययवेदनायास्तथता। गम्भी
रा। यथा श्रोत्रसंस्पर्शस्य तथता तथा श्रोत्रसंस्पर्शस्य गम्भीरा। यथा घ्राणसंस्पर्शस्य तथता तथा घ्राणसंस्पर्शसंस्पर्शप्रत्ययवेद
ना गम्भीरः। यथा मनःसंस्पर्शप्रत्ययवेदनायास्तथता गम्भीरा। यथा पृथिवीधातोस्तथता तथा पृथिवीधातुर्गम्भीरः॥ यथाब्धातुर्

२०

थता तथाब्धातुर्गम्भीरः। यथा तेजोधातोस्तथता तथा तेजोधातुर्गम्भीरः। यथा वायुधातोस्तथता तथा वायुधातुर्गम्भीरः। यथाकाशधातोस्त
थता तथाकाशधातुर्गम्भीरः। यथा विज्ञानधातोस्तथता तथा विज्ञानधातुर्गम्भीरः॥ यथाविद्यायास्तथता तथाविद्या गम्भीरा॥ यथा संस्काराणां तथ
ता तथा संस्कारा गम्भीराः। यथा विज्ञानस्य तथता तथा विज्ञानं गम्भीरं। यथा नामरूपस्य तथता तथा नामरूपं गम्भीरं। यथा षडायतनस्य तथता
तथा षडायतनं गम्भीरं। यथा स्पर्शस्य तथता तथा स्पर्शो गम्भीरः॥ यथा वेदनायास्तथता तथा वेदना गम्भीरा॥ यथा तृष्णायास्तथता तथा तृ
ष्णा गम्भीरा॥ यथोपादानस्य तथता तथोपादानं गम्भीरं। यथा भवस्य तथता तथा भवो गम्भीरः। यथा जातेस्तथता तथा जातिर्गम्भीरा। यथा ज
रामरणस्य तथता तथा जरामरणं गम्भीरं॥ यथा दानपारमितायास्तथता तथा दानपारमिता गम्भीरा। यथा शीलपारमितायास्तथता त
था शीलपारमिता गम्भीरा॥ यथा क्षान्तिपारमितायास्तथता तथा क्षान्तिपारमिता गम्भीरा। यथा वीर्यपारमितायास्तथता तथा वीर्यपा
रमिता गम्भीरा। यथा ध्यानपारमितायास्तथता तथा ध्यानपारमिता गम्भीरा। यथा प्रज्ञापारमितायास्तथता तथा प्रज्ञापारमिता गम्भीरा।
यथाध्यात्मशून्यतायास्तथता तथाध्यात्मशून्यता गम्भीरा॥ यथा बहिर्धाशून्यतायास्तथता तथा बहिर्धाशून्यता गम्भीरा। यथाध्यात्मबहिर्धाशून्यता
यास्तथता तथाध्यात्मबहिर्धाशून्यता गम्भीरा। यथा शून्यताशून्यतायास्तथता तथा शून्यताशून्यता गम्भीरा। यथा महाशून्यतायास्तथता तथा महा
शून्यता गम्भीरा। यथा परमार्थशून्यतायास्तथता तथा परमार्थशून्यता गम्भीरा। यथा संस्कृतशून्यतायास्तथता तथा संस्कृतशून्यता गम्भीरा। य
थासंस्कृतशून्यतायास्तथता तथासंस्कृतशून्यता गम्भीरा। यथात्यन्तशून्यतायास्तथता तथात्यन्तशून्यता गम्भीरा। यथानवराग्रशून्यता
यास्तथता तथानवराग्रशून्यता गम्भीरा। यथानवकारशून्यतायास्तथता तथानवकारशून्यता गम्भीरा। यथा प्रकृतिशून्यतायास्तथता तथा
प्रकृतिशून्यता गम्भीरा। यथा सर्वधर्मशून्यतायास्तथता तथा सर्वधर्मशून्यता गम्भीरा। यथा स्वलक्षणशून्यतायास्तथता तथा स्वलक्षणशू
न्यता गम्भीरा। यथानुपलम्भशून्यतायास्तथता तथानुपलम्भशून्यता गम्भीरा। यथाभावशून्यतायास्तथता तथाभावशून्यता गम्भीरा। य
था स्वभावशून्यतायास्तथता तथा स्वभावशून्यता गम्भीरा। यथाभावस्वभावशून्यतायास्तथता तथाभावस्वभावशून्यता ग
म्भीरा॥ यथा स्मृत्युपस्थानानां तथता तथा स्मृत्युपस्थानानि गम्भीराणि। यथा सम्यक्प्रहाणानां तथता तथा सम्यक्प्रहाणानि गम्भीराणि। य
थर्द्धिपादानां तथता तथर्द्धिपादा गम्भीराः। यथेन्द्रियाणां तथता तथेन्द्रियाणि गम्भीराणि। यथा बलानां तथता तथा बलानि गम्भीरा



प्रथम

नि। यथा बोध्यङ्गानां तथता तथा बोध्यङ्गानि गम्भीराणि। यथा आर्याष्टाङ्गमार्गस्य तथता तथा आर्याष्टाङ्गमार्गो गम्भीरः। यथा आर्यसत्यानां तथता त-
था आर्यसत्यानि गम्भीराणि। यथा ध्यानानां तथता तथा ध्यानानि गम्भीराणि। यथा अप्रमाणानां तथता तथा अप्रमाणानि गम्भीराणि। यथा आरूप्यसमा-
पत्तीनां तथता तथा आरूप्यसमापत्तयो गम्भीराः। यथा विमोक्षाणां तथता तथा विमोक्षा गम्भीराः। यथा नवानुपूर्वविहारसमापत्तीनां तथता तथा
नुपूर्वविहारसमापत्तयो गम्भीराः। यथा शून्यतानिमित्ताप्रणिहितानां तथता तथा शून्यतानिमित्ताप्रणिहितानि गम्भीराणि। यथाभिज्ञाना-
नां तथता तथाभिज्ञा गम्भीराः। यथा समाधीनां तथता तथा समाधयो गम्भीराः। यथा धारणीमुखानां तथता तथा धारणीमुखानि गम्भीराणि। यथा त-
थागतबलानां तथता तथा तथागतबलानि गम्भीराणि। यथा वैशारद्यानां तथता तथा वैशारद्यानि गम्भीराणि। यथा प्रतिसंविदां तथता तथा प्र-
तिसंविदो गम्भीराः। यथा महामैत्र्यास्तथता तथा महामैत्री गम्भीरा। यथा महाकरुणायास्तथता तथा महाकरुणा गम्भीरा। यथावेणिकबुद्ध-
धर्मा गम्भीरा। यथा स्रोतआपत्तिफलस्य तथता तथा स्रोतआपत्तिफलं गम्भीरं। यथानागामिफलस्य तथता तथानागामिफलं गम्भीरं। यथाऽर्ह-
त्वस्य तथता तथार्हत्वं गम्भीरं। यथा प्रत्येकबोधेस्तथता तथा प्रत्येकबोधिर्गम्भीरा। यथा मार्गाकारज्ञतायास्तथता तथा मार्गाकारज्ञ-
ता गम्भीरा। यथा सर्वाकारज्ञतायास्तथता तथा सर्वाकारज्ञता गम्भीरा॥ कथं भगवन् रूपस्य तथता। कथं भगवन् वेदनायास्तथता। कथं भगव-
न् संस्काराणां तथता॥ कथं भगवं विज्ञानस्य तथता। कथं भगवं चक्षुषस्तथता। कथं भगवं चक्षुषस्तथता। कथं भगवं श्रोत्रस्य तथता। कथं भगवं
घ्राणस्य तथता। कथं भगवं जिह्वायास्तथता। कथं भगवन् कायस्य तथता। कथं भगवं मनसस्तथता॥ कथं भगवन् रूपस्य तथता। कथं भगवं शब्दस्य तथ-
ता। कथम्भगवं गन्धस्य तथता। कथं भगवं रसस्य तथता। कथं स्पर्शस्य तथता। कथं भगवन् धर्माणां तथता। कथं भगवं चक्षुर्विज्ञानस्य तथता। कथं
श्रोत्रविज्ञानस्य तथता। कथं भगवं घ्राणविज्ञानस्य तथता। कथम्भगवं जिह्वाविज्ञानस्य तथता। कथं भगवन् कायविज्ञानस्य तथता। कथं
भगवं मनोविज्ञानस्य तथता। कथम्भगवं चक्षुःसंस्पर्शस्य तथता। कथं भगवं श्रोत्रसंस्पर्शस्य तथता। कथं भगवं घ्राणसंस्पर्शस्य तथता। कथं भगवं
जिह्वासंस्पर्शस्य तथता। कथं भगवं कायसंस्पर्शस्य तथता। कथं भगवन्मनःसंस्पर्शस्य तथता। कथं भगवन्मनःसंस्पर्शस्य तथता। कथं भगवं
चक्षुःसंस्पर्शप्रत्ययवेदनायास्तथता। कथं भगवं श्रोत्रसंस्पर्शप्रत्ययवेदनायास्तथता। कथं भगवं घ्राणसंस्पर्शप्रत्ययवेदनायास्तथता। क-
थं भगवं जिह्वासंस्पर्शप्रत्ययवेदनायास्तथता। कथं भगवन्कायसंस्पर्शप्रत्ययवेदनायास्तथता। कथं भगवं मनःसंस्पर्शप्रत्यय-

वेदनायास्तथता। कथं भगवं घ्राणसंस्पर्शप्रत्ययवेदनायास्तथता। कथं भगवं जिह्वासंस्पर्शप्रत्ययवेदनायास्तथता। कथं भगव[illegible]धातोस्तथता। कथं
भगवन्नाकाशधातोस्त[illegible]कायसंस्पर्शप्रत्ययवेदनायास्तथता। कथं भगवं मनःसंस्पर्शप्रत्ययवेदनायास्तथता। कथं भगवं पृथिवीधातोस्तथ-
ता। कथं भगवन्नब्धातोस्तथता। कथं भगवं तेजोधातोस्तथता। कथं भगवन्वायुधातोस्तथता। कथं भगवन्नाकाशधातोस्तथता। कथं भगवं विज्ञानधातो-
स्तथता॥ कथं भगवन्नविद्यायास्तथता। कथं भगवं संस्काराणां तथता। कथं भगवं विज्ञानस्य तथता। कथं भगवन्नामरूपतथता। कथं भगवं षडायत-
नस्य तथता। कथं भगवं स्पर्शस्य तथता। कथं भगवं वेदनायास्तथता। कथं भगवं तृष्णायास्तथता। कथं भगवमुपादानस्य तथता। कथं भगवं जातेस्तथता
। कथं भगवं जरामरणस्य तथता। कथं भगवन्दानपारमितायास्तथता। कथं भगवं शीलपारमितायास्तथता। कथं भगवं क्षान्तिपारमितायास्त[illegible]
कथं भगवं वीर्यपारमितायास्तथता। कथं भगवं ध्यानपारमितायास्तथता। कथं भगवं प्रज्ञापारमितायास्तथता। कथं भगवमध्यात्मशून्यताया-
स्तथता। कथं भगवं बहिर्धाशून्यतायास्तथता। कथं भगवं शून्यताशून्यतायास्तथता। कथं भगवं महाशून्यतायास्तथता। कथं भगवन्[illegible]
शून्यतायास्तथता। कथं भगवं संस्कृतशून्यतायास्तथता। कथं भगवमसंस्कृतशून्यतायास्तथता। कथं भगवमनवराग्रशून्यतायास्तथता। कथं भगवम-
नवकारशून्यतायास्तथता। कथं भगवं प्रकृतिशून्यतायास्तथता। कथं भगवं सर्वधर्मशून्यतायास्तथता। कथं भगवं स्वलक्षणशून्यतायास्तथता। कथं
भगवन्ननुपलम्भशून्यतायास्तथता। कथं भगवमिन्द्रियाणां तथता। कथं भगवं बलानां तथता। कथं भगवं बोध्यङ्गानां तथता। कथं भगवन्नार्याष्टाङ्ग-
मार्गस्य तथता। कथं भगवन्नार्यसत्यानां तथता। कथं भगवं ध्यानानां तथता। कथं भगवन्नप्रमाणानां तथता। कथं भगवन्नारूप्यसमापत्तीनां तथता। कथं
भगवं विमोक्षाणां तथता। कथं भगवन्नवानुपूर्वविहारसमापत्तीनां तथता। कथं भगवं शून्यतानिमित्ताप्रणिहितविमोक्षमुखानां तथता। कथं भगवन्न-
भिज्ञानां तथता। कथं भगवं समाधीनां तथता। कथं भगवन्समाधीनां तथता। कथं भगवं धारणीमुखानां तथता। कथं भगवं तथागतबलानां तथता। कथं
भगवं वैशारद्यानां तथता। कथं भगवं प्रतिसंविदां तथता। कथं भगवन्महामैत्र्यास्तथता। कथं भगवन्महाकरुणायास्तथता। कथं भगवन्नष्टादशावे-
णिकबुद्धधर्माणां तथता। कथं भगवं स्रोतआपत्तिफलस्य तथता। कथं भगवं सर्वाकारज्ञतायास्तथता॥ भगवानाह। यद्रूपस्य तथता यान्न रूपं ना-
न्यद्रूपात्तथता। न रूपं रूपस्य तथता। या वेदनायास्तथता यान्न वेदना नान्यद्वेदनायास्तथता। न वेदना वेदनायास्तथता। यत्संज्ञायास्तथता यां

प्रथम

नसंज्ञा नान्यत्र संज्ञायास्तथता । एवं संज्ञायास्तथता । यत्पुनस्तत् संस्कारतथता यां न संस्कारा नान्यत्र संस्कारेभ्यस्तथता । एवं संस्काराणां तथता । यत्पुनस्तत्
ना । यत्पुनस्तत् विज्ञानतथता यां न विज्ञानं नान्यत्र विज्ञानात्तथता । एवं विज्ञानस्य तथता । यत्पुनस्तत् चक्षुस्तथता यां न चक्षुर्नान्यत्र चक्षुषस्तथता । एवं चक्षु-
षस्तथता । यत्पुनस्तत् श्रोत्रतथता यां न श्रोत्रं नान्यत्र श्रोत्रात्तथता । एवं श्रोत्रस्य तथता । यत्पुनस्तत् घ्राणतथता यां न घ्राणं नान्यत्र घ्राणात्तथता । एवं घ्रा-
णस्य तथता । यत्पुनस्तत् जिह्वातथता यां न जिह्वा नान्यत्र जिह्वायास्तथता । एवं जिह्वायास्तथता । यत्पुनस्तत् कायतथता यां न कायो नान्यत्र कायात्तथता । एवं का-
यस्य तथता । यत्पुनस्तत् मनस्तथता यां न मनो नान्यत्र मनसस्तथता । एवं मनसस्तथता ॥ यत्पुनस्तत् रूपतथता यां न रूपं नान्यत्र रूपात्तथता । एवं रूपस्य तथता । यत्पुनस्तत्
शब्दतथता यां न शब्दो नान्यत्र शब्दात्तथता । एवं शब्दस्य तथता । यत्पुनस्तत् गन्धतथता यां न गन्धो नान्यत्र गन्धात्तथता । एवं गन्धस्य तथता । यत्पुनस्तत् रस-
तथता यां न रसो नान्यत्र रसात्तथता । एवं रसस्य तथता । यत्पुनस्तत् स्पर्शतथता यां न स्पर्शो नान्यत्र स्पर्शात्तथता । एवं स्पर्शस्य तथता । यत्पुनस्तत् धर्मतथता यां
न धर्मा नान्यत्र धर्मेभ्यस्तथता । एवं धर्माणां तथता ॥ यत्पुनस्तत् चक्षुर्विज्ञानतथता यां न चक्षुर्विज्ञानं नान्यत्र चक्षुर्विज्ञानात्तथता । एवं चक्षुर्विज्ञानस्य तथता
। यत्पुनस्तत् श्रोत्रविज्ञानतथता यां न श्रोत्रविज्ञानं नान्यत्र श्रोत्रविज्ञानात्तथता । एवं श्रोत्रविज्ञानस्य तथता । यत्पुनस्तत् घ्राणविज्ञानतथता यां
न घ्राणविज्ञानं नान्यत्र घ्राणविज्ञानात्तथता । एवं घ्राणविज्ञानस्य तथता । यत्पुनस्तत् जिह्वाविज्ञानतथता यां न जिह्वाविज्ञानं नान्यत्र जिह्वाविज्ञाना[illegible]
ता । एवं जिह्वाविज्ञानस्य तथता । यत्पुनस्तत् कायविज्ञानतथता यां न कायविज्ञानं नान्यत्र कायविज्ञानात्तथता । एवं कायविज्ञानस्य तथता । यत्पुनस्तत् म-
नोविज्ञानतथता यां न मनोविज्ञानं नान्यत्र मनोविज्ञानात्तथता । एवं मनोविज्ञानस्य तथता ॥ यत्पुनस्तत् चक्षुःसंस्पर्शतथता यां न चक्षुःसंस्पर्शो नान्यत्र चक्षुः-
संस्पर्शात्तथता । एवं चक्षुःसंस्पर्शस्य तथता । यत्पुनस्तत् श्रोत्रसंस्पर्शतथता यां न श्रोत्रसंस्पर्शो नान्यत्र श्रोत्रसंस्पर्शात्तथता । एवं श्रोत्रसंस्पर्शस्य तथता
यत्पुनस्तत् घ्राणसंस्पर्शतथता यां न घ्राणसंस्पर्शो नान्यत्र घ्राणसंस्पर्शात्तथता । एवं घ्राणसंस्पर्शस्य तथता । यत्पुनस्तत् जिह्वासंस्पर्शस्य तथता यां न
जिह्वासंस्पर्शो नान्यत्र जिह्वासंस्पर्शात्तथता । एवं जिह्वासंस्पर्शस्य तथता ॥ यत्पुनस्तत् कायसंस्पर्शतथता यां न कायसंस्पर्शो नान्यत्र कायसंस्पर्शात्त-
था । एवं कायसंस्पर्शस्य तथता । यत्पुनस्तत् मनःसंस्पर्शतथता यां न मनःसंस्पर्शो नान्यत्र मनःसंस्पर्शात्तथता । एवं मनःसंस्पर्शस्य तथता ॥ यत्पुनस्तत् चक्षुःसंस्पर्शप्रत्ययवेद-
नातथता यां न चक्षुःसंस्पर्शप्रत्ययवेदना नान्यत्र चक्षुःसंस्पर्शप्रत्ययवेदनायास्तथता । एवं चक्षुःसंस्पर्शप्रत्ययवेदनायास्तथता । यत्पुनस्तत् श्रोत्र-
संस्पर्शप्रत्ययवेदना नान्यत्र श्रोत्रसंस्पर्शप्रत्ययवेदनायास्तथता । एवं श्रोत्रसंस्पर्शस्य तथता । यत्पुनस्तत् घ्राणसंस्पर्शप्रत्ययवेदनातथता यां न

२

घ्राणसंस्पर्शप्रत्ययवेदना नान्यत्र घ्राणसंस्पर्शप्रत्ययवेदनायास्तथता । यत्पुनस्तत् जिह्वासंस्पर्शप्रत्ययवेदनातथता यां न जिह्वासंस्पर्शप्रत्ययवेदना
नान्यत्र जिह्वासंस्पर्शात्तथता । एवं जिह्वासंस्पर्श[illegible]तथता । यत्पुनस्तत् कायसंस्पर्शप्रत्ययवेदनातथता यां न कायसंस्पर्शप्रत्ययवेदना नान्यत्र कायसंस्पर्श-
प्रत्ययवेदनायास्तथता । एवं कायसंस्पर्शप्रत्ययवेदनायास्तथता । यत्पुनस्तत् मनःसंस्पर्शप्रत्ययवेदनातथता यां न मनःसंस्पर्शप्रत्ययवेदनायास्तथ-
ता । एवं मनःसंस्पर्शप्रत्ययवेदनायास्तथता । यत्पुनस्तत् पृथिवीधातुतथता यां न पृथिवीधातुर्नान्यत्र पृथिवीधातोस्तथता । यत्पुनस्तत् अब्धातुतथता यां नाब्धा-
तुर्नान्यत्राब्धातोस्तथता । एवमब्धातोस्तथता । यत्पुनस्तत् तेजोधातुतथता यां न तेजोधातुर्नान्यत्र तेजोधातोस्तथता । एवं तेजोधातोस्तथता । यत्पुनस्तत् वायु-
धातुतथता यां न वायुधातुर्नान्यत्र वायुधातोस्तथता । एवं वायुधातोस्तथता । यत्पुनस्तत् आकाशधातुतथता यां नाकाशधातुर्नान्यत्राकाशधातोस्तथता । ए-
वमाकाशधातोस्तथता । यत्पुनस्तत् विज्ञानधातुतथता यां न विज्ञानधातुर्नान्यत्र विज्ञानधातोस्तथता । एवं विज्ञानधातोस्तथता ॥ यत्पुनस्तत् अविद्यात-
थता यां नाविद्या नान्यत्राविद्यायास्तथता । एवमविद्यायास्तथता । यत्पुनस्तत् संस्कारतथता यां न संस्कारा नान्यत्र संस्कारेभ्यस्तथता । एवं संस्काराणां तथता । य-
त्पुनस्तत् विज्ञानतथता यां न विज्ञानं नान्यत्र विज्ञानात्तथता । एवं विज्ञानस्य तथता । यत्पुनस्तत् नामरूपतथता यां न नामरूपं नान्यत्र नामरूपा-
त्तथता । एवं नामरूपस्य तथता । यत्पुनस्तत् षडायतनतथता यां न षडायतनं नान्यत्र षडायतनात्तथता । एवं षडायतनस्य तथता । यत्पुनस्तत् [illegible]तथ-
ता यां न स्पर्शो नान्यत्र स्पर्शात्तथता । एवं स्पर्शस्य तथता । यत्पुनस्तत् वेदनातथता यां न वेदना नान्यत्र वेदनायास्तथता । एवं वेदनायास्तथता । यत्पुनस्-
तत् तृष्णातथता यां न तृष्णा नान्यत्र तृष्णायास्तथता । यत्पुनस्तत् उपादानतथता यां नोपादानं नान्यत्रोपादानात्तथता । एवमुपादानस्य तथता । यत्पुनस्-
तत् भवतथता यां न भवो नान्यत्र भवात्तथता । एवं भवस्य तथता । यत्पुनस्तत् जातितथता यां न जातिर्नान्यत्र जातेस्तथता । एवं जातेस्तथता । यत्पुनस्त-
त् जरामरणतथता यां न जरामरणं नान्यत्र जरामरणात्तथता । एवं जरामरणस्य तथता ॥ यत्पुनस्तत् दानपारमितातथता यां न दानपारमिता ना-
न्यत्र दानपारमितायास्तथता । एवं दानपारमितायास्तथता । यत्पुनस्तत् शीलपारमितातथता यां न शीलपारमिता नान्यत्र शीलपारमितायास्त-
थता । एवं शीलपारमितायास्तथता । यत्पुनस्तत् क्षान्तिपारमितातथता यां न क्षान्तिपारमिता नान्यत्र क्षान्तिपारमितायास्तथता । एवं
क्षान्तिपारमितायास्तथता । यत्पुनस्तत् वीर्यपारमितातथता यां न वीर्यपारमिता नान्यत्र वीर्यपारमितायास्तथता । एवं वीर्यपारमितायास्तथता । यत्पुनस्तत् ध्यानपारमि-
तातथता यां न ध्यानपारमिता नान्यत्र ध्यानपारमितायास्तथता । एवं ध्यानपारमितायास्तथता । यत्पुनस्तत् प्रज्ञापारमितातथता यां न प्रज्ञा-
पारमिता नान्यत्र प्रज्ञापारमितायास्तथता । एवं प्रज्ञापारमितायास्तथता ॥ यत्पुनस्तत् अध्यात्मबहिर्धाशून्यतातथता यां नाध्यात्मशून्यता नान्यत्राध्यात्मशून्यतायास्तथ

धा

स्पर्श


0 cms.
5
10
15
20
25
30
35
40



प्रज्ञा

त्वस्य तथता यां नानागामित्वं तथता नान्यत्रानागामित्वस्य तथता । एवमनागामित्वस्य तथता । यत्र सत्यतेन अर्हत्व तथता यां नार्हत्वेनान्यत्रार्ह
त्वस्य तथता । एवमर्हत्वस्य तथता । यत्र सत्यतः प्रत्येकबुद्धि तथता यां प्रत्येकबुद्धिर्नान्यत्र प्रत्येकबुद्धस्य तथता । एवं प्रत्येकबुद्धस्य तथता । यत्र सत्यतः
अनुत्तरा सम्यक्संबोधि तथता यां नानुत्तरा सम्यक्संबोधिर्नान्यत्रानुत्तरा सम्यक्संबोधेस्तथता एवमनुत्तरा सम्यक्संबोधेस्तथता । यत्र सत्यतः मार्गा
कारज्ञता तथता तथता यां न मार्गाकारज्ञता नान्यत्र मार्गाकारज्ञतायास्तथता । एवं मार्गाकारज्ञतायास्तथता । यत्र सत्यतः सर्वाकारज्ञता तथता यां सर्वाकारज्ञता नान्य
त्र सर्वाकारज्ञतायास्तथता । एवं सर्वाकारज्ञतायास्तथता ॥ आह ॥ आश्चर्यं भगवन्यावदयं सुसूक्ष्मा नाम पारमिता यावद्बोधिसत्वो महासत्वो रूपाच्च
निर्वाणितो निर्वाणश्च सुविचितं । वेदनायाश्च निर्वाणितो निर्वाणश्च सुविचितं । कायाच्च निर्वाणितो । संज्ञायाश्च निर्वाणितो निर्वाणश्च सुविचितं । संस्कारेभ्य
श्च निर्वाणितो निर्वाणश्च सुविचितं । विज्ञानाच्च निर्वाणितो निर्वाणश्च सुविचितं ॥ चक्षुषश्च निर्वाणितो निर्वाणश्च सुविचितं । श्रोत्राच्च निर्वाणितो निर्वाणश्च
सुविचितं ॥ रूपाच्च निर्वाणितो निर्वाणश्च सुविचितं । संस्कारेभ्यश्च निर्वाणितो निर्वाणश्च सुविचितं । घ्राणाच्च निर्वाणितो निर्वाणश्च सुविचितं । जिह्वायाश्च
निर्वाणितो निर्वाणश्च सुविचितं । कायाच्च निर्वाणितो निर्वाणश्च सुविचितं । वेदनायाः । मनसश्च निर्वाणितो निर्वाणश्च सुविचितं ॥ रूपाच्च निर्वाणितो निर्वाणश्च
सुविचितं । धर्मेभ्यश्च निर्वाणितो निर्वाणश्च सुविचितं । गन्धाच्च निर्वाणितो निर्वाणश्च सुविचितं । रसाच्च निर्वाणितो निर्वा । च सुविचितं । शब्दाच्च निर्वाणितो नि
र्वाणश्च सुविचितं । स्पर्शाच्च निर्वाणितो निर्वाणश्च सुविचितं । धर्मेभ्यश्च निर्वाणितो निर्वाणश्च सुविचितं । चक्षुर्विज्ञानाच्च निर्वाणितो निर्वाणश्च सुविचितं । श्रो
त्रविज्ञानाच्च निर्वाणितो निर्वाणश्च सुविचितं । घ्राणविज्ञानाच्च निर्वाणितो निर्वाणश्च सुविचितं । जिह्वाविज्ञानाच्च निर्वाणितो निर्वाणश्च सुविचितं । का
यविज्ञानाच्च निर्वाणितो निर्वाणश्च सुविचितं । मनोविज्ञानाच्च निर्वाणितो निर्वाणश्च सुविचितं । चक्षुःसंस्पर्शाच्च निर्वाणितो निर्वाणश्च सुविचितं । श्रो
त्रसंस्पर्शाच्च निर्वाणितो निर्वाणश्च सुविचितं । घ्राणसंस्पर्शाच्च निर्वाणितो निर्वाणश्च सुविचितं । जिह्वासंस्पर्शाच्च निर्वाणितो निर्वाणश्च सुविचितं । कायसं
स्पर्शाच्च निर्वाणितो निर्वाणश्च सुविचितं । मनःसंस्पर्शाच्च निर्वाणितो निर्वाणश्च सुविचितं ॥ चक्षुःसंस्पर्शप्रत्ययवेदनायाश्च निर्वाणितो निर्वाणश्च सु
विचितं । कायसंस्पर्शप्रत्ययवेदनायाश्च निर्वाणितो निर्वाणश्च सुविचितं । घ्राणसंस्पर्शाच्च निर्वाणितो निर्वाणश्च सुविचितं । जिह्वासंस्पर्शाच्च निर्वा
णितो निर्वाणश्च सुविचितं । घ्राणसंस्पर्शप्रत्ययवेदनायाश्च निर्वाणितो निर्वाणश्च सुविचितं । श्रोत्रसंस्पर्शप्रत्ययवेदनायाश्च निर्वाणितो नि
र्वाणश्च सुविचितं । जिह्वासंस्पर्शप्रत्ययवेदनायाश्च निर्वाणितो निर्वाणश्च सुविचितं । कायसंस्पर्शप्रत्ययवेदनायाश्च निर्वाणितो निर्वाणश्च सु

२१८

चितं । मनःसंस्पर्शप्रत्ययवेदनायाश्च निर्वाणितो निर्वाणश्च सुविचितं ॥ पृथिवीधातोश्च निर्वाणितो निर्वाणश्च सुविचितं । अब्धातोश्च निर्वाणितो निर्वा
णश्च सुविचितं । तेजोधातोश्च निर्वाणितो निर्वाणश्च सुविचितं । आकाशधातोश्च निर्वाणितो निर्वाणश्च सुविचितं । वायुधातोश्च निर्वाणितो निर्वाणश्च सुवि
तं । नामरूपाच्च निर्वाणितो निर्वाणश्च सुविचितं । विज्ञानधातोश्च निर्वाणितो निर्वाणश्च सुविचितं ॥ अविद्यायाश्च निर्वाणितो निर्वाणश्च सुविचितं । संस्का
रेभ्यश्च निर्वाणितो निर्वाणश्च सुविचितं । विज्ञानाच्च निर्वाणितो निर्वाणश्च सुविचितं । नामरूपाच्च निर्वाणितो निर्वाणश्च सुविचितं । षडायतनाच्च निर्वाणि
तो निर्वाणश्च सुविचितं । स्पर्शाच्च निर्वाणितो निर्वाणश्च सुविचितं । वेदनायाश्च निर्वाणितो निर्वाणश्च सुविचितं । तृष्णायाश्च निर्वाणितो निर्वाणश्च सुवि
तं । उपादानाच्च निर्वाणितो निर्वाणश्च सुविचितं । भवाच्च निर्वाणितो निर्वाणश्च सुविचितं । धीर्यपारमितायाश्च निर्वाणितो निर्वाणश्च सुविचितं । जातेश्च नि
र्वाणितो निर्वाणश्च सुविचितं । जरामरणाच्च निर्वाणितो निर्वाणश्च सुविचितं ॥ दानपारमितायाश्च निर्वाणितो निर्वाणश्च सुविचितं । शीलपारमितायाश्च
निर्वाणितो निर्वाणश्च सुविचितं । क्षान्तिपारमितायाश्च निर्वाणितो निर्वाणश्च सुविचितं । वीर्यपारमितायाश्च निर्वाणितो निर्वाणश्च सुविचितं । ध्यानपा
रमितायाश्च निर्वाणितो निर्वाणश्च सुविचितं । प्रज्ञापारमितायाश्च निर्वाणितो निर्वाणश्च सुविचितं । महाशून्यतायाश्च निर्वाणितो निर्वाणश्च अ
ध्यात्मशून्यतायाश्च निर्वाणितो निर्वाणश्च सुविचितं । बहिर्धाशून्यतायाश्च निर्वाणितो निर्वाणश्च सुविचितं । अध्यात्मबहिर्धाशून्यतायाश्च नि
र्वाणितो निर्वाणश्च सुविचितं । शून्यताशून्यतायाश्च निर्वाणितो निर्वाणश्च सुविचितं । महाशून्यतायाश्च निर्वाणितो निर्वाणश्च सुविचितं । परमार्थ
शून्यतायाश्च निर्वाणितो निर्वाणश्च सुविचितं । संस्कृतशून्यतायाश्च निर्वाणितो निर्वाणश्च सुविचितं । असंस्कृतशून्यतायाश्च निर्वाणितो निर्वाण
श्च सुविचितं । अनवराग्रशून्यतायाश्च निर्वाणितो निर्वाणश्च सुविचितं । अनवकारशून्यतायाश्च निर्वाणितो निर्वाणश्च सुविचितं । प्रकृतिशून्यता
याश्च निर्वाणितो निर्वाणश्च सुविचितं । सर्वधर्मशून्यतायाश्च निर्वाणितो निर्वाणश्च सुविचितं । स्वलक्षणशून्यतायाश्च निर्वाणितो निर्वाणश्च सु
विचितं । अनुपलम्भशून्यतायाश्च निर्वाणितो निर्वाणश्च सुविचितं । अभावशून्यतायाश्च निर्वाणितो निर्वाणश्च सुविचितं । स्वभावशून्य
तायाश्च निर्वाणितो निर्वाणश्च सुविचितं । अभावस्वभावशून्यतायाश्च निर्वाणितो निर्वाणश्च सुविचितं । स्मृत्युपस्थानेभ्यश्च निर्वाणितो निर्वाणश्च सुवि
तं । सम्यक्प्रहाणेभ्यश्च निर्वाणितो निर्वाणश्च सुविचितं । ऋद्धिपादेभ्यश्च निर्वाणितो निर्वाणश्च सुविचितं । बलेभ्यश्च निर्वाणितो निर्वाणितो निर्वाणश्च सु
चितं । बोध्यङ्गेभ्यश्च निर्वाणितो निर्वाणश्च सुविचितं । आर्याष्टाङ्गमार्गेभ्यश्च निर्वाणितो निर्वाणश्च सुविचितं । आर्यसत्येभ्यश्च निर्वाणितो निर्वाणश्च

प्र॰प॰

सूचितं। ध्यानत्वेव निवानिता निर्वाणं च सूचितं। अप्रमाणत्वेव निवानिता निर्वाणं च सूचितं। आरूप्यसमापत्तिश्चैव निवानिता निर्वाणं च सूचितं। विमोक्षत्वेव निवानिता निर्वाणं च सूचितं। नवानुपूर्वविहारसमापत्तिश्चैव निवानिता निर्वाणं च सूचितं। शून्यतानिमित्ताप्रणिहितात्वेव निवानिता निर्वाणं च सूचितं। अभिज्ञात्वेव निवानिता निर्वाणं च सूचितं। समाधित्वेव निवानिता निर्वाणं च सूचितं। धारणीमुखत्वेव निवानिता निर्वाणं च सूचितं। तथागतबलत्वेव निवानिता निर्वाणं च सूचितं। वैशारद्यत्वेव निवानिता निर्वाणं च सूचितं। प्रतिसंविदश्चैव निवानिता निर्वाणं च सूचितं। महामैत्र्यश्चैव निवानिता निर्वाणं च सूचितं। महाकरुणायाश्चैव निवानिता निर्वाणं च सूचितं। आवेणिकबुद्धधर्मत्वेव निवानिता निर्वाणं च सूचितं। लौकिकलोकोत्तरः सास्रवानास्रवः सावद्यानवद्यः संक्लेशव्यवदानात्वेव निवानिता निर्वाणं च सूचितं॥ भगवानाह। यः पुनः सुभूते बोधिसत्त्वो महासत्त्व इमानि गम्भीराणि गम्भीराणि स्थानानि प्रज्ञापारमिताप्रतिसंयुक्तानि चिंतयिष्यति तुलयिष्यति। उपनिध्यास्यति॥ एवं मया स्थातव्यं यथा प्रज्ञापारमितायामुपदिष्टमयं सुभूते बोधिसत्त्वो महासत्त्वस्तथैव सम्पादयन् यथा प्रज्ञापारमितायामाख्यातं तथा प्रतिपद्यमानस्तथा युञ्जमानस्तथा घटमानस्तथा व्यायच्छमानो यथा प्रज्ञापारमितायामुपदिष्टं स एकदिवसेनापि कियत्कर्मासंख्येयाप्रमेयानपरिमाणानि कुशलमूलानि परिगृहीष्यति। सोऽपरिमाणां कल्पांसंसारात् ... नयिष्यति। कः पुनर्वादो यो नित्यं(?) सः प्रज्ञापारमितायाः सम्बोधिं प्रति अन्तर्मनसिकारैर्विहरिष्यति। तद्यथापि नाम सुभूते पुरुषो रागचरितो वितर्कचरितस्तेन रागचरितेन पुरुषेण स्त्रिया सार्द्धं अभिरूपया प्रासादिकया सार्द्धं अभिरूपया प्रासादिकया दर्शनीयया संकेतः कृतो भवेत्। आह। स्त्रीप्रतिसंयुक्ता एव भगवंस्तस्य वितर्काः प्रवर्तेयुः। सा खलु स्त्री परिगृहीता न लभेतात्मानं निष्क्रामयितुं। तत्किं मन्यसे सुभूते किंप्रतिसंयुक्तास्तस्य पुरुषस्य वितर्काः प्रवर्तेयुः। आह। स्त्रीप्रतिसंयुक्ता एव भगवंस्तस्य पुरुषस्य वितर्काः प्रवर्तेयुः। एषा मामीयमागता तया सार्द्धं निवत्स्यामि परिचारयिष्यामि। भगवानाह। तत्किं मन्यसे सुभूते तस्य पुरुषस्य रात्र्या दिवसस्य वात्ययेन कियन्तस्तस्य पुरुषस्य वितर्का वर्तेरन्। आह। बहवो भगवन्बहवः सुगत तस्य पुरुषस्य रात्र्या दिवसस्य वात्ययेन वितर्का वर्तेरन्। भगवानाह। यावन्तः सुभूते तस्य पुरुषस्य रात्र्या दिवसस्य वात्ययेन वितर्का वर्तेरन्। एतावतः कल्पान्बोधिसत्त्वो महासत्त्वः संसारं नाक्षिनयति विपृष्ठीकरोति यश्च गम्भीरायां प्रज्ञापारमितायां यथोपदिष्टायां चिन्तयति। उपपरीक्षते। उपनिध्यायति। तथा च योगमापद्यते यथाख्यातां भावि ज्ञापयति। ये दोषा बोधिसत्त्वा महासत्त्वैर्विवर्ज्यता। अनुत्तरायाः सम्यक्संबोधेः। एवं योगमनुयुक्तः सुभूते बोधिसत्त्वो महासत्त्वः

तानन्तविहारेण विहरन् यथा प्रज्ञापारमितायामुपदिष्टमेकदिवसेन यत्कुशलं परिगृह्णाति। तेन गङ्गानदीवालुकोपमा लोकधातवः परिपूर्णा भवेयुः। न तस्य पादस्य कुशलमूलमूलस्य शततमीमपि कलां नोपैति। सहस्रतमीमपि कलां नोपैति। शतसहस्रतमीमपि कलां नोपैति। कोटितमीमपि कलां नोपैति। कोटिशततमीमपि कलां नोपैति। कोटिसहस्रतमीमपि कलां नोपैति। कोटीशतसहस्रतमीमपि कलां नोपैति। कोटीनियुतशतसहस्रतमीमपि कलां नोपैति। संख्यामपि गणनामपि कलामपि गणनामप्युपमामप्युपनिषदमपि नोपैति। पुनरपरं सुभूते यो बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् गङ्गानदीवालुकोपमान्कल्पान्दानं दद्याद्बुद्धरत्ने धर्मरत्ने संघरत्ने। तत्किं मन्यसे सुभूते अपि नु बोधिसत्त्वो महासत्त्वस्ततो निदानं बहुतरं पुण्यं प्रसवेत्। आह। बहु भगवन्बहु सुगत। अप्रमेयमसंख्येयमपरिमाणमचिन्त्यमतुल्यं। भगवानाह। अयमेव ततः सुभूते बोधिसत्त्वो महासत्त्वो बहुतरं पुण्यं प्रसवेद्य इह गम्भीरायां प्रज्ञापारमितायां यथानिर्दिष्टायां योगमापद्येत। तत्कस्य हेतोः। महती हि बोधिसत्त्वानां महासत्त्वानां नयायनेन यानेनानुत्तरां सम्यक्संबोधिमभिसंबुध्यते। तत्किं मन्यसे सुभूते यो बोधिसत्त्वो महासत्त्वः प्रज्ञापारमिताविरहितो गंगानदीवालुकोपमान्कल्पान् स्रोतआपन्नेषु दक्षिणीयां प्रतिष्ठापयेत्। सकृदागामिष्वनागामिष्वर्हत्सु प्रत्येकबुद्धेषु तथागतेषु सम्यक्संबुद्धेषु दक्षिणीयां प्रतिष्ठापयेत्। तत्किं मन्यसे सुभूते अपि नु स बोधिसत्त्वो महासत्त्वस्ततो निदानं बहुतरं पुण्यं प्रसवेत्। बहु भगवन्बहु सुगत। भगवानाह। अयमेव सुभूते कुलपुत्रो वा कुलदुहिता वा ततो निदानं बहुतरं पुण्यं प्रसवेद्य इह गम्भीरायां प्रज्ञापारमितायां यथोपदिष्टायां योगमापद्येत। तत्कस्य हेतोः। अत्र हि प्रज्ञापारमितायां वर्तमानो बोधिसत्त्वो महासत्त्वः श्रावकप्रत्येकबुद्धभूमिमतिक्रम्य बोधिसत्त्वनियाममवक्रामति। यावदनुत्तरां सम्यक्संबोधिमभिसम्बुध्यते। तत्किं मन्यसे सुभूते यो बोधिसत्त्वो महासत्त्वः प्रज्ञापारमिताविरहितो गङ्गानदीवालुकोपमान्कल्पान्तिष्ठन्दानं दद्याच्छीलं रक्षेत् क्षान्त्या सम्पादयेद्वीर्यमारभेत ध्यानानि समापद्येत। प्रज्ञां भावयेदपि नु स ततो निदानं बहु पुण्यं प्रसवेत्। आह। बहु भगवन्बहु सुगत। भगवानाह। अतः सुभूते कुलपुत्रो वा कुलदुहिता वा बहुतरं पुण्यं प्रसवेत्। य इह गम्भीरायां प्रज्ञापारमितायां स्थित्वैकदिवसमपि दानं दद्याच्छीलं रक्षेत्। क्षान्त्या सम्पादयेद्वीर्यमारभेत ध्यानानि समापद्येत प्रज्ञां भावयेत्। तत्कस्य हेतोः। तथा हि सुभूते मार्गो बोधिसत्त्वानां महासत्त्वानां यदुत प्रज्ञापारमिता। अनयि घोष्यं बोधिसत्त्वानां महासत्त्वानां यदुत प्रज्ञापारमिता। अत्र हि सुभूते प्रज्ञापारमितायां स्थित्वा बोधिसत्त्वा महासत्त्वाः सर्वधर्मान्परिपूरयन्ति। यथा

२५१

वदनुत्तरां सम्यक्संबोधिमभिसंबुध्यते। तत्किं मन्यसे सुभूते यो बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितयाविरहितो गंगानदीवालुकोपमां कल्पांस्तिष्ठे
त्। धर्मदानं दद्यादपि नु स कुलपुत्रो वा कुलदुहिता वा ततोनिदानं बहुतरं पुण्यं प्रसवेत्। आह। बहु भगवन् बहु सुगत। भगवानाह। अतः सुभूते कुलपुत्रो
वा कुलदुहिता वा बहुतरं पुण्यं प्रसवेत्। य इह गम्भीरायां प्रज्ञापारमितायां यथोपदिष्टायां स्थित्वैकदिवसमपि धर्मदानं दद्यात्। तत्कस्य हेतोः।
तथा हि सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितयाविरहितो गंगानदीवालुकोपमां कल्पांस्तिष्ठन्। धर्मदानं दद्यादपि नु स कुलपुत्रो वा कु
लदुहिता वा ततोनिदानं बहुतरं पुण्यं प्रसवेत्। य इह गम्भीरायां प्रज्ञापारमितायां यथोपदिष्टायां स्थित्वैकदिवसमपि धर्मदानं दद्यात्। तत्क
स्य हेतोः। तथा हि सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितयाविरहितः स सर्वाकारज्ञताया अविरहितः। तस्मात्तर्हि सुभूते बोधिसत्त्वेन महा
सत्त्वेनानुत्तरां सम्यक्संबोधिमभिसंबोद्धुकामेन प्रज्ञापारमिता अविरहितेन भवितव्यं। तत्किं मन्यसे सुभूते यो बोधिसत्त्वो महासत्त्वः प्रज्ञापारमि
ताया अविरहितो गंगानदीवालुकोपमां कल्पांस्तिष्ठन् योगमापद्यते। चतुर्षु स्मृत्युपस्थानेषु चतुर्षु सम्यक्प्रहाणेषु चतुर्षु ऋद्धिपादेषु पञ्च
न्द्रियेषु सप्तबोध्यङ्गेषु आर्याष्टाङ्गमार्गे चतुर्ष्वार्यसत्येषु चतुर्षु ध्यानेषु चतुर्ष्वप्रमाणेषु चतुर्षु ध्यानेषु चतुर्ष्वप्रमाणेषु चतुर्ष्वारूप्यसमा
पत्तिषु अष्टासु विमोक्षेषु नवस्वनुपूर्वविहारसमापत्तिषु शून्यतानिमित्ताप्रणिहितेषु समाधिषु। तत्किं मन्यसे सुभूते अपि नु स कुलपुत्रो वा कुल
दुहिता वा ततोनिदानं बहुतरं पुण्यं प्रसवेत्। आह। बहु भगवन् बहु सुगत। भगवानाह। अयमेव सुभूते कुलपुत्रो वा कुलदुहिता वा निदानं बहुतरं पुण्यं प्रसवे
त्। य इह गम्भीरायां प्रज्ञापारमितायां यथोपदिष्टायां स्थित्वैकदिवसमपि योगमापद्येत। चतुर्षु स्मृत्युपस्थानेषु चतुर्षु सम्यक्प्रहाणेषु चतुर्षु ऋ
द्धिपादेषु पञ्चेन्द्रियेषु पञ्चबलेषु सप्तबोध्यङ्गेषु आर्याष्टाङ्गमार्गेषु चतुर्ष्वार्यसत्येषु चतुर्षु ध्यानेषु चतुर्ष्वप्रमाणेषु चतुर्ष्वारूप्यसमापत्तिषु
अष्टासु विमोक्षेषु नवस्वनुपूर्वविहारसमापत्तिषु शून्यतानिमित्ताप्रणिहितेषु विमोक्षमुखेषु दशसु तथागतबलेषु चतुर्षु वैशारद्येषु चतसृषु प्र
तिसंवित्सु महामैत्र्यां महाकरुणायां चाष्टादशस्वावेणिकेषु बुद्धधर्मेषु। तत्कस्य हेतोः। अस्थानं सुभूते अनवकाशो यद्बोधिसत्त्वो महासत्त्वः प्रज्ञा
पारमितयाविरहितः सर्वाकारज्ञतायाविवर्तेत न तदस्थानं विद्यते। स्थानं च खलु पुनः सुभूते विद्यते यद्बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितयाविरहि
तः यथोपदिष्टायां सर्वाकारज्ञताया विरहितः स्थानमेतद्विद्यते। तस्मात्तर्हि सुभूते बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितयामविरहितेन भवितव्यं। त
त्किं मन्यसे सुभूते यो बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितयाविरहितो गंगानदीवालुकोपमां कल्पांस्तिष्ठन्नामिषदानं च धर्मदानं च धर्म

२०८

दानं चाप्रतिलभ्य न प्रतिसंयुक्तान्मनसिकारानानुत्तरायां सम्यक्संबोधौ परिणामयेत्कस्य हेतोः। न हि मनसः परिणामोयं यथा प्रज्ञापारमितापरिणाम
यः पुनः प्रज्ञापारमिताविनापरिणामो नासौ परिणामः। तस्मात्तर्हि सुभूते बोधिसत्त्वेन महासत्त्वेनानुत्तरां सम्यक्संबोधिमभिसंबोद्धुकामेन प्रज्ञापारमि
तापरिणामनाकुशलमूलेन भवितव्यं। तत्किं मन्यसे सुभूते यो हि कश्चित्कुलपुत्रो वा कुलदुहिता वा प्रज्ञापारमितायाविरहितो गंगानदीवालुकोप
मां कल्पांस्तिष्ठन्नतीतानागतप्रत्युत्पन्नानां बुद्धानां भगवतां सश्रावकसंघानां यत्कुशलमूलं तत्सर्वमनुमोद्यानुत्तरायां सम्यक्संबोधौ परिणामयेदपि
नु स कुलपुत्रो वा कुलदुहिता वा ततोनिदानं बहुतरं पुण्यं प्रसवेत्। आह। बहु भगवन् बहु सुगत। भगवानाह। अतः सुभूते कुलपुत्रो वा कुलदुहिता वा बहु
पुण्यं प्रसवेत्। य इह गम्भीरायां प्रज्ञापारमितायां यथोपदिष्टायां स्थित्वैकदैवसिकमपि कुशलमूलमनुत्तरायां सम्यक्संबोधौ परिणामयेत्क
स्य हेतोः। प्रज्ञापारमिता पूर्वङ्गमा हि सुभूते सर्वपरिणामनानां। तस्मात्तर्हि सुभूते बोधिसत्त्वेन महासत्त्वेनानुत्तरां सम्यक्संबोधिमभिसंबोद्धुकामेन प्रज्ञा
पारमितापरिणामनाकुशलमूलेन भवितव्यं। आह। ननु पुनर्भगवन्नतीताः संस्काराः कल्पितास्तद्भगवता तत्कथं स कुलपुत्रो वा कुलदुहिता वा बहुतरं
पुण्यं प्रसवेत्। न भगवन्नतीताः संस्काराः शक्यं सम्यग्दृष्टिं वा त्यादर्पितुं। न्यामावक्रामयितुं। स्रोतआपत्तिफलमनुप्राप्तुं सकृदागामिफलमनु
प्राप्तुं अनागामिफलमनुप्राप्तुमर्हत्त्वं वानुप्राप्तुं। अनुत्तरां सम्यक्संबोधिमभिसंबोद्धुं। अपि तु खलु पुनः सुभूते तदपि दानमभिसंस्कारो बोधिस
त्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाश्चेतनाः। एकमेव ख्याति निकायमेव ख्याति। गुह्यकमेव ख्याति। असानकमेव ख्याति। तत्कस्य हेतोः। तथा हि सुभूते बो
धिसत्त्वो महासत्त्वोऽध्यात्मशून्यतायां संस्थितो बहिर्धाशून्यतायां संस्थितोऽध्यात्मबहिर्धाशून्यतायां संस्थितः। शून्यताशून्यताशून्यतायां संस्थि
तः। परमार्थशून्यतायां संस्थितः। सर्वधर्मशून्यतायां संस्थितः। स्वलक्षणशून्यतायां संस्थितः। अनुपलम्भशून्यतायां संस्थितः। अभावशून्य
तायां संस्थितः। स्वभावशून्यतायां संस्थितः। अभावस्वभावशून्यतायां संस्थितः। स खलु पुनः सुभूते बोधिसत्त्वो महासत्त्वः। आसु शून्यतासु सं
स्थितो यथा यथा तानभिसंस्कारान् शून्यान् व्यवलोकयति तथा तथा बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितयाविरहितो भवति। यथा यथा बोधिसत्त्वो महासत्त्वः प्र
ज्ञापारमितयाविरहितो भवति तथा तथासंख्येयमपरिमाणं पुण्यं प्रसवति। आह। असंख्येयस्य च भगवन्नप्रमेयस्य चापरिमाणस्य च को विशे
षः। किन्नानाकरणं भगवानाह। असंख्येयमिति सुभूते यत्संख्यां नापैति। संस्कृते वा धातौ अप्रमेयमिति सुभूते यस्य प्रमाणं नोपलभ्यते। अतीतानागतप्र

प्रथन·

त्यन्नाप्यपरिमाणमिति सतो यन्न शक्यते प्रमाणयितुं॥ आह स्याद्भगवं पर्यायो येन पर्यायेन रूपमसंख्येयमप्रमेयमपरिमाणं भवेत्। संज्ञाप्यसंख्येयाप्रमेया अ
संख्येया अपरिमाणं भवेत्। संस्काराप्यसंख्येया। अप्रमेया अपरिमाणं भवेयुः। विज्ञानमप्यसंख्येयमप्रमेयमपरिमाणं भवेत्॥ आह। कतमेन भगवन्न
र्यायेन रूपमसंख्येयमप्रमेयमप्रमाणं भवेत्। वेदनाप्यसंख्येया अप्रमेया अपरिमाणा भवेत्। संस्काराप्यसंख्येया अप्रमेया अप्रमाणा भवेयुः पूर्ववत् विज्ञान
मप्यसंख्येयमप्रमेयमप्रमाणं भवेत्। भगवानाह। रूपमपि सुभूते शून्यत्वादसंख्येयमपरिमाणं वेदनापि शून्यत्वादसंख्येया अप्रमेया अपरिमाणा सं
ज्ञापि शून्यत्वादसंख्येया अप्रमेया अपरिमाणा। संस्कारा अपि शून्यत्वादसंख्येया अप्रमेया अपरिमाणा। विज्ञानमपि सुभूते शून्यत्वादसंख्येयमप्रमेयम
परिमाणं॥ आह किं पुनर्भगवं रूपमेव शून्यं। वेदनैव शून्या। संज्ञैव शून्या॥ संस्कारा एव शून्या। विज्ञानमेव शून्यं उत पुनः सर्वधर्मा शून्याः। भगवानाह। न
त्किं मम न्व सुभूते मया सर्वधर्माः शून्याः इत्युक्ताः स्याता। आह शून्या भगवं सर्वधर्मा इति तथागतेनाख्याता। यावद्भगवं शून्यता अक्षयापि सा असंख्येयापि
सा अप्रमेयापि सा अपरिमाणापि सा न हि भगवं शून्यताया संख्येयत्वं लभ्यते। न प्रमाणं न परिमाणमुपलभ्यते। तस्मात्तर्हि भगवं नैषां धर्माणामर्थतो
व्यञ्जनतो वा नानाकरणमुपलभ्यते। भगवानाह। एवमेतत्सुभूते एवमेतन्नैषां धर्माणामर्थतो व्यञ्जनतो वा नानाकरणमुपलभ्यते। अनभिला
प्यमेतत्सुभूते तथागतेनाभिलप्यमानं क्षयमिति वा॥ अप्रमेयमिति वा। शून्यमिति वा। आनिमित्तमिति वा। अप्रणिहितमिति वा। अनभिसंस्कारमिति
वा। अनुत्पादमिति वा। विरागमिति वा। निरोध इति वा। निर्वाणमिति वा। देशनाभिनिर्हारनिर्देश एष तथागतस्य क्षयमिति वा। अप्रमेयमिति
वा। शून्यमिति वा। आनिमित्तमिति वा। अनभिसंस्कारमिति वा। अनुत्पाद इति वा। विराग इति वा। निरोध इति वा। निर्वाणमिति वा। आह। आश्चर्यं भग
वन्यावद्यद्धर्माणां धर्मता तथागतेन देशिता। सा च धर्मता अनभिलाप्या सा शून्यता न वशून्यता यो यथाहं भगवतो भाषितस्यार्थमाजानामि सर्व
धर्मा भगवन्ननभिलाप्या भगवानाह। एवमेतत्सुभूते एवमेतत्। सर्वधर्माः सुभूते अनभिलाप्याः। अस्यार्थस्य वृद्धिर्वा परिहाणिर्वा। आह। यद्यपि भ
गवं अनभिलाप्यस्यार्थस्य वृद्धिर्न परिहाणिर्न। दानपारमिताया भगवन्न वृद्धिर्न परिहाणिर्भविष्यति॥ शीलपारमिताया अपि भगवन्न वृद्धिर्न परिहा
णिर्भविष्यति। क्षान्तिपारमिताया अपि भगवन्न वृद्धिर्न परिहाणिर्भविष्यति। वीर्यपारमिताया अपि भगवन्न वृद्धिर्न परिहाणिर्भविष्यति। ध्यान
पारमिताया अपि भगवन्न वृद्धिर्न परिहाणिर्भविष्यति। प्रज्ञापारमिताया अपि भगवन्न वृद्धिर्न परिहाणिर्भविष्यति। स्मृत्युपस्थानानामपि भ

२०

गवन्न वृद्धिर्न परिहाणिर्भविष्यति। सम्यक्प्रहाणानामपि भगवन्न वृद्धिर्न परिहाणिर्भविष्यति। बलानामपि भगवन्न वृद्धिर्न परिहाणिर्भविष्यति। बो
ध्यङ्गानामपि भगवन्न वृद्धिर्न परिहाणिर्भविष्यति। ऋद्धिपादानामपि भगवन्न परिहाणिर्भविष्यति। इन्द्रियाणामपि भगवन्न वृद्धिर्न परिहाणिर्
भविष्यति। बलानामपि न परिहाणिर्भविष्यति। बोध्यङ्गानामपि भगवन्न परिहाणिर्भविष्यति। आर्याष्टाङ्गमार्गस्यापि भगवन्न वृद्धिर्न परिहाणिर्भवि
ष्यति। आर्यसत्यानामपि भगवन्न वृद्धिर्न परिहाणिर्भविष्यति। अप्रमाणानामपि भगवन्न वृद्धिर्न परिहाणिर्भविष्यति। विमोक्षानामपि भगवन्न वृद्धि
र्न परिहाणिर्भविष्यति। आरूप्यसमापत्तीनामपि भगवन्न वृद्धिर्न परिहाणिर्भविष्यति। शून्यतानिमित्ताप्रणिहितविमोक्षमुखानामपि
भगवन्न वृद्धिर्न परिहाणिर्भविष्यति। अभिज्ञानामपि भगवन्न वृद्धिर्न परिहाणिर्भविष्यति। समाधीनामपि भगवन्न वृद्धिर्न परिहाणिर्भविष्यति
धानर्द। सूत्रानामपि न परिहाणिर्भविष्यति। तथागतबलानामपि भगवन्न वृद्धिर्न परिहाणिर्भविष्यति। वैशारद्यानामपि भगवन्न वृद्धिर्न परि
हाणिर्भविष्यति। आवेणिकबुद्धधर्माणामपि भगवन्न वृद्धिर्न परिहाणिर्भविष्यति। एवं सति भगवं दानपारमिताया अभावो भविष्यति। एवं सति भगवञ्छी
लपारमिताया अभावो भविष्यति। एवं सति भगवं क्षान्तिपारमिताया अभावो भविष्यति। एवं सति भगवं वीर्यपारमिताया अभावो भविष्यति। एवं सति भगवं
ध्यानपारमिताया अभावो भविष्यति। एवं सति भगवं प्रज्ञापारमिताया अभावो भविष्यति। एवं सति भगवन्नध्यात्मशून्यताया अभावो भविष्यति।
एवं सति भगवं बहिर्धाशून्यताया अभावो भविष्यति। एवं सति भगवन्नध्यात्मबहिर्धाशून्यताया अभावो भविष्यति। एवं सति भगवं शून्यताशून्यताया
अभावो भविष्यति। एवं सति भगवं महाशून्यताया अभावो भविष्यति। एवं सति भगवन् परमार्थशून्यताया अभावो भविष्यति। एवं सति भगवं सर्वध
र्मशून्यताया अभावो भविष्यति। एवं सति भगवं संस्कृतशून्यताया अभावो भविष्यति। एवं सति भगवन्नसंस्कृतशून्यताया अभावो भविष्यति। एवं
सति भगवन्नत्यन्तशून्यताया अभावो भविष्यति। एवं सति भगवन्ननवराग्रशून्यताया अभावो भविष्यति। एवं सति भगवन्ननवकारशून्यताया
अभावो भवि। एवं सति भगवं प्रकृतिशून्यताया अभावो भविष्यति। एवं सति भगवं सर्वधर्मशून्यताया अभावो भवि। एवं सति भगवं स्वलक्षण
शून्यताया अभावो भविष्यति। एवं सति भगवन्ननुपलम्भशून्यताया अभावो भविष्यति। एवं सति भगवं स्वभावशून्यताया अभावो भविष्यति। एवं सति भ
गवन्नभावस्वभावशून्यताया अभावो भविष्यति। एवं सति भगवं स्मृत्युपस्थानानामभावो भविष्यति। एवं सति भगवं सम्यक्प्रहाणानामभावो भविष्य
ति। एवं सति भगवन्नृद्धिपादानामभावो भविष्यति। एवं सति भगवन्निन्द्रियाणामभावो भविष्यति। एवं सति भगवं बलानामभावो भविष्यति॥



प्रथम

एवं सति भगवं बोध्यंगा नाम मया भाविता भविष्यति॥ एवं सति भगवं आर्याष्टाङ्गमार्गस्या मया भावितो भविष्यति॥ एवं सति भगवं आर्यसत्यानाम मया भावितानि भविष्य-
ति॥ एवं सति भगवं ध्याना नाम मया भाविता भविष्यति॥ एवं सति भगवं ऋद्धिपादा नाम मया भाविता भविष्यति॥ एवं सति भगवं अप्रमाण्या नाम मया भाविता भविष्यति-
॥ एवं सति भगवं आरूप्यसमापत्ती नाम मया भाविता भविष्यति॥ एवं सति भगवं अभिज्ञा नाम मया भाविता भविष्यति॥ एवं सति भगवं अनुपूर्वविहारसमापत्ती
नाम मया भाविता भविष्यति। एवं सति भगवं शून्यतानिमित्ताप्रणिहितविमोक्षमुखा नाम मया भाविता भविष्यति। एवं सति भगवं अभिज्ञा नाम मया भाविता भविष्यति। ए-
वं सति भगवं समाधी नाम मया भाविता भविष्यति। एवं सति भगवं धारणीमुखा नाम मया भाविता भविष्यति। एवं सति भगवं तथागतबला नाम मया भाविता भविष्यति।
एवं सति भगवं वैशारद्या नाम मया भाविता भविष्यति। एवं सति भगवं प्रतिसंविदा मया भाविता भविष्यति। एवं सति भगवं महामैत्र्या मया भाविता भविष्यति। एवं स-
ति भगवं महाकरुणा मया भाविता भविष्यति। एवं सति भगवं आवेणिकबुद्धधर्मा मया भाविता भविष्यति। यावत्सर्वधर्मा मया भाविता सर्वाकारज्ञता-
मया भाविता भविष्यति। सर्वाकारज्ञता मया भाविता। कोऽयं [illegible] सम्यक्संबोधिमभिसंभोत्स्या। भगवानाह। एवमेतत्सुभूते एवमेतत् [illegible]
[illegible] बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमिता या [illegible]। प्रज्ञापारमिता या [illegible]। प्रज्ञापारमितायां या
[illegible] अहं प्रज्ञापारमितायां विवर्द्धे। अहं ध्यानपारमितायां विवर्द्धे। अहं वीर्यपारमितायां विवर्द्धे। अहं क्षा-
न्तिपारमितायां विवर्द्धे। अहं शीलपारमितायां विवर्द्धे। अहं दानपारमितायां विवर्द्धे। अथ च पुनः स्वयं न वर्तते। नामधेयमात्रमेतद्यदुत दानपा-
रमिता नामधेयमात्रमेतद्यदुत शीलपारमिता नामधेयमात्रमेतद्यदुत क्षान्तिपारमिता नामधेयमात्रमेतद्यदुत वीर्यपारमिता नामधे-
यमात्रमेतद्यदुत ध्यानपारमिता नामधेयमात्रमेतद्यदुत प्रज्ञापारमिता। स दानपारमितायां चरन् [illegible] मनसिकारान् [illegible] विज्ञा [illegible] निवक
[illegible] सम्यक्संबोधेः परिणामयति। तथा च परिणामयति। यथा सानुत्तरा सम्यक्संबोधिः। आह। कथं भगवन्ननुत्तरा सम्यक्संबोधिः। भ-
गवानाह। यावत्सुभूते सर्वधर्माणां तथता सानुत्तरा सम्यक्संबोधिः। आह। कतमेषां भगवं सर्वधर्माणां तथतानुत्तरा सम्यक्संबोधिः। आह। कथं
भगवन्ननुत्तरा सम्यक्संबोधिः। भगवानाह। या च सुभूते रूपस्य तथता सानुत्तरा सम्यक्संबोधिः। या संज्ञायास्तथता सानुत्तरा सम्यक्संबोधि-
[illegible] वेदनायास्तथता सानुत्तरा सम्यक्संबोधिः। या [illegible] तथता सानुत्तरा सम्यक्संबोधिः। या चक्षुषस्तथता सानुत्तरा सम्यक्संबोधिः

२९



र्षि८

।या श्रोत्रस्य तथता सानुत्तरा सम्यक्संबोधिः। या घ्राणस्य तथता सानुत्तरा सम्यक्संबोधिः। या जिह्वायास्तथता सानुत्तरा सम्यक्संबोधिः। या काय-
स्य तथता सानुत्तरा सम्यक्संबोधिः। या मनसस्तथता सानुत्तरा सम्यक्संबोधिः। या रूपस्य तथता सानुत्तरा सम्यक्संबोधिः। या शब्दस्य तथता सानुत्तरा सम्य-
क्संबोधिः। या गन्धस्य तथता सानुत्तरा सम्यक्संबोधिः। या रसस्य तथता सानुत्तरा सम्यक्संबोधिः। या स्पर्शस्य तथता सानुत्तरा सम्यक्संबोधिः। या
धर्माणां तथता सानुत्तरा सम्यक्संबोधिः। या चक्षुर्विज्ञानस्य तथता सानुत्तरा सम्यक्संबोधिः। या श्रोत्रविज्ञानस्य तथता सानुत्तरा सम्यक्संबो-
धिः। या घ्राणविज्ञानस्य तथता सानुत्तरा सम्यक्संबोधिः। या जिह्वाविज्ञानस्य तथता सानुत्तरा सम्यक्संबोधिः। या कायविज्ञानस्य तथता सानुत्तरा
सम्यक्संबोधिः। या मनोविज्ञानस्य तथता सानुत्तरा सम्यक्संबोधिः। या चक्षुःसंस्पर्शस्य तथता सानुत्तरा सम्यक्संबोधिः। या श्रोत्रसंस्पर्शस्य तथता सानु-
त्तरा सम्यक्संबोधिः। या घ्राणसंस्पर्शस्य तथता सानुत्तरा सम्यक्संबोधिः। या जिह्वासंस्पर्शस्य तथता सानुत्तरा सम्यक्संबोधिः। [illegible] कायसंस्पर्शस्य
तथता सानुत्तरा सम्यक्संबोधिः। या मनःसंस्पर्शस्य तथता सानुत्तरा सम्यक्संबोधिः। या चक्षुःसंस्पर्शप्रत्ययवेदनायास्तथता सानुत्तरा [illegible] संबोधिः। या श्रोत्र-
संस्पर्शप्रत्ययवेदनायास्तथता सानुत्तरा सम्यक्संबोधिः। या घ्राणसंस्पर्शप्रत्ययवेदनायास्तथता सानुत्तरा सम्यक्संबोधिः। या जिह्वासंस्पर्श-
प्रत्ययवेदनायास्तथता सानुत्तरा सम्यक्संबोधिः। या कायसंस्पर्शप्रत्ययवेदनायास्तथता सानुत्तरा सम्यक्संबोधिः। या मनःसंस्पर्शप्रत्ययवेद-
नायास्तथता सानुत्तरा सम्यक्संबोधिः। या पृथिवीधातोस्तथता सानुत्तरा सम्यक्संबोधिः। याब्धातोस्तथता सानुत्तरा सम्यक्संबोधिः। या तेजोधा-
तोस्तथता सानुत्तरा सम्यक्संबोधिः। या वायुधातोस्तथता सानुत्तरा सम्यक्संबोधिः। या आकाशधातोस्तथता सानुत्तरा सम्यक्संबोधिः। या विज्ञान-
धातोस्तथता सानुत्तरा सम्यक्संबोधिः। या पृथिवीधातोस्तथता सानुत्तरा सम्यक्संबोधिः। या [illegible] धातोस्तथता सानुत्तरा सम्यक्संबोधिः। याविद्यायास्तथ-
ता सानुत्तरा सम्यक्संबोधिः। या संस्काराणां तथता सानुत्तरा सम्यक्संबोधिः। या विज्ञानस्य तथता सानुत्तरा सम्यक्संबोधिः। या नामरूपस्य तथता
सानुत्तरा सम्यक्संबोधिः। या नामरूपतथता सानुत्तरा सम्यक्संबोधिः। या षडायतनतथता सानुत्तरा सम्यक्संबोधिः। या स्पर्शस्य तथता सानुत्तरा
सम्यक्संबोधिः। या स्पर्शस्य तथता सानुत्तरा सम्यक्संबोधिः। या वेदनायास्तथता सानुत्तरा सम्यक्संबोधिः। या तृष्णायास्तथता सानुत्तरा सम्यक्संबोधिः
। या उपादानस्य तथता सानुत्तरा सम्यक्संबोधिः। या भवस्य तथता सानुत्तरा सम्यक्संबोधिः। या जातेस्तथता सानुत्तरा सम्यक्संबोधिः। या जरामरण-



प्रथम

स्य तथता सानुत्तरासम्यक्संबोधिः॥ या दानपारमितायास्तथता सानुत्तरासम्यक्संबोधिः। या शीलपारमितायास्तथता सानुत्तरासम्यक्संबोधिः। या क्षान्ति
पारमितायास्तथता सानुत्तरासम्यक्संबोधिः या वीर्यपारमितायास्तथता सानुत्तरासम्यक्संबोधिः। या ध्यानपारमितायास्तथता सानुत्तरासम्यक्संबोधि
या प्रज्ञापारमितायास्तथता सानुत्तरासम्यक्संबोधिः। या अध्यात्मशून्यतायास्तथता सानुत्तरासम्यक्संबोधिः। या बहिर्धाशून्यतायास्तथता सानु
त्तरासम्यक्संबोधिः। या अध्यात्मबहिर्धाशून्यतायास्तथता सानुत्तरासम्यक्संबोधिः। या शून्यताशून्यतायास्तथता सानुत्तरासम्यक्संबोधिः। या महाशू
न्यतायास्तथता सानुत्तरासम्यक्संबोधिः। या परमार्थशून्यतायास्तथता सानुत्तरासम्यक्संबोधिः। या संस्कृतशून्यतायास्तथता सानुत्तरासम्यक्संबो
धिः। या असंस्कृतशून्यतायास्तथता सानुत्तरासम्यक्संबोधिः। या अत्यन्तशून्यतायास्तथता सानुत्तरासम्यक्संबोधिः। या अनवराग्रशून्यतायास्तथता·
सानुत्तरासम्यक्संबोधिः। या अनवकारशून्यतायास्तथता सानुत्तरासम्यक्संबोधिः। या प्रकृतिशून्यतायास्तथता सानुत्तरासम्यक्संबोधिः। या सर्व
धर्मशून्यतायास्तथता सानुत्तरासम्यक्संबोधिः। या स्वलक्षणशून्यतायास्तथता सानुत्तरासम्यक्संबोधिः। या अनुपलम्भशून्यतायास्तथता सा
नुत्तरासम्यक्संबोधिः। या अभावशून्यतायास्तथता सानुत्तरासम्यक्संबोधिः। या स्वभावशून्यतायास्तथता सानुत्तरासम्यक्संबोधिः। या अभावस्व
भावशून्यतायास्तथता सानुत्तरासम्यक्संबोधिः। या स्मृत्युपस्थानानां तथता सानुत्तरासम्यक्संबोधिः। या सम्यक्प्रहाणानां तथता सानुत्तरासम्
क्संबोधिः। या ऋद्धिपादानां तथता सानुत्तरासम्यक्संबोधिः। या इन्द्रियाणां तथता सानुत्तरासम्यक्संबोधिः। या बलानां तथता सानानुत्तरास
म्यक्संबोधिः। या बोध्यङ्गानां तथता सानुत्तरासम्यक्संबोधिः। या आर्याष्टाङ्गस्य मार्गस्य तथता सानुत्तरासम्यक्संबोधिः। या आर्यसत्यानां तथता·
सानुत्तरासम्यक्संबोधिः। या ध्यानानां तथता सानुत्तरासम्यक्संबोधिः। याऽप्रमाणानां तथता सानुत्तरासम्यक्संबोधिः। या आरूप्यसमापत्ति
थतायासानुत्तरासम्यक्संबोधिः। या विमोक्षमुखानां तथता सानुत्तरासम्यक्संबोधिः। या अनुपूर्वविहारसमापत्तीनां तथता सानुत्तरासम्यक्संबोधिः
या शून्यतानिमित्ताप्रणिहितविमोक्षमुखानां तथता सानुत्तरासम्यक्संबोधिः। याऽभिज्ञानां तथता सानुत्तरासम्यक्सम्यक्संबोधिः। या समाधीनां त
थता सानुत्तरासम्यक्संबोधिः। या धारणीमुखानां तथता सानुत्तरासम्यक्संबोधिः। या तथागतबलानां तथता सानुत्तरासम्यक्संबोधिः। या वैशार
द्यानां तथता सानुत्तरासंम्यक्संबोधिः। या प्रतिसंविदां तथता सानुत्तरासंम्यक्संबोधिः। या महामैत्र्यास्तथता सानुत्तरासम्यक्संबोधिः। या महाक

रुणायास्तथता सानुत्तरासम्यक्संबोधिः। या आवेणिकबुद्धधर्माणां तथता सानुत्तरासम्यक्संबोधिः। या सर्वज्ञतायास्तथता सानुत्तरासम्यक्संबोधिः। या मा
र्गाकारज्ञतायास्तथता सानुत्तरासम्यक्संबोधिः। या सर्वाकारज्ञतायास्तथता सानुत्तरासम्यक्संबोधिः। या निर्वाणस्य तथता सानुत्तरासम्यक्संबोधिः। सा नैव
वर्धते न परिहीयते। तत्सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायामविरहितोऽभीक्ष्णं विपुलं विहरति। न कस्यचिद्धर्मस्य वृद्धिं परिहाणिं वा समनुपश्य
ति। एवं खलु सुभूते नहि लपश्यार्थस्य नैव वृद्धिर्न परिहाणिः॥ एवं खलु सुभूते पुनः सुभूते दानपारमिताया नैव वृद्धिर्न परिहाणिः। शीलपारमिता
या नैव वृद्धिर्न परिहाणिर्वेदितव्या। क्षान्तिपारमिताया नैव वृद्धिर्न परिहाणिर्वेदितव्या। वीर्यपारमिताया नैव वृद्धिर्न परिहाणिर्वेदितव्या। ध्यानपा
रमिताया नैव वृद्धिर्न परिहाणिः। प्रज्ञापारमिताया नैव वृद्धिर्न परिहाणिः॥ अध्यात्मशून्यताया न परिहाणिः। बहिर्धाशून्यताया नैव वृद्धिर्न प
रिहाणिः। शून्यताशून्यताया न वृद्धिर्न परिहाणिः। महाशून्यताया नैव वृद्धिर्न परिहाणिः। परमार्थशून्यताया नैव वृद्धिर्न परिहाणिः। संस्कृतशून्य
ताया न परिहाणिः। असंस्कृतशून्यताया नैव वृद्धिर्न परिहाणिः। अत्यन्तशून्यताया न वृद्धिर्न परिहाणिः। अनवराग्रशून्यताया न वृद्धिर्न परिहाणिः
अनवकारशून्यतायास्तथता नैव वृद्धिर्न परिहाणिः। अभावशून्यतायास्तथताया नैव वृद्धिर्न परिहाणिः। स्मृत्युपस्थानानां नैव वृद्धिर्न परिहाणिः। सम्यक्प्र
हाणानां नैव वृद्धिर्न परिहाणिः। ऋद्धिपादानां नैव वृद्धिर्न परिहाणिः॥ अभावस्वभावशून्यताया नैव वृद्धिर्न परिहाणिः। स्मृत्युपस्थानानां नैव वृद्धिर्न प
रिहाणिः। इन्द्रियाणां नैव वृद्धिर्न परिहाणिः। बलानां नैव वृद्धिर्न परिहाणिः। बोध्यङ्गानां नैव वृद्धिर्न परिहाणिः। आर्याष्टाङ्गस्य मार्गस्य नैव वृद्धिर्न परि
हाणिः। आर्यसत्यानां नैव वृद्धिर्न परिहाणिः। ध्यानानां नैव वृद्धिर्न परिहाणिः। अप्रमाणानां नैव वृद्धिर्न परिहाणिः। आरूप्यसमापत्तीनां नैव वृद्धिर्न
परिहाणिः॥ विमोक्षाणां नैव वृद्धिर्न परिहाणिः। तथागतबलानां नैव वृद्धिर्न परिहाणिः। वैशारद्यानां नैव वृद्धिर्न परिहाणिः। प्रतिसंविदां नैव वृ
द्धिर्न परिहाणिः। महामैत्र्या नैव वृद्धिर्न परिहाणिः। महाकरुणाया नैव वृद्धिर्न परिहाणिः। आवेणिकबुद्धधर्माणां नैव वृद्धिर्न परिहाणिः॥ एवं खलु
पुनः सुभूते बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरितव्यमवृद्ध्यमपरिहाणियोगेन॥ आह। किं भगवं प्रथमचित्तोत्पादेनानुत्तरां
सम्यक्संबोधिमभिसंबुध्यते। तत्प्रथमचित्तोत्पादेन बोधिसत्त्वो महासत्त्वो नुत्तरां सम्यक्संबोधिमभिसंबुध्यते· उताहो पश्चिमेन चित्तोत्पादेनानु
त्तरां सम्यक्संबोधिमभिसंबुध्यते। तत्प्रथमचित्तोत्पादः पश्चिमेन चित्तोत्पादेनासमवहितः पश्चिमचित्तोत्पादः प्रथमचित्तोत्पादेनासमवहितः। ए
वमसमवहितानामेषां चित्तचैतसिकानां धर्माणां कथं कुशलमूलान्युपचयं गच्छन्ति न चानुपचितकुशलमूलैः शक्यमनुत्तरां सम्यक्संबोधिमभिसं



याउं॥ भगवानाह॥ तेन हि सुभूते उपमां करिष्यामि। यावदकस्ये वर्यस्वविह्नफपउपमयहेकस्याविज्ञपुरुषा भाषितस्यार्थमाजानन्ति। तत्किम्मन्यसे सुभूते
तैलप्रद्योतस्य ज्वलतो दीप्यमानाया वर्त्याः। प्रथमनिपातिनार्चिषा वर्त्तिर्दग्धा उताहो पश्चिमनिपातिनार्चिषा वर्त्तिर्दग्धा। आह। न भगवं प्रथमनिपातिनार्चि-
षा वर्त्तिर्दग्धा। न प्रथमनिपातमनागम्यार्चिषा वर्त्तिर्दग्धा। न भगवं पश्चिमनिपातिनार्चिषा वर्त्तिर्दग्धा। न पश्चिमनिपातमनागम्यार्चि-
षः वर्त्तिर्दग्धा। भगवानाह॥ तत्किम्मन्यसे सुभूते अपि नु सा वर्त्तिर्दग्धा। आह। दग्धा भगवन् दग्धा सुगत। भगवानाह। एवमेव सुभूते न प्रथमचित्तोत्पा-
देन बोधिसत्वो महासत्वोऽनुत्तरां सम्यक्संबोधिमभिसम्बुध्यते। न प्रथमचित्तोत्पादमनागम्य बोधिसत्वो महासत्वोऽनुत्तरां सम्यक्संबोधिमभिसम्बुध्य-
ते। न पश्चिमचित्तोत्पादेन बोधिसत्वो महासत्वोऽनुत्तरां सम्यक्संबोधिमभिसम्बुध्यते। अभिसम्बुध्यते च बोधिसत्वो महासत्वोऽनुत्तरां सम्यक्संबोधिं। अथ
हि सुभूते बोधिसत्वो महासत्वः प्रज्ञापारमितायां चरन् प्रथमचित्तोत्पादमुपादाय दशभूमिः परिपूर्यानुत्तरां सम्यक्संबोधिमभिसंबुध्यते॥ आह क-
तमा भगवन् दशभूमिः परिपूर्य बोधिसत्वो महासत्वोऽनुत्तरां सम्यक्संबोधिमभिसंबुध्यते। भगवानाह। शुक्लविदर्शनाभूमिं सुभूते परिपूर्य बोधिसत्वो
महासत्वोऽनुत्तरां सम्यक्संबोधिमभिसम्बुध्यते। गोत्रभूमिं परिपूर्य बोधिसत्वो महासत्वोऽनुत्तरां सम्यक्संबोधिमभिसम्बुध्यते। अष्टमकभूमिं परिपू-
र्य बोधिसत्वो महासत्वोऽनुत्तरां सम्यक्संबोधिमभिसंबुध्यते। दर्शनभूमिं परिपूर्य बोधिसत्वो महासत्वोऽनुत्तरां सम्यक्संबोधिमभिसंबुध्यते। तनुभूमिं परिपूर्य बो-
धिसत्वो महासत्वोऽनुत्तरां सम्यक्संबोधिमभिसम्बुध्यते। वीतरागभूमिं परिपूर्य बोधिसत्वो महासत्वोऽनुत्तरां सम्यक्संबोधिमभिसम्बुध्यते। न पश्चिम
चित्तोत्पादानुत्तरां सम्यक्संबोधिमभिसंबुध्यते। कृताविभूमिं परिपूर्य बोधिसत्वो महासत्वोऽनुत्तरां सम्यक्संबोधिमभिसंबुध्यते। बोधिसत्वभूमिम्प-
रिपूर्य बोधिसत्वो महासत्वोऽनुत्तरां सम्यक्संबोधिं। तथा बोधिसत्वो महासत्वो दशभूमिप्रतिक्रमात्। न प्रथमचित्तोत्पादेनानुत्तरां सम्यक्संबोधिमभि-
संबुध्यते। न प्रथमचित्तोत्पादमनागम्यानुत्तरां सम्यक्संबोधिमभिसंबुध्यते। न पश्चिमचित्तोत्पादानुत्तरां सम्यक्संबोधिमभिसम्बुध्यते। अभिस-
म्बुध्यते च बोधिसत्वोऽनुत्तरां सम्यक्संबोधिमभिसंबुध्यते। आह गम्भीरो भगवं प्रतीत्यसमुत्पादः॥ न च नाम भगवं प्रथमचित्तोत्पादेन बोधिसत्वो महासत्वो
ऽनुत्तरां सम्यक्संबोधिमभिसंबुध्यते। न च पश्चिमचित्तोत्पादमनागम्य बोधिसत्वो महासत्वोऽनुत्तरां सम्यक्संबोधिमभिसम्बुध्यते। अभिसम्बुध्यते च
भगवं बोधिसत्वो महासत्वो महासत्वोऽनुत्तरां सम्यक्संबोधिं। भगवानाह॥ तत्किम्मन्यसे सुभूते यच्चित्तं निरुद्धमपि नु तत्पुनरुत्पत्स्यते। आह

नो हीदं भगवं। भगवानाह॥ तत्किम्मन्यसे सुभूते यच्चित्तमुत्पन्नं तन्निरोधधर्म। आह। निरोधधर्म भगवं निरोधधर्म सुगत। भगवानाह। तत्किम्मन्यसे सुभूते
यन्निरोधधर्मं तन्निरोत्स्यते। आह। नो हीदं भगवं। भगवानाह। तत्किम्मन्यसे सुभूते तथैव स्थास्यति यथा तथता। आह। तथैव स्थास्यति यथा तथता। भगवाना-
ह। यदि सुभूते तथैव स्थास्यति यथा तथता। नाह। हेव कूटस्थं भविष्यति। आह। नो हीदं भगवं। भगवानाह॥ तत्किम्मन्यसे सुभूते गम्भीरा तथता। आह। ग-
म्भीरा भगवं तथता। भगवानाह। तत्किम्मन्यसे सुभूते तथैव चित्तं। आह। नो हीदं भगवं। भगवानाह। अन्यत्र तथतायाश्चित्तं। आह। नो हीदं भगवं। भगवानाह।
चित्तमन्यत्र तथता। आह। नो हीदं भगवं। भगवानाह। तथतायाश्चित्तं। आह। नो हीदं भगवं। भगवानाह। तत्किम्मन्यसे सुभूते अपि नु तथतां तथतायां सम-
नुपश्यति। आह। नो हीदं भगवं। भगवानाह। तत्किम्मन्यसे सुभूते य एवं चरति स गम्भीरायां प्रज्ञापारमितायां चरति। भगवानाह। तत्किम्मन्यसे सुभूते य एवं
चरति। स कुत्र चरति। आह। य भगवन्नेवं चरति स न क्वचिच्चरति। तत्कस्य हेतोः। तथा हि भगवं बोधिसत्वस्य महासत्वस्य प्रज्ञापारमितायां चरतः। असमु-
दाचारा न प्रवर्तन्ते समुदाचरन्ति। यथा च स्थितस्य तत्कस्य हेतोः। न हि भगवं तथता कश्चित्समुदाचरति। नापि तत्र कश्चित्समुदाचरति। भगवानाह।
यः सुभूते बोधिसत्वो महासत्वः प्रज्ञापारमितायां चरति। स कुत्र चरति। आह। स परमार्थे चरति। यत्र द्वयसमुदाचारा न समुदाचरन्ति। भगवानाह। तत्किम्मन्-
यसे सुभूते यः परमार्थेन चरति। स मुद्रा चरति। स निमित्ते चरति चरति। आह। नो हीदं भगवं। भगवानाह। तत्किम्मन्यसे सुभूते अपि नु ता निमि-
त्तसंज्ञा विभाविता भवति। आह। नो हीदं भगवं। भगवानाह। तत्किम्मन्यसे सुभूते बोधिसत्वेन महासत्वेन निमित्तसंज्ञा विभाविता विभाविता भवति। आह। न सु-
भगवं बोधिसत्वो महासत्वः प्रज्ञापारमितायां चरन्नेवं प्रज्ञा निमित्तं विभावयिष्यामि निमित्तं विभावयिष्यामि। इह पुनर्भगवं बोधिसत्वो महा-
सत्वः प्रज्ञापारमितायां चरन् नापरिपूर्णैर्दशभिस्तथागतबलैश्चतुर्भिर्वैशारद्यैश्चतसृभिः प्रतिसंविद्भिर्महामैत्र्या महाकरुणया अष्टादशभि-
रावेणिकैर्बुद्धधर्मैरनुत्तरां सम्यक्संबोधिमभिसम्बुध्यते। इदं पुनर्भगवं बोधिसत्वस्य महासत्वस्योपायकौशल्यं येनोपायकौशल्येन न क्षि-
प्रं भूतकोटिं साक्षात्करोति। तत्कस्य हेतोः। तथा हि भगवं बोधिसत्वेन महासत्वेन सर्वधर्माः स्वलक्षणशून्याः। अत्र च स्वलक्षणशून्यतायां स्थित्वा न स-
माधीन्समापद्यते। सत्वानां कृतशः समाधिभिः सत्वान्परिपाचयति। भगवानाह। इह सुभूते बोधिसत्वो महासत्वस्त्रिषु समाधिषु स्थित्वा ये
सत्वा विकल्पसंज्ञायां चरन्ति। तां शून्यतायां प्रतिष्ठापयति। ये सत्वा निमित्ते चरन्ति। तानानिमित्ते प्रतिष्ठापयति। ये सत्वाः प्रणिहिता चरन्ति। तान

प्रथम

प्रतिष्ठितानि यानयति ॥ एवं खलु सुभूते बोधिसत्वो महासत्वः प्रज्ञापारमितायां चरं त्रिषु समाधिषु स्थित्वा सत्वान् परिपाचयति ॥ आर्याष्टसाहस्रिकायां प्रज्ञापारमितायाः परिवर्त्तः षष्ठमः ॥ : ६ ॥ ॥०॥ अथायुष्मां शारद्वतीपुत्र आयुष्मं सुभूतिमेतदवोचत् । यश्चायुष्मं सुभूते बोधिसत्वो महासत्वः स्वप्नान्तरगतस्त्रीन्समाधीन्समापद्यते । शून्यतानिमित्ताप्रणिहितानपि नु स प्रज्ञापारमितायां विवर्धते । सुभूतिराह । यदायुष्मं शारद्वतीपुत्र दिवसतावन्याविवर्धते तत्स्वप्नान्तरगतापि विवर्धते । तत्कस्य हेतोः । अविकल्पा ह्यायुष्मं शारद्वतीपुत्र स्वप्नश्च दिवसश्च सचेदायुष्मं शारद्वतीपुत्र स्वप्नश्च दिवसश्च सचेदायुष्मं शारद्वतीपुत्र बोधिसत्वो महासत्वो यद्दिवसेन प्रज्ञापारमितायां चरति । तस्य प्रज्ञापारमिताभावनाभिरतत्वात्स्वप्नान्तरगतस्यापि बोधिसत्वस्य महाप्रज्ञापारमिताभावना भविष्यति । आह यत्पुनरायुष्मं सुभूते बोधिसत्वो महासत्वः स्वप्नान्तरगतः कर्म करोति । तत्किं तस्य कर्मणश्चयो वा उपचयो वा । यदि स्वप्नोपमाः सर्वधर्मा उक्ता भगवता किं नवास्य भविष्यत्यपि चयो वा उपचयो वा । तत्कस्य हेतोः । न हि स्वप्नकस्य चिद्धर्मस्य चयो वा उपचयो वा पलभ्यते । अथ विबुद्धो विकल्पयत एवं कुर्याच्चयो वा उपचयो वा । सुभूतिराह । यद्दिवसप्राणातिपातः कृतो पश्चात्स्वप्नान्तरे हतः समया सुहतः समयति विबुद्धो विकल्पयत्यायुष्मं शारद्वतीपुत्र किमाह । आह नायुष्मं सुभूते अनालम्बनं कर्मोत्पद्यते । नानालम्बना चेतना । सुभूतिराह । एवमेतदायुष्मं शारद्वतीपुत्र नानालम्बनं कर्मोत्पद्यते नानालम्बना चेतना सालम्बनमेव कर्मोत्पद्यते । नानालम्बनं सालम्बना चेतनोत्पद्यते नानालम्बने चेतनोत्पद्यते । नानालम्बनं दृष्टश्रुतमतविज्ञातेषु धर्मेषु बुद्धिः प्रवर्तते । नादृष्टश्रुतमतविज्ञातेषु धर्मेषु बुद्धिः प्रवर्तते । तत्र काचिद्बुद्धिः संक्लेशं परिजानाति । काचिद्बुद्धिर्व्यवदानं परिजानाति । तस्मादायुष्मं शारद्वतीपुत्र सालम्बनमेव कर्मोत्पद्यते । नानालम्बनं सालम्बने चेतना सालम्बनमेव कर्मोत्पद्यते ॥ नानालम्बनमाह । यस्मादायुष्मं सुभूते सर्वाणि कर्माणि सर्वचेतना विविक्ता उक्ता भगवता आह । तत्कथं सालम्बनमेव कर्मोत्पद्यते । नानालम्बनं सालम्बनं चेतना चोत्पद्यते । नानालम्बनं सुभूतिराह । निमित्तीकृत्यायुष्मं शारद्वतीपुत्र सालम्बनमेव कर्मोत्पद्यते । नानालम्बनं सालम्बनं चेतना चोत्पद्यते नानालम्बना ॥ आह यद्यायुष्मं सुभूते बोधिसत्वो महासत्वः स्वप्नान्तरगतमना दानं ददाति शीलं रक्षेत् । क्षान्त्या सम्पादयति । वीर्यमारभते । ध्यानानि समापद्यते । प्रज्ञां भावयंस्तत्कुशलमूलमनुत्तरायां सम्यक्संबोधौ परिणामयति परिणामितं भवत्युत्तरायां सम्यक्संबोधौ ॥ सुभूतिराह । अयमायुष्मं शारद्वतीपुत्र मैत्रेयो बोधिसत्वो महासत्वः सन्मुखीभूत एकजातिप्रतिबद्धो भगवता अवैवर्तिकतायामा

323

कृत अपरपृष्ट एव विसर्जयिष्यति । अथायुष्मां शारद्वतीपुत्रो बोधिसत्वो महासत्वमेतदवोचत् । अयं कुलपुत्र सुभूतिः स्थविर एवमाह । अयं मैत्रेयो बोधिसत्वो महासत्वः महासत्वः । ऽस्यादिसर्जयिष्य सुमाहात्रूपमपि विसर्जयिष्यति । उताहो या संज्ञा वेदना विसर्जयिष्यति । उताहो संज्ञा विसर्जयिष्यति । उताहो संस्कारा विसर्जयिष्यति । उताहो विज्ञानं विसर्जयिष्यति । उताहो रूपस्य शून्यता सा विसर्जयिष्यति । उताहो या वेदनायाः शून्यता सा विसर्जयिष्यति ॥ उताहो या संज्ञायाः शून्यता सा विसर्जयिष्यति । उताहो या संस्काराणां शून्यता सा विसर्जयिष्यति । उताहो या विज्ञानस्य शून्यता सा विसर्जयिष्यति । या रूपस्य तथता सा विसर्जयिष्यति । या वेदनायास्तथता सा विसर्जयिष्यति । या संज्ञायास्तथता सा विसर्जयिष्यति । या विज्ञानस्य तथता सा विसर्जयिष्यति । या संस्काराणां तथता सा विसर्जयिष्यति । या विज्ञानस्य तथता सा विसर्जयिष्यति ॥ या रूपस्य तथता सा विसर्जयिष्यति । किं रूपस्य शून्यता या वेदनायास्तथता सा विसर्जयिष्यति । या संज्ञायास्तथता सा विसर्जयिष्यति । या संस्काराणां तथता सा विसर्जयिष्यति । या विज्ञानस्य तथता सा विसर्जयिष्यति ॥ या रूपस्य शून्यता सा अप्रतिबला विसर्जयितुं । या वेदनायास्तथता सा अप्रतिबला विसर्जयितुं । ~~यावेद~~ या संज्ञायास्तथता सा अप्रतिबला विसर्जयितुं । या संस्काराणां तथता सा अप्रतिबला विसर्जयितुं ॥ नाहं तं धर्मं समनुपश्यामि यो विसर्जयेद्येन वा विसर्जयेत्तव्यं वा विसर्जयेद्यत्र वा विसर्जयेत् यमप्यहं धर्मं न समनुपश्यामि यो धर्मो व्याकृतोऽनुत्तरायां सम्यक्संबोधौ येन वा व्याकृतो यत्र वा व्याकृतः सर्वे ते धर्मा अद्वया अद्वैधीकाराः ॥ अथ शारद्वतीपुत्र आह । किं वितु न त्वयि ते धर्मा एवं साक्षात्कृता यथैतान्धर्मान्भाषसे मैत्रेय आह । न मयैते धर्मा एवं साक्षात्कृता यथैतान्धर्मान्भाषे मैत्रेय आह । न मयैते धर्मा एवं साक्षात्कृता यथैतान्धर्मान्भाषे ॥ अथायुष्मतः शारद्वतीपुत्रस्यैतदभूत् । गम्भीरप्रज्ञो बतायं मैत्रेयो बोधिसत्वो महासत्वो यथापि दीर्घरात्रं दनपारमितायां चरितस्य शीलपारमितायां चरितस्य । क्षान्तिपारमितायां चरितस्य । वीर्यपारमितायां चरितस्य । ध्यानपारमितायां चरितस्य प्रज्ञापारमितायां चरितस्यायं निदर्शनमनुपलम्भचरितत्वात् । अथ भगवानायुष्मन्तं शारद्वतीपुत्रमेतदवोचत् । तत्किं मन्यसे शारद्वतीपुत्र समनुपश्यसि त्वं तं धर्मं येन त्वं धर्मेणार्हन्निति प्रज्ञायसे । आह नो हीदं भगवन् । भगवानाह । एवमेव शारद्वतीपुत्र बोधिसत्वस्य महासत्वस्य । प्रज्ञापारमितायां चरतो नैवं भवत्ययं स धर्मो व्याकृतः । अयं सद्धर्मोऽनुत्तरां सम्यक्संबोधिमभिसम्बुध्यते । एवं चरं बोधिसत्वो महासत्वः प्रज्ञापारमि



प्रथग

तायां चरता नैव कस्यचिद्धर्मस्य समीकरिष्यति। अयं सद्धर्मो व्याहृतः। अयं सद्धर्मोऽनुत्तरां सम्यक्संबोधिमभिसंभोत्स्यते। एवं च तेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञा
पारमितायां चरता न कस्यचिद्विचिकित्सा स्यात् तद्यथा। नाहं नाभिसंभोत्स्ये अनुत्तरां सम्यक्संबोधिमभिसंभोत्स्ये वाहमनुत्तरां सम्यक्संबोधिम्॥ अथा
युष्मान् सुभूतिर्भगवन्तमेतदवोचत्। कथम्भगवन् बोधिसत्त्वो महासत्त्वः षट्पारमिताः परिपूरयति। सर्वाकारज्ञतायाश्चासन्नो भवति॥ एवमुक्ते भग
वानायुष्मन्तं सुभूतिमेतदवोचत्। इह सुभूते बोधिसत्त्वेन महासत्त्वेन दानपारमितायां चरता एवं बुद्धक्षेत्रं परिशोधयता बोधिसत्त्वो महासत्त्वः। दानपारमि
ताभिः घसितान् सत्त्वान् दृष्ट्वा पिपासितान् दृष्ट्वा प्रावृतान्। शयनासनग्लानप्रत्ययविहीनान् दृष्ट्वैवमुपपरीक्षितव्यं। तथा तथा दानपारमितायां चरिष्यामि। य
थाहमनुत्तरां सम्यक्संबोधिमभिसंबुध्य तस्मिन् बुद्धक्षेत्रे सत्त्वानामिमे दोषाः सर्वेण सर्वं न भविष्यन्ति न प्रज्ञास्यन्ते। यथा चातुर्महाराजकायिका
नां देवानां त्रायस्त्रिंशानां यामानां तुषितानां परनिर्मितवशवर्तीनामुपभोगपरिभोगा एवमेव तस्मिन् बुद्धक्षेत्रे सत्त्वानामुपभोगपरिभोगा
भविष्यन्ति। एवं च खलु सुभूते बोधिसत्त्वो महासत्त्वो दानपारमितां परिपूरयित्वा अनुत्तरायाः सम्यक्संबोधेरासन्नो भवति॥ पुनरपरं सुभूते
बोधिसत्त्वेन महासत्त्वेन शीलपारमितायां चरता। प्राणातिपातिकान् सत्त्वान् दृष्ट्वा दत्तादायिनः सत्त्वान् दृष्ट्वा काममिथ्याचारिणः सत्त्वान् दृष्ट्वा
मृषावादिनः सत्त्वान् दृष्ट्वा पैशुन्यकान् सत्त्वान् दृष्ट्वा पारुष्यकान् सत्त्वान् दृष्ट्वा संभिन्नप्रलापिनः सत्त्वान् दृष्ट्वा भंगप्रत्यङ्गहीनान् सत्त्वान् दृष्ट्वैवमुप
परी। लितवं रिध्यालूं। सत्त्वान् दृष्ट्वा व्यापन्नचित्तान् सत्त्वान् दृष्ट्वा मिथ्यादृष्टिकान् सत्त्वान् दृष्ट्वा अल्पायुष्कान् सत्त्वान् दृष्ट्वा बहुवधान् सत्त्वान् दृष्ट्वा
अल्पेशाख्यान् सत्त्वान् दृष्ट्वाऽल्पभोगान् सत्त्वान् दृष्ट्वा नीचकुलीनान् सत्त्वान् दृष्ट्वाऽङ्गप्रत्यङ्गहीनान् सत्त्वान् दृष्ट्वैवमुपपरीक्षितव्यं॥ तथा तथा शी
लपारमितायां चरिष्यामि। यथाहमनुत्तरां सम्यक्संबोधिमभिसंबुध्य तस्मिन् बुद्धक्षेत्रे सत्त्वानामिमे दोषाः सर्वेण सर्वं न भविष्यन्ति। न प्रज्ञास्य
न्ते। अपि तु सर्वसत्त्वा दशकुशलकर्मपथप्रतिष्ठिता भविष्यन्ति। एवं च खलु सुभूते बोधिसत्त्वो महासत्त्वः शीलपारमितां परिपूरयित्वाऽनुत्त
रायाः सम्यक्संबोधेरासन्नो भवति॥ पुनरपरं सुभूते बोधिसत्त्वेन महासत्त्वेन क्षान्तिपारमितायां चरता अन्योन्यं व्यापन्नचित्तान् सत्त्वान् दृष्ट्वा
लोष्टदण्डशस्त्रप्रहारानन्ददतो जीविताद्व्यपरोपयत एवमुपपरीक्षितव्यं। तथा तथा क्षान्तिपारमितायां चरिष्यामि यथाहमनुत्तरां सम्य
क्संबोधिमभिसंबुध्य तस्मिन् बुद्धक्षेत्रे सत्त्वानामिमे दोषाः सर्वेण सर्वं न भविष्यन्ति न प्रज्ञास्यन्ते। सर्वसत्त्वाश्च सर्वसत्त्वेषु मातृसमचित्ता भ

२१२

विष्यन्ति। पितृसमचित्ता भविष्यन्ति। भगिनीसमचित्ता भविष्यन्ति। मित्रचित्ता भविष्यन्ति। हितचित्ता भविष्यन्ति। एवं च खलु बोधिसत्त्वो महासत्त्वः क्षान्तिपार
मितां परिपूरयित्वा अनुत्तरायाः सम्यक्संबोधेरासन्नो भवति। पुनरपरं सुभूते बोधिसत्त्वेन महासत्त्वेन वीर्यपारमितायां चरता। हीनवीर्यान् सत्त्वान् दृष्ट्वा कु
सीदविहीनांस्त्रियानेभ्यः बुद्धयानाच्छ्रावकयानात्प्रत्येकबुद्धयानादेवमुपपरीक्षितव्यं। तथा तथा वीर्यपारमितायां चरिष्यामि। यथाहमनु
त्तरां सम्यक्संबोधिमभिसंबुध्य तस्मिन् बुद्धक्षेत्रे सत्त्वानामिमे दोषाः सर्वेण सर्वं न भविष्यन्ति। न प्रज्ञास्यन्ते सर्वसत्त्वाश्च दृढं वीर्यमालम्ब्य त्रिभिर्यानैः
परिनिर्वास्यन्ति। एवं च खलु सुभूते बोधिसत्त्वो महासत्त्वो वीर्यपारमितां परिपूर्यानुत्तरायाः सम्यक्संबोधेरासन्नो भवति॥ पुनरपरं सुभूते बोधि
सत्त्वेन महासत्त्वेन ध्यानपारमितायां चरता सत्त्वान् पञ्चभिर्नीवरणैर्निवृतान् दृष्ट्वा कृत्स्नयाविनिहितान् दृष्ट्वा कामच्छन्देन व्यापादच्छन्देन स्त्यानमि
द्धौद्धत्यकौकृत्येन विचिकित्सया प्रथमध्यानविनिहितान् दृष्ट्वा द्वितीयध्यानविनिहितान् दृष्ट्वा तृतीयध्यानविनिहितान् दृष्ट्वा चतुर्थध्यानविनिहितान् दृष्ट्वा मै
त्रीविनिहितान् दृष्ट्वा करुणाविनिहितान् दृष्ट्वा मुदिताविनिहितान् दृष्ट्वा उपेक्षाविनिहितान् दृष्ट्वा। आकाशानन्त्यायतनसमापत्तिविनिहितान् दृष्ट्वा वि
ज्ञानानन्त्यायतनसमापत्तिविनिहितान् दृष्ट्वा विज्ञानानन्त्यायतनसमापत्तिविनिहितान् दृष्ट्वा। आकिञ्चन्यायतनसमापत्तिविनिहितान् दृष्ट्वा नैवसंज्ञा
नासंज्ञायतनसमापत्तिविनिहितान् दृष्ट्वा एवमुपपरीक्षितव्यं तथा तथा ध्यानपारमितायां चरिष्यामि। बुद्धक्षेत्रं च परिशोधयिष्यामि। सत्त्वांश्च परिशो
धयिष्यामि। यथाहमनुत्तरां सम्यक्संबोधिमभिसंबुद्धस्य तत्र बुद्धक्षेत्रे सत्त्वानामिमे दोषा न भविष्यन्ति परिपूर्यानुत्तरायाः सम्यक्संबोधेरासन्नो भवति॥ पु
नरपरं सुभूते बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता दुष्प्रज्ञान् सत्त्वान् दृष्ट्वा लौकिकलोकोत्तरसम्यग्दृष्टिविनिहितान् क्रियावादानास्तिकवा
दानुच्छेदवादान् शाश्वतवादान् सत्त्वान् दृष्ट्वैवमुपपरीक्षितव्यं। तथा तथा प्रज्ञापारमितायां चरिष्यामि। बुद्धक्षेत्रं परिशोधयिष्यामि। सत्त्वांश्च परि
पाचयिष्यामि। यथाहमनुत्तरां सम्यक्संबोधिमभिसंबुद्धस्य तत्र बुद्धक्षेत्रे सत्त्वानामिमे दोषाः सर्वेण सर्वं न भविष्यन्ति। न प्रज्ञास्यन्ते। अपि तु सर्वस
त्त्वाः सर्वदृष्टिगतप्रहीणाः प्रज्ञापारमिताविनिहिता भविष्यन्ति। एवं च खलु सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितां परिपूर्यानुत्तरायाः सम्य
क्संबोधेरासन्नो भवति। पुनरपरं सुभूते बोधिसत्त्वेन महासत्त्वेन षट्पारमितासु चरता चरता। नैरयिकान् सत्त्वान् दृष्ट्वा सत्त्वांस्त्रिपुनाभि



२८२

पूवर्द्धमानां दृष्ट्वा नियतानियतमिथ्यात्वनियतानेवमुपपरीक्षितव्यं। तथा तथा षट्पा। रमितासु चरिष्यामि। बुद्धक्षेत्रं च परिशोधयिष्यामि। सत्वां
श्च परिपाचयिष्यामि। यथा मेऽनुत्तरां सम्यक्संबोधिमभिसम्बुद्धस्य तत्र बुद्धक्षेत्रे मिथ्यात्वनियता नाम शब्दोऽपि न भविष्यति। न प्रज्ञास्यते। एवं चरन्
सुभूते बोधिसत्वो महासत्वः षट्पारमिताः परिपूरयति सर्वाकारज्ञतायाश्चासन्नीभवति॥ पुनरपरं सुभूते बोधिसत्वेन महासत्वेन षट्पारमि
तासु चरता। नैरयिकान् सत्वान् दृष्ट्वा तिर्यग्योनिकान् यमलौकिकांसत्वां दृष्ट्वैवमुपपरीक्षितव्यं। तथा तथा षट्पारमितासु चरिष्यामि। बुद्धक्षेत्रञ्च
परिशोधयिष्यामि। सत्वांश्च परिपाचयिष्यामि। यथा मेऽनुत्तरां सम्यक्संबोधिमभिसम्बुद्धस्य तत्र बुद्धक्षेत्रे त्रयाणामपायानां नामशब्दोऽपि न भविष्यति।
न प्रज्ञास्यते। एवं चरन् सुभूते बोधिसत्वो महासत्वः षट्पारमिताः परिपूरयति। सर्वाकारज्ञतायाश्चासन्नीभवति॥ पुनरपरं सुभूते बोधिसत्वेन महासत्वे
न षट्पारमितासु चरता॥ इह महापृथिव्यां स्थाणुकण्टकगहनप्राग्भारप्रपातस्यन्दनिकागूथोडिगल्लानि दृष्ट्वैवमुपपरीक्षितव्यं। तथा तथा षट्
पारमितासु चरिष्यामि बुद्धक्षेत्रं च परिशोधयिष्यामि। सत्वांश्च परिपाचयिष्यामि। यथा मेऽनुत्तरां सम्यक्संबोधिमभिसम्बुद्धस्य। तत्र बुद्धक्षेत्रे
सत्वानामिमे दोषाः सर्वेण सर्वं न भविष्यति। न प्रज्ञास्यन्ते। तत्र मे बुद्धक्षेत्रं समं पाणितलजातमिव भविष्यति। एवं चरन् सुभूते बोधिसत्वो महासत्वः षट्
पारमिताः परिपूरयति। सर्वाकारज्ञतायाश्चासन्नीभवति। पुनरपरं सुभूते बोधिसत्वेन महासत्वेन षट्पारमितासु चरता। इमां महापृथिवीं मृ
न्मयीं दृष्ट्वा अपगतजातरूपरजतामेवमुपपरीक्षितव्यं। तथा तथा षट्पारमितासु चरिष्यामि। बुद्धक्षेत्रं च परिशोधयिष्यामि। सत्वांश्च परिपा
चयिष्यामि। यथा मेऽनुत्तरां सम्यक्संबोधिमभिसम्बुद्धस्य तत्र बुद्धक्षेत्रे॰ इयं महापृथिवी नीलवैडूर्यमयी स्वर्णवालुकासंस्तृता भविष्यति। ए
वं चरन् सुभूते बोधिसत्वो महासत्वः षट्पारमिताः परिपूरयति। सर्वाकारज्ञतायाश्चासन्नीभवति। पुनरपरं सुभूते बोधिसत्वेन महासत्वेन षट्
पारमितासु चरता सत्वां ममकारपरिग्रहवर्तमानानां दृष्ट्वैवमुपपरीक्षितव्यं। तथा तथा षट्पारमितासु चरिष्यामि। बुद्धक्षेत्रं च परिशोधयि
ष्यामि। सत्वांश्च परिपाचयिष्यामि। यथा मेऽनुत्तरां सम्यक्संबोधिमभिसंबुद्धस्य तत्र बुद्धक्षेत्रे सत्वानामिमे दोषा ममकारपरिग्रहो न भविष्यति।
न प्रज्ञास्यते। अपि तु सर्वसत्वा अममा अपरिग्रहा भविष्यन्ति। एवं चरन् सुभूते बोधिसत्वो महासत्वः षट्पारमिताः परिपूरयति। सर्वाकारज्ञता

याश्चासन्नीभवति॥ पुनरपरं सुभूते बोधिसत्वेन महासत्वेन षट्पारमितासु चरता चतुर्णां वर्णानां दृष्ट्वा क्षत्रियब्राह्मणवैश्यशूद्राणामेवमुपपरीक्षि
तव्यं। तथा तथा षट्पारमितासु चरिष्यामि। बुद्धक्षेत्रं च परिशोधयिष्यामि। सत्वांश्च परिपाचयिष्यामि। यथा मेऽनुत्तरां सम्यक्संबोधिमभिसम्बुद्ध
स्य तत्र बुद्धक्षेत्रे चतुर्वर्णा नाम शब्दोऽपि न भविष्यति न प्रज्ञास्यते। एवं चरन् सुभूते बोधिसत्वो महासत्वः षट्पारमिताः परिपूरयति सर्वाकार
ज्ञतायाश्चासन्नीभवति॥ पुनरपरं सुभूते बोधिसत्वेन महासत्वेन षट्पारमितासु चरता सत्वा हीनोत्कृष्टमध्यमान् दृष्ट्वा हीनकुलीनांश्च उच्चकु
लीनांश्च मध्यमकुलीनांश्च सत्वां दृष्ट्वैवमुपपरीक्षितव्यं। तथा तथा षट्पारमितासु चरिष्यामि। बुद्धक्षेत्रं च परिशोधयिष्यामि। सत्वांश्च परि
पाचयिष्यामि। यथा मेऽनुत्तरां सम्यक्संबोधिमभिसम्बुद्धस्य तत्र बुद्धक्षेत्रे सत्वानामिमे दोषा न भविष्यन्ति। न प्रज्ञास्यते। एवं चरन् सुभूते बोधिसत्वो
महासत्वः षट्पारमिताः परिपूरयति। सर्वाकारज्ञतायाश्चासन्नीभवति। पुनरपरं सुभूते बोधिसत्वेन महासत्वेन षट्पारमितासु चरता स
त्वानां वर्णानां नानात्वं दृ न भविष्यति। न प्रज्ञास्यते दृष्ट्वैवमुपपरीक्षितव्यं। तथा तथा षट्पारमितासु चरिष्यामि। बुद्धक्षेत्रं च परिशोधयिष्या
मि। सत्वांश्च परिपाचयिष्यामि। यथा मेऽनुत्तरां सम्यक्संबोधिमभिसम्बुद्धस्य तत्र बुद्धक्षेत्रे सत्वानां वर्णानां नानात्वं न भविष्यति। न प्रज्ञास्यते। अपि
तु सर्वसत्वा अभिरूपा भविष्यन्ति। प्रासादिका दर्शनीयाः परमशुभवर्णपुष्कलतया समन्वागताः। एवं चरन् सुभूते बोधिसत्वो महासत्वः षट्पार
मिताः परिपूरयति। सर्वाकारज्ञतायाश्चासन्नीभवति। पुनरपरं सुभूते बोधिसत्वेन महासत्वेन षट्पारमितासु चरता सत्वानामधिपतिं दृष्ट्वैव
मुपपरीक्षितव्यं। तथा तथा षट्पारमितासु चरिष्यामि। बुद्धक्षेत्रं च परिशोधयिष्यामि। सत्वांश्च परिपाचयिष्यामि। यथा मेऽनुत्तरां सम्य
क्संबोधिमभिसंबुद्धस्य तत्र बुद्धक्षेत्रे अधिपतिप्रज्ञप्तिरपि न भविष्यति। न प्रज्ञास्यते। अन्यत्र धर्मराजात्तथागतादर्हतः सम्यक्संबुद्धात्। एवं सुभू
ते बोधिसत्वो महासत्वः षट्पारमिताः परिपूरयति। सर्वाकारज्ञतायाश्चासन्नीभवति॥ पुनरपरं सुभूते बोधिसत्वेन महासत्वेन षट्पार
मितासु चरिष्यामि। बुद्धक्षेत्रं च परिशोधयिष्यामि। सत्वांश्च परिपाचयिष्यामि। यथा मेऽनुत्तरां सम्यक्संबोधिमभिसम्बुद्धस्य तत्र बुद्धक्षेत्रे स
त्वानां गतिसमुच्छेदं न भविष्यति। न प्रज्ञास्यते नरकं वा तिर्यग्योनिर्वा यमलोको वा देवा वा मनुष्या वा अन्यत्र सर्वसत्वा ऽकधर्मास्म भवि



प्रथम

यंति।चतुर्भिःस्मृत्युपस्थानेनविनहिताभविष्यंति।चतुर्भिःसम्यक्प्रहाणेनविनहिताभविष्यन्ति।चतुर्भिरृद्धिपादेनविनहिताभविष्यन्ति।पंचभिरिन्द्रि
येनविनहिताभविष्यन्ति।चतुर्भिःप्रमाणैःस्फवीध्यंदेनविनहिताभविष्यन्ति।चतुर्भिर्ध्यानेनविनहिताभविष्यंति।चतुर्भिरप्रमाणेनविनहि
ताभविष्यन्ति।चतुर्भिरारूप्यसमापत्तिभिविनहिताभविष्यन्ति।अष्टविमोक्षैनविनहिताभविष्यंति।नवानुपूर्वविहारसमापत्तिभिर्विन
हिताभविष्यंति।शून्यतानिमित्ताप्रणिहितविमोक्षमुखेनविनहिताभविष्यंति।चतसृभिःप्रतिसंविद्भिनविनहिताभविष्यन्ति।महामैत्र्याअविन
हिताभविष्यंति।महाकरुणयाअविनहिताभविष्यंति।अष्टादशभिरावेणिकबुद्धधर्मैर्नविनहिताभविष्यंति॥एवंचनसुभूतेबोधिसत्वोमहासत्वःष
ट्पारमिताःपरिपूरयति।सर्वाकारज्ञतायांआसन्नीभवति।पुनरपरंसुभूतेबोधिसत्वेनमहासत्वेनचतसृणांयोनीनांसत्वानांदृष्ट्वाअण्डजजरायुज
संस्वेदजौपपादुकानांएवमपपनीकितव्यं।तथातथाषट्पारमितासुचरिष्यामि।बुद्धक्षेत्रंचपरिशोधयिष्यामि।सत्वांश्चपरिपाचयिष्यामि।यथा
मेनुत्तरांसम्यक्संबोधिमभिसंबुद्धस्यतद्बुद्धक्षेत्रेतिर्यग्योनयानभविष्यन्ति।नप्रज्ञास्यन्ते।अण्डजजरायुजसंस्वेदजाअन्याश्चसर्वसत्वाऔपपा
दुकाभविष्यन्ति।एवंचनंसुभूतेबोधिसत्वोमहासत्वःषट्पारमिताःपरिपूरयति।सर्वाकारज्ञतायांआसन्नीभवति॥पुनरपरंसुभूतेबोधिस
त्वेनमहासत्वेनषट्पारमितासुचरता।सत्वांपंचगतिनरितिर्यग्विनिहितांदृष्ट्वाएवमुपपनीकितव्यं।तथातथाषट्पारमितासुचरिष्यामि।बुद्ध
क्षेत्रंचपरिशोधयिष्यामि।सत्वांश्चपरिपाचयिष्यामि।यथामेनुत्तरांसम्यक्संबोधिमभिसंबुद्धस्यतद्बुद्धक्षेत्रेसर्वसत्वाःपंचाभिज्ञाभविष्यन्ति।
एवंचनंसुभूतेबोधिसत्वोमहासत्वःषट्पारमिताःपरिपूरयतिसर्वाकारज्ञतायांआसन्नीभवति।पुनरपरंसुभूतेबोधिसत्वेनमहासत्वेनषट्
पारमितासुचरतासत्वानांमुखोनप्रजानांदृष्ट्वाएवमुपपनीकितव्यं।तथातथाषट्पारमितासुचरिष्यामि।बुद्धक्षेत्रंचपरिशोधयिष्यामि।सत्वांश्च
परिपाचयिष्यामि।यथामेनुत्तरांसम्यक्संबोधिमभिसम्बुद्धस्यतद्बुद्धक्षेत्रेसर्वसर्वसत्वाधर्मप्रीतिध्यानाहाराभविष्यन्ति।एवंचनंसुभूते
बोधिसत्वोमहासत्वःषट्पारमिताःपरिपूरयति।सर्वाकारज्ञतायांआसन्नीभवति।पुनरपरंसुभूतेबोधिसत्वेनमहासत्वेनषट्पारमिता
सुचरताप्रणाविनहितांसत्वांदृष्ट्वाएवमुपपनीकितव्यं।तथातथाषट्पारमितासुचरिष्यामि।बुद्धक्षेत्रंचपरिशोधयिष्यामि।सत्वांश्चपरिपा

२

चयिष्यामि।यथामेनुत्तरांसम्यक्संबोधिमभिसम्बुद्धस्यतद्बुद्धक्षेत्रेसर्वसत्वाःस्वयंप्रभाभविष्यन्ति।एवंचनंसुभूतेबोधिसत्वोमहासत्वःषट्पारमिताः
परिपूरयति।सर्वाकारज्ञतायांआसन्नीभवति।पुनरपरंसुभूतेबोधिसत्वेनमहासत्वेनषट्पारमितासुचरतासत्वानांदिवसरात्रिमासार्द्ध
मासर्तुसम्वत्सरांदृष्ट्वाएवमुपपनीकितव्यं।तथातथाषट्पारमितासुचरिष्यामि।बुद्धक्षेत्रंचपरिशोधयिष्यामि।सत्वांश्चपरिपाचयिष्या
मि।यथामेनुत्तरांसम्यक्संबोधिमभिसंबुद्धस्यतद्बुद्धक्षेत्रेसत्वानांदिवसरात्रिमासार्द्धमासर्तुसम्वत्सरनशब्दापिनभविष्यति।नप्रज्ञास्यते
एवंचनंसुभूतेबोधिसत्वोमहासत्वःषट्पारमिताःपरिपूरयति।सर्वाकारज्ञतायांआसन्नीभवति॥पुनरपरंसुभूतेबोधिसत्वेनमहासत्वेन
षट्पारमितासुचरतासत्वानाअयुर्विहीनांदृष्ट्वाएवमुपपनीकितव्यं।तथातथाषट्पारमितासुचरिष्यामि।बुद्धक्षेत्रंचपरिशोधयिष्यामि।स
त्वांश्चपरिपाचयिष्यामि।यथामेनुत्तरांसम्यक्संबोधिमभिसंबुद्धस्यतद्बुद्धक्षेत्रेसर्वसत्वाअपरिमितायुषाभविष्यन्ति।एवंचनंबोधिसत्वो
महासत्वःषट्पारमितापरिपूरयति।सर्वाकारज्ञतायांआसन्नीभवति।पुनरपरंसुभूतेबोधिसत्वेनमहासत्वेनषट्पारमितासुचरतासत्वांल
क्षणविनहितांदृष्ट्वाएवमुपपनीकर्तव्यं।तथातथाषट्पारमितासुचरिष्यामि।बुद्धक्षेत्रंचपरिशोधयिष्यामि।सत्वांश्चपरिपाचयिष्यामि।
यथामेनुत्तरांसम्यक्संबोधिमभिसम्बुद्धस्यतद्बुद्धक्षेत्रेद्वात्रिंशतामहापुरुषलक्षणैःसमन्वागताभविष्यन्ति।एवंचनंसुभूतेबोधिसत्वोमहा
सत्वःषट्पारमितापरिपूरयति।सर्वाकारज्ञतायांआसन्नीभवति।पुनरपरंसुभूतेबोधिसत्वेनमहासत्वेनषट्पारमितासुचरतासत्वां
कुशलमूलविनहितांदृष्ट्वाएवमुपपनीकर्तव्यं।तथातथाषट्पारमितासुचरिष्यामि।बुद्धक्षेत्रंचपरिशोधयिष्यामि।सत्वांश्चपरिपाचयिष्या
मि।यथामेनुत्तरांसम्यक्संबोधिमभिसंबुद्धस्यतद्बुद्धक्षेत्रेसर्वसत्वाकुशलमूलसमन्वागताभविष्यन्ति।येषकुशलमूलैःसमन्वागतांबुद्धा
न्भगवानःउपस्थास्यन्ति।एवंचनंसुभूतेबोधिसत्वोमहासत्वःषट्पारमिताःपरिपूरयति।सर्वाकारज्ञतायांआसन्नीभवति॥पुनरपरंसुभूते
बोधिसत्वेनमहासत्वेनषट्पारमितासुचरता।नागपक्षांसत्वांदृष्ट्वाएवमुपपनीकितव्यं।तथातथाषट्पारमितासुचरिष्यामि।बुद्धक्षेत्रंचप
रिशोधयिष्यामि।सत्वांश्चपरिपाचयिष्यामि।यथामेनुत्तरांसम्यक्संबोधिमभिसंबुद्धस्यतद्बुद्धक्षेत्रेसत्वानांचतुर्विधाव्याधयोनभविष्यंति।


0 cms.
5
10
15
20
25
30
35
40
0
5
10
15
20
25
30
5
10
15
20
25
10
5
0

प्र॰प॰

नजातवर्णिका।अनंतापर्यंतांलोकधातुंगत्वापुनरेवागत्यभगवंतं त्रिःप्रदक्षिणीकृत्यभगवतोमूर्द्धसत्वावकीर्यपास्था।अथायुष्मानानन्द
एकांसमुत्तरासंगंकृत्वादक्षिणंजानुमण्डलंपृथिव्यांप्रतिष्ठाप्ययेनभगवांस्तेनांजलिंप्रणम्यभगवंतमेतदवोचत्।कोभगवंहेतुःकःप्रत्ययः
स्मितस्यप्राविष्करणाय।नाहेतुनाप्रत्ययंतथागतार्हन्तःसम्यक्संबुद्धाःस्मितंप्राविष्कुर्वन्ति।भगवानाह।इयमानन्दस्त्रागर्भपैतिहृदयैदेवानामभ
गिन्यागतोध्वनिसुवर्णपुष्पोनामतथागतोर्हन्सम्यक्संबुद्धोलोकेभविष्यति।तारकोपमकल्पे।अयमानन्दस्याःस्त्रियायाःऽन्तिमःस्त्रीभावः।
इयमानन्दभगिनीभावंविवर्त्यपुरुषात्मभावंप्रतिलभ्याक्षोभ्यस्यतथागतस्यार्हतःसम्यक्संबुद्धस्यबुद्धक्षेत्रेउपपत्स्यते।अतिनत्वांलोकधा·
तौतत्रब्रह्मचर्यंचरिष्यति।।सखलुपुनरानंदबोधिसत्वस्महासत्वस्सुवर्णपुष्पइतिनामधेयंभविष्यति।सपुनरानन्दसुवर्णपुष्पोबोधि
सत्वोमहासत्वस्ततश्च्युतःसंबुद्धक्षेत्राद्बुद्धक्षेत्रंसंक्रमिष्यति।अविरहितश्चबुद्धैर्भगवद्भिर्भविष्यति।तद्यथापिनामानन्दराजाचक्रवर्तीप्रसा
दात्प्रासादंसंक्रामति।तथावज्जीवंपादतलाभ्यांभूमिंनाक्रामति।यावत्मरणकालं एवमेवानन्दसुवर्णपुष्पोबोधिसत्वोमहासत्वः।बुद्धक्षेत्रा २८८
द्बुद्धक्षेत्रंसंक्रमिष्यति।अविरहितोयावदनुत्तरांसम्यक्संबोधिमभिसंभोत्स्यते।।अथायुष्मानानन्दस्यैतदभूत्।यावन्तोबोधिसत्वामहा
सत्वास्तत्रबुद्धक्षेत्रेसन्निपतिताभविष्यन्ति।तथागतसन्निपाताःसवक्तव्याः॥अथभगवानायुष्मतानन्दस्यचेतसैवचित्तपरिवितर्कमाज्ञायायुष्मन्तमे
तदवोचत्।एवमेतदानन्दतथायथापरिवितर्कयसितथागतसन्निपाताःसवक्तव्याबोधिसत्वानांमहासत्वानांसुवर्णपुष्पस्यतथागतस्यार्ह
तःसम्यक्संबुद्धस्यबुद्धक्षेत्रेअप्रमाणश्चास्यतिक्षुसंघोभविष्यति।नशक्यंतस्यभिक्षुसंघस्यप्रमाणंकर्तुमिष्यन्ति।अनेकशतसहस्राणी
यन्तः।अनेककोटीशतानीयन्ति।अनेककोटीसहस्राणीयन्ति।अनेककोटीशतसहस्राणीयन्ति।अनेककोटीनियुतशतसहस्राणि
।अन्यत्रासंख्येयाप्रमेयाइति।अनेककोटीनियुतशतसहस्राणिभविष्यन्ति।सुवर्णपुष्पस्यखलुपुनरानन्दतथागतस्यार्हतःसम्यक्संबुद्ध
स्यानुत्तरांसम्यक्संबोधिमभिसम्बुद्धस्यतद्बुद्धक्षेत्रंइमेदोषाःसर्वेणसर्वेनभविष्यन्ति।नप्रज्ञास्यन्ते।इयमप्यप्रज्ञापारमितायांप

निकीर्णिकाः।आनन्दआह॥कानयाभगवन्भगिन्याकुशलमूलान्यवरोपितानि।यदनयाहितथागतोऽर्हन्सम्यक्संबुद्धपूजांकृत्वाऽवैवर्त्तिक
चित्तमुत्पादितं।भगवानाह।दीपंकरस्यानन्दतथागतस्यार्हतःसम्यक्संबुद्धस्यान्तिकेनयाभगिन्याकुशलमूलान्यवरोपितान्यनुत्तरायाःसम्
क्संबोधेश्चित्तमुत्पादितं।तत्कुशलमूलमनुत्तरायांसम्यक्संबोधौपरिणामितं।सचदीपंकरस्तथागतोर्हन्सम्यक्संबुद्धःसुवर्णपुष्पेनाव
कीर्णोनुत्तरांसम्यक्संबोधिंप्रार्थयमानेन।यदामयानन्ददीपंकरस्तथागतोर्हन्सम्यक्संबुद्धःपंचभिरुत्पलैरवकीर्णोनुत्तरांसम्यक्संबोधिंप्रा
र्थयमानेन।तदाहंतेनदीपंकरेणतथागतेनार्हतासम्यक्संबुद्धेनकुशलमूलसमन्वागतइतिविदित्वाव्याकृतोनुत्तरायांसम्यक्संबोधौ।तदनयाभ
गिन्यातथागतस्यार्हतःसम्यक्संबुद्धस्यान्तिकेप्रथमंचित्तमुत्पादितमनुत्तरायैसम्यक्संबोधये॥ ॥शतसाहस्र्याप्रज्ञापारमितायांगङ्ग
देवाभगिनीपरिवर्त्तो [illegible] ॥०॥अथायुष्मान्सुभूतिर्भगवन्तमेतदवोचत्।प्रज्ञापारमितायांक्रदेवाभगिन्याभगवं
श्चरताबोधिसत्वेनमहासत्वेनकथंशून्यतायांभगवंपरिचयःकर्त्तव्यः।कथंसम्यक्प्रहाणानिभावयितव्यानि।कथमार्याष्टांगोमार्गेपरिच
यःकर्त्तव्यःकथमार्याष्टांगोमार्गोभावयितव्यः।कथमार्यसत्येषुपरिचयःकर्त्तव्यःकथमार्यसत्यानिभावयितव्यानि।कथंध्यानेषुपरिचयः
कर्त्तव्यःकथंध्यानानिपरिभावयितव्यानि।कथमप्रमाणेषुपरिचयःकर्त्तव्यःकथमप्रमाणानिभावयितव्यानि।कथमारूप्यसमापत्तिषुपरि
चयःकर्त्तव्यःकथमारूप्यसमापत्तयोभावयितव्याः।कथंविमोक्षेषुपरिचयःकर्त्तव्यःकथंशून्यतानिमित्ताप्रणिहितविमोक्षमुखानिभाव
यितव्यानि।कथमभिज्ञासुपरिचयःकर्त्तव्यःकथमभिज्ञाभावयितव्याः।कथंसमाधिषुपरिचयःकर्त्तव्यःकथंसमाधयोभावयितव्याः।कथं
धारणीमुखानिभावयितव्यानि।कथंतथागतबलेषुपरिचयःकर्त्तव्यःकथंतथागतबलानिभावयितव्यानि।कथंवैशारद्येषुपरिचयःकर्त्त
व्यः।कथंवैशारद्यानिभावयितव्यानि।कथंप्रतिसंवित्सुपरिचयःकर्त्तव्यःकथंप्रतिसंविदोभावयितव्याः।कथंमहामैत्र्यांपरिचयःकर्त्तव्यः
कथंमहामैत्रीभावयितव्या।कथंमहाकरुणायांपरिचयःकर्त्तव्यःकथंमहाकरुणाभावयितव्या।कथमावेणिकबुद्धधर्मेषुपरिचयःकर्त्त
व्यःकथमावेणिकबुद्धधर्माभावयितव्याः॥भगवानाह।इहसुभूतेबोधिसत्वेनमहासत्वेनप्रज्ञापारमितायांचरता।रूपंशून्यमितिप्रत्यवेक्षि



प्रथम

तव्यं॥ चक्षुः शून्यमिति प्रत्यवेक्षितव्यं। श्रोत्रं शून्यमिति प्रत्यवेक्षितव्यं। घ्राणं शून्यमिति प्रत्यवेक्षितव्यं। जिह्वा शून्यमिति प्रत्यवेक्षितव्यं। कायः शून्य इति प्र
त्यवेक्षितव्यः। मनः शून्य इति प्रत्यवेक्षितव्यं॥ रूपं शून्य इति प्रत्यवेक्षितव्यं। शब्दः शून्य इति प्रत्यवेक्षितव्यः। गन्धः शून्य इति प्रत्यवेक्षितव्यः। र
सः शून्य इति प्रत्यवेक्षितव्यो। रसः शून्य इति प्रत्यवेक्षितव्यः। स्पर्शः शून्य इति प्रत्यवेक्षितव्यो। धर्मः शून्य इति प्रत्यवेक्षितव्यः॥ चक्षुर्विज्ञानं
शून्यमिति प्रत्यवेक्षितव्यं। श्रोत्रविज्ञानं शून्यमिति प्रत्यवेक्षितव्यं। घ्राणविज्ञानं शून्यमिति प्रत्यवेक्षितव्यं। जिह्वाविज्ञानं शून्यमिति प्रत्यवेक्षित
व्यं। कायविज्ञानं शून्यमिति प्रत्यवेक्षितव्यं। मनोविज्ञानं शून्यमिति प्रत्यवेक्षितव्यं॥ चक्षुःसंस्पर्शः शून्य इति प्रत्यवेक्षितव्यः। श्रोत्रसंस्पर्शः शू
न्य इति प्रत्यवेक्षितव्यः। घ्राणसंस्पर्शः शून्य इति प्रत्यवेक्षितव्यः। जिह्वासंस्पर्शः शून्य इति प्रत्यवेक्षितव्यः। कायसंस्पर्शः शून्य इति प्रत्यवे
क्षितव्यः। मनःसंस्पर्शः शून्य इति प्रत्यवेक्षितव्यः। चक्षुःसंस्पर्श। प्रत्ययवेदना शून्येति प्रत्यवेक्षितव्याः। श्रोत्रसंस्पर्शप्रत्ययवेदनेति प्रत्यवेक्षि
तव्याः। मनःसंस्पर्शप्रत्ययवेदना शून्येति प्रत्यवेक्षितव्याः। पृथिवीधातुः शून्य इति प्रत्यवेक्षितव्याः। अब्धातुः शून्य इति प्रत्यवेक्षितव्याः। ते
जोधातुः शून्य इति प्रत्यवेक्षितव्याः। वायुधातुः शून्य इति प्रत्यवेक्षितव्याः। आकाशधातुः शून्य इति प्रत्यवेक्षितव्याः। विज्ञानधातुः शून्य इति
प्रत्यवेक्षितव्याः। अविद्या शून्य इति प्रत्यवेक्षितव्यः। संस्काराः शून्य इति प्रत्यवेक्षितव्याः। विज्ञानं शून्य इति प्रत्यवेक्षितव्यं। नामरूपं शू
न्य इति प्रत्यवेक्षितव्याः। षडायतनं शून्य इति प्रत्यवेक्षितव्यं। स्पर्शः शून्य इति प्रत्यवेक्षितव्यो। वेदना शून्येति प्रत्यवेक्षितव्याः। तृष्णा शू
न्येति प्रत्यवेक्षितव्याः। तृष्णा शून्येति प्रत्यवेक्षितव्याः॥ उपादानं शून्यमिति प्रत्यवेक्षितव्यं। भवः शून्य इति प्रत्यवेक्षितव्यः। जातिः शून्येति प्र
त्यवेक्षितव्याः। जरामरणं शून्येति वेक्षितव्यं। दानपारमिता शून्येति प्रत्यवेक्षितव्याः। शीलपारमिता शून्येति प्रत्यवेक्षितव्याः। क्षान्तिपा
रमिता शून्येति प्रत्यवेक्षितव्या। वीर्यपारमिता शून्येति प्रत्यवेक्षितव्या। ध्यानपारमिता शून्येति प्रत्यवेक्षितव्या। प्रज्ञापारमिता शून्येति
प्रत्यवेक्षितव्या। अध्यात्मशून्यता शून्येति प्रत्यवेक्षितव्या। बहिर्धाशून्यता शून्येति प्रत्यवेक्षितव्या। अध्यात्मबहिर्धाशून्यता शून्येति प्रत्य
वेक्षितव्या। अध्यात्मबहिर्धाशून्यता शून्येति प्रत्यवेक्षितव्या। शून्यताशून्यता शून्येति प्रत्यवेक्षितव्या। महाशून्यता शून्येति प्रत्यवेक्षितव्या।

परमार्थशून्यता शून्येति प्रत्यवेक्षितव्याः। संस्कृतशून्यता शून्येति प्रत्यवेक्षितव्या। असंस्कृतशून्यता शून्येति प्रत्यवेक्षितव्या। अत्यन्तशून्यता शू
न्या शून्येति प्रत्यवेक्षितव्या। अनवराग्रशून्यता शून्येति प्रत्यवेक्षितव्याः। अनवकारशून्यता शून्यता शून्येति प्रत्यवेक्षितव्या। प्रकृतिशून्य
ता शून्येति प्रत्यवेक्षितव्या। सर्वधर्मशून्यता शून्यता शून्येति प्रत्यवेक्षितव्या। स्वलक्षणशून्यता शून्येति प्रत्यवेक्षितव्या। अनुपलम्भ
शून्यता शून्येति प्रत्यवेक्षितव्या। अभावशून्यता शून्येति प्रत्यवेक्षितव्या। स्वभावशून्यता शून्येति प्रत्यवेक्षितव्या। अभावस्वभावशून्यता शू
न्यता शून्येति प्रत्यवेक्षितव्या। स्मृत्युपस्थानानि शून्यानीति प्रत्यवेक्षितव्यानि। सम्यक्प्रहाणानि शून्यानीति प्रत्यवेक्षितव्यानि। ऋद्धिपा
दाः शून्या इति प्रत्यवेक्षितव्या। इन्द्रियाणि शून्यानीति प्रत्यवेक्षितव्यानि। बलानि शून्यानीति प्रत्यवेक्षितव्यानि। बोध्यङ्गानि शून्यानी
ति प्रत्यवेक्षितव्यानि। आर्याष्टाङ्गमार्गः शून्य इति प्रत्यवेक्षितव्यः। आर्यसत्यानि शून्यानीति प्रत्यवेक्षितव्यानि। अप्रमाणानि शून्यानी
ति प्रत्यवेक्षितव्यानि। [illegible] शून्यानीति प्रत्यवेक्षितव्यानि। प्रतिसंविदः शून्या इति प्रत्यवेक्षितव्याः॥ महामैत्री शून्येति प्रत्य
वेक्षितव्याः। महाकरुणा शून्येति प्रत्यवेक्षितव्या। आवेणिकबुद्धधर्माः शून्या इति प्रत्यवेक्षितव्या। नामधातुः शून्य इति प्रत्यवेक्षि
तव्याः। रूपधातुः शून्य इति प्रत्यवेक्षितव्यः। आरूप्यधातुः शून्य इति प्रत्यवेक्षितव्यः। तथा प्रत्यवेक्षितव्यम्। यथा प्रत्यवेक्षमाणं चि
त्तं निर्विक्षिप्यते। अविक्षिप्तचित्तः स धर्मं न समनुपश्यति। स धर्मं च समनुपश्यन्न साक्षात्करोति। तत्कस्य हेतोः। तथा हि स बोधिस
त्त्वो महासत्त्वः स्वलक्षणशून्येषु सर्वधर्मेषु शिक्षितव्यः। स न कस्यचिद्धर्मस्य व्यवच्छेदं करोति। यावत्साक्षात्कुर्याद्यं वा साक्षात्कुर्यात्। सर्वा
तां धर्मान्न समनुपश्यति। सुभूतिराह। यद्भगवानेवमाह न बोधिसत्त्वो महासत्त्वेन शून्याः धर्माः साक्षात्कर्तव्या इति तत्कथं भगवन् बोधिस
त्त्वो महासत्त्वः शून्यतायां स्थितः। शून्यतां साक्षात्करोति। भगवानाह। यत्सुभूते बोधिसत्त्वो महासत्त्वः सर्वाकारवरोपेतां शून्यतां शून्य
प्रत्यवेक्षते। न साक्षात्करोति। न साक्षात्करोमीति। न साक्षात्करिष्यामीति प्रत्यवेक्षते। न साक्षात्कर्तव्यमिति प्रत्यवेक्षते। परिचयं करि
ष्यामीति प्रत्यवेक्षते। न साक्षात्कर्तव्यमिति प्रत्यवेक्षते। परिचयस्यायं कालो नायं कालः साक्षात्क्रियाया इति प्रत्यवेक्षते। असमाहि

[illegible]

तेनेव बोधिसत्वो महासत्वः। आनन्तर्ये विहरन् उपनिवध्नाति। अत्रान्तरे च बोधिसत्वो महासत्वो न च परिहीयते। बोधिसत्वधर्मोपान्नत्वान्न
वक्षयं साक्षात्करोति। तत्कस्य हेतोः। एवमुदारज्ञानसमन्वागतो बोधिसत्वो महासत्वो एव यदि बोधिपक्षेषु धर्मेषु स्थित्वा एवं विज्ञानो
ति उपनिवयस्यायं कालो नायं कालः साक्षात्करोति। तत्कस्य हेतोः। क्रियायां न खलु पुनः सुभूते बोधिसत्वेन महासत्वेन प्रज्ञापारमि
तायां चरितो एवं प्रत्यवेक्षितं। दानपारमितायां अयं कालः शीलपारमितायां अयं कालः क्षान्तिपारमितायां अयं कालः वीर्यपारमिता
यां अयं कालः। ध्यानपारमितायां अयं कालः प्रज्ञापारमितायां अयं कालः। स्मृत्युपस्थानभावनायां अयं कालः। सम्यक्प्रहाणभावना
यां अयं कालः। ऋद्धिपादभावनायां अयं कालः। इन्द्रियभावनायां अयं कालः बलभावनायां अयं कालः। बोध्यङ्गभावनायां अयं कालः।
आर्याष्टाङ्गमार्गभावनायां अयं कालः। आर्यसत्यभावनायां अयं कालः। ध्यानभावनायां अयं कालः। अप्रमाणभावनायां अयं कालः। आ
रूप्यसमापत्तिभावनायां अयं कालः। विमोक्षभावनायां अयं कालः। अनुपूर्वविहारसमापत्तिभावनायां अयं कालः। शून्यतानिमित्ता
प्रणिहितविमोक्षमुखभावनायां अयं कालः। अभिज्ञाप्रतिलम्भायायं कालः। समाधीनां प्रतिलम्भायायं कालः। धारणीमुखानां प्र
तिलम्भायायं कालः। दशानां तथागतबलानां प्रतिलम्भायायं कालः। चतुर्णां वैशारद्यानां प्रतिलम्भायायं कालः। चतसृणां प्रतिसंविदां
प्रतिलम्भायायं कालः। अष्टादशावेणिकाबुद्धधर्माणां प्रतिलम्भायायं कालः। महामैत्र्याः प्रतिलम्भायायं कालः। महाकरुणायाः प्र
तिलम्भायायं कालः। स्रोतआपत्तिफलसाक्षात्क्रियायां नायं कालः। सकृदागामिफलसाक्षात्क्रियायां नायं कालः। सकृदागामिफल
साक्षात्क्रियायां नायं कालः। अनागामिफलसाक्षात्क्रियायां नायं कालः। अर्हत्वसाक्षात्क्रियायां नायं कालः। प्रत्येकबुद्धज्ञानसाक्षा
त्क्रियायां नायं कालः। सर्वाकारज्ञतायाः प्रतिलम्भाय वा यतिपनिर्वाणस्यायं कालः॥ एवं खलु सुभूते बोधिसत्वो महासत्वः प्रज्ञापारमि
तायां चरन् शून्यतायां परिचयं करोति। शून्यतायां च विहरति। आनिमित्ते च विहरति। अप्रणिहिते च परिचयं करोति। स्मृत्युपस्था
नानि च भावयति। सम्यक्प्रहाणेषु च विहरति। बोध्यङ्गानि भावयति। बोध्यङ्गेषु च विहरति। आर्याष्टाङ्गमार्गं च भावयति। न च साक्षात्करो
न व

२१८

ति। एवं खलु सुभूते बोधिसत्वो महासत्वो बोधिपक्षेषु धर्मेषु परिचयं करोति। बोधिपक्षांश्च धर्मान् भावयति बोधिपक्षेषु च धर्मेषु विहरति। न च स्रोत
आपत्तिफलं साक्षात्करोति। न च सकृदागामिफलं साक्षात्करोति। नानागामिफलं साक्षात्करोति। नार्हत्वं साक्षात्करोति। न प्रत्येकबोधिं सा
क्षात्करोति। तद्यथापि नाम सुभूते कश्चिदेव पुरुषः शूरश्च भवेद्वीरश्च भवेद् दृढप्रतिष्ठानं शूरश्च भवेत् अभिरूपश्च भवेत् प्रासादिकश्च भवे
द् दर्शनीयश्च भवेत् परमशुभवर्णपुष्कलतया समन्वागतश्चतुःषष्टिकलाज्ञानपरमगतिं गतश्च भवेद् दृढप्रहरणसंगृहीतश्च भवेत् सर्वत्र च कुशलो
नेन च भवेत् स्वाभिरूपश्च भवेत् प्रासादिकश्च भवेद् दर्शनीयश्च भवेत् परमशुभवर्णपुष्कलतया समन्वागतश्च भवेत् शिल्पस्थानेषु परिनिष्ठाग
तश्च भवेत् सर्वेषु च शिल्पस्थानेषु गतिंगतश्च भवेत् बहुजनस्य च प्रियश्च भवेन्मनापश्च सर्वजनस्य [illegible] विक्रियामाणश्च। सर्वत्र महालाभं
समन्वागतो भवेत्। स येन येन कार्येणोत्तिष्ठेत् तत्कुर्यात् गुरुकुर्यात् मानयेत् सत्कृत्य स्यामाद्या आत्तमना एवं समुदितप्रीतिसौमनस्यजाताः समातापि
तरौ पुत्रदारं च गृहीत्वा केनचिदेव करणीयेनाटवीकान्तारं विप्रलवेद्। भवेत् स तेन सत्कुर्यात् गुरुकुर्यात् मानयेत् पूजयेत् सत्कृत्य स्यामाद्य
स्यात्तमना एवं समुदितप्रीतिसौमनस्यजाताः समातापितरौ पुत्रदारं च गृहीत्वा केनचिदेव करणीयेनाटवीकान्तारं विप्रलवेद् प्र
नां तीशलपांसं लोहमयाधकं तत्र स पुरुषः प्रविशेत् मातापितरौ पुत्रदारं वा एवं तथननिमन्त्रय आत्मतो एमातेष्ठाहं ययानिवारयेत्
नवादटवीकान्तारो भूमद वलोपविशिष्यति। भीषयव पनिमाचयिष्यति। तस्य च पुरुषस्य तत्राटवीकान्तारे बहवो वधकाः प्रत्यमित्राः
पर्युपस्थिता भवेयुः स च पुरुषः परमेण प्रज्ञाबलेन समन्वागतो भवेत्। समो मातापितरौ पुत्रदारं च तादटवीकान्तारं निष्क्रम्य स्वस्ति
भिमाः प्रत्यमित्रा अपनेनैव ग्रामं वा नगरं वा निगमं वा जनपदप्रवेशं वा। तत्र प्रीतिसौमनस्यजाता एवं दक्षाः तोऽनपहता न चास्यांस
तानामकिंचिद् दुर्विज्ञानां प्रत्यमित्राणामकिंचनः प्रदायय। तत्कस्य हेतोः। तथा हि स पुरुषः कृतयोग्यः सर्वबलासमन्वागतः प्राप्तटवीकान्ता
नेव हतानाश्च दृढप्रहरणतानाश्च तां प्रत्यर्थिकानां उदानानाः प्रत्यर्थिका निर्मिता एव यस्य प्रत्यर्थिकास्ते न च येन सर्वत अपगता एव
पुत्राश्च स पुरुषस्तौ मातापितरौ तत्र पुत्रदारं स्वस्तिना परिमोच्य स्वस्वचिहरन्ति। एवमेव सुभूते यस्मिंसमये बोधिसत्वो महासत्वः सर्व


0 cms.
5
10
15
20
25
30
35
40

प्र॰भ॰·

सत्वा मैत्र्यान्न स्थानेन विहरन् करुणान्न स्थानेन विहरन् उपेक्षान्न स्थानेन विहरन्न् निल्वात्सर्वाकारज्ञतायां विहरन्नु एवं बोधिसत्वो महास
त्वश्चतुर्षु प्रमाणेषु स्थित्वा ध्यानमिताः परिपूरयति । परिपूर्याप्रणिधार्य्यथ यं सर्वाकारज्ञतायां परिणमति । शून्यतानिमित्ताप्रणिहितेषु वि
मोक्षमुखेषु स्थित्वा सर्वाकारज्ञतायां परिचयं करोति । तत्राकेन बोधिसत्वो महासत्वेन चानिमित्तेन व्यवहरति । न चानिमित्तं समाधिं साक्षा
त्करोति । यया सा साक्षात्क्रियया श्रावकभूमौ वा प्रत्येकबुद्धभूमौ वा तिष्ठेत । तद्यथापि नाम सुभूते पक्षी शकुनिराकाशे विचरति न चास्य भूमौ पतति
आकाशे शकुनिश्च विहरति । न चाकाशे तिष्ठति । एवमेव सुभूते बोधिसत्वो महासत्वः शून्यतायां च परिचयं करोति । शून्यतायां च विहर
ति । आनिमित्ते वाप्रणिहिते च परिचयं करोति । अनिमित्ते वाप्रणिहिते च विहरति । न च शून्यताम्
अप्रणिहितं वा साक्षात्करोति । यया सा साक्षात्क्रियया श्रावकभूमौ वा प्रत्येकबुद्धभूमौ वा पतेद् अपरिपूर्णेषु दशसु तथागतबलेषु चतुर्षु वैशार
द्येष्वष्टासु प्रतिसंविद्भिर्महामैत्र्यां महाकरुणया दशाष्टादशावेणिकेषु बुद्धधर्मेषु । अपरिपूर्णेषु बुद्धधर्मेषु चरित्वा सर्वाकारज्ञताम
नुप्राप्नोति ॥ तद्यथापि नाम सुभूते पुरुषो बलवानिष्वस्त्राचार्य्य एवं दिशम्मुष्टिकायां सुशिक्षितः स काण्डमूर्द्धं क्षिपेत् तस्य काण्डका
स काण्डमूर्द्धं क्षिपेत् स्वात्तदन्यैः काण्डैस्तस्य पौर्विकस्य काण्डस्य पतनं यथा पृथिव्यां पतितं न दद्यात् तावत्काण्डं पृथिव्यां न पातयेत् तस्य पुरुष
श्चाकांक्षेत् तावत्काण्डं पृथिव्यां पततु स पश्चिमकाण्डमूर्द्धं न क्षिपेद्वं सा काण्डं पतनं पृथिव्यां पातयेत । एवमेव सुभूते बोधिसत्वो म
हासत्वः प्रज्ञापारमितायां चरन्नुपायकौशल्येन परिगृहीतः तावन्न परमां भूतकोटिं साक्षात्करोति । यावन्न तानि कुशलमूलानि परि
पक्वानि भवन्त्यनुत्तरायां सम्यक्संबोधये । यदा तानि कुशलमूलानि परिपक्वानि भवन्त्यनुत्तरायां सम्यक्संबोधये तदा तां परमां भूतकोटिं
साक्षात्करोति । तस्मात्तर्हि सुभूते बोधिसत्वेन महासत्वेन प्रज्ञापारमितायां चरता एवमेषां धर्माणां धर्मता उपपरीक्षितव्या । आह । इय
न कारणं भगवन् बोधिसत्वो महासत्वो दुष्करकारको य इह धर्मतायां शिक्षते सर्वधर्मशून्यतायां शिक्षते । स्वलक्षणशून्यतायां शिक्षते । त्रि
भिर्विमोक्षमुखैः शिक्षते । न चान्तरा व्यसनमापद्यते अनुत्तरायाः सम्यक्संबोधेः । आश्चर्यं भगवन् परमाश्चर्यं सुगत । भगवानाह । तथा

हि सुभूते बोधिसत्वस्य महासत्वस्य महासत्वस्य सर्वसत्वा अपरित्यक्ताः यस्य सुभूते सर्वसत्वा अपरित्यक्ता भवन्ति स एवंरूपः प्रणिधानविशेषो भवति । यः
सुभूते बोधिसत्वो महासत्व एवं चित्तमभिनिर्हरति । सर्वसत्वा मया अपरित्यक्ता मयैते परिमोचयितव्या असत्सु धर्मेषु वर्तमाना यदा शून्यतासमा
धिविमोक्षमुखमभिनिर्हरति । अनिमित्तसमाधिविमोक्षमुखमभिनिर्हरति । अप्रणिहितविमोक्षमुखमभिनिर्हरति । उपायकौशल्यसमन्वागतो
बोधिसत्वो महासत्वः स न वेदितव्यः । न चान्तरा भूतकोटिं साक्षात्करोति । यावन्न सर्वाकारज्ञतामनुप्राप्नोति । पुनरपरं सुभूते बो
धिसत्वो महासत्वो यदा तानि गम्भीराणि स्थानानि प्रत्यवेक्षितुकामो भवति । यदुत अध्यात्मशून्यतां बहिर्धाशून्यताम् अध्यात्मबहिर्धाशून्यतां शून्यता
शून्यतां महाशून्यतां परमार्थशून्यतां संस्कृतशून्यताम् असंस्कृतशून्यताम् अनवराग्रशून्यताम् अनवकारशून्यतां प्रकृतिशून्यतां । सर्वधर्मशून्य
तां स्वलक्षणशून्यताम् अनुपलम्भशून्यताम् अभावशून्यतां स्वभावशून्यताम् अभावस्वभावशून्यतां ॥ चत्वारि स्मृत्युपस्थानानि । चत्वारि सम्यक्प्रहाणा
नि । चत्वार ऋद्धिपादाः पञ्चेन्द्रियाणि । पञ्च बलानि । सप्त बोध्यङ्गानि । आर्याष्टाङ्गमार्गं । त्रीणि विमोक्षमुखानि । नैव चित्तमभिनिर्हरन्त्यस्मा
दीर्घरात्रम् इमे सत्वा आत्मसंज्ञायां सत्वसंज्ञाया । जीवसंज्ञाया । जन्तुसंज्ञाया । पोषसंज्ञाया पुरुषसंज्ञाया । पुद्गलसंज्ञाया । मनुजसंज्ञाया मान
वसंज्ञाया । कारकसंज्ञाया वेदकसंज्ञाया ॥ वेदयितृसंज्ञाया उपलब्धात्मसंज्ञाया सत्वसंज्ञाया । जीवसंज्ञाया । चरन्ति ॥ तेषाम् दृष्टिप्रहाणाय
तृष्णां सम्यक्बोधिमभिसंबुद्ध धर्मं देशयिष्यामि । शून्यतानिमित्ताप्रणिहितसमाधिविमोक्षमुखानि तस्मिन् समये बोधिसत्वो महासत्वः समाप
द्यते न च भूतकोटिं साक्षात्करोति । यस्याः साक्षात्क्रियया स्रोतआपत्तिफलमनुप्राप्नुयात् सकृदागामिफलमनुप्राप्नुयाद् अनागामिफलमनुप्राप्नु
यात् प्रत्येकबोधिमनुप्राप्नुयाद् एवं सुभूते बोधिसत्वो महासत्वो महासत्वः न च विहायते समाधिचित्तोत्पादेन उभयकुशलमूलेन च नोपायकौश
ल्येन समन्वागतो न चान्तरा भूतकोटिं साक्षात्करोति न च परिहीयते प्रज्ञापारमितायां न च परिहीयते ॥ दानपारमितायां न च परिहीयते ।
शीलपारमितायां न च परिहीयते । क्षान्तिपारमितायां न च परिहीयते । वीर्यपारमितायां न च परिहीयते । ध्यानपारमितायां न च परिही
यते । प्रज्ञापारमितायां न च परिहीयते ॥ अध्यात्मशून्यतायां न च परिहीयते । बहिर्धाशून्यतायां न च परिहीयते । अध्यात्मबहिर्धाशून्य
तायां न च परिहीयते । शून्यताशून्यतायां न च परिहीयते । महाशून्यतायां न च परिहीयते । परमार्थशून्यतायां न च परिहीयते । संस्कृतशून्य



प्र१४५

तायां न च परिहीयते। असंस्कृतशून्यताया न च परिहीयते। अत्यन्तशून्यताया न च परिहीयते। अनवराग्रशून्यताया न च परिहीयते। अनवकारशू-
न्यताया न च परिहीयते। प्रकृतिशून्यताया न च परिहीयते। सर्वधर्मशून्यताया न च परिहीयते। स्वलक्षणशून्यताया न च परिहीयते। अनुपलम्भ-
शून्यताया न च परिहीयते। अभावशून्यताया न च परिहीयते। स्वभावशून्यताया न च परिहीयते। अभावस्वभावशून्यताया न च परिहीयते। च-
तुर्भ्यः स्मृत्युपस्थानेभ्यो न परिहीयते। चतुर्भ्यः सम्यक्प्रहाणेभ्यो न परिहीयते। चतुर्भ्यो वैशारद्येभ्यो न परिहीयते। पञ्चभ्यो बलेभ्यो न परिहीयते।
सप्तभ्यो बोध्यङ्गेभ्यो न परिहीयते। आर्याष्टाङ्गमार्गान्न परिहीयते। चतुर्भ्य आर्यसत्येभ्यो न परिहीयते। चतुर्भ्यो ध्यानेभ्यो न परिहीयते। चतुर्भ्योऽप्रमा-
णेभ्यो न परिहीयते। चतसृभ्य आरूप्यसमापत्तिभ्यो न परिहीयते। अष्टभ्यो विमोक्षमुखेभ्यो न परिहीयते। अभिज्ञेभ्यो न परिहीयते। समा-
धिभ्यो न परिहीयते। धारणीमुखेभ्यो न परिहीयते। नवभ्यो न परिहीयते। चतुर्भ्यो वैशारद्यविहारेभ्यो न परिहीयते। शून्यतानिमित्ताप्र-
णिहितेभ्यो न परिहीयते। अभिज्ञाभ्यो न परिहीयते। समाधिभ्यो न परिहीयते। धारणीमुखेभ्यो न परिहीयते। दशभ्यस्तथागतबलेभ्यो न परिही-
यते। चतुर्भ्यो वैशारद्येभ्यो न परिहीयते। चतसृभ्यः प्रतिसंविद्भ्यो न परिहीयते। महामैत्र्या न परिहीयते। महाकरुणाया न परिहीयते। अष्टा-
दशावेणिकबुद्धधर्मेभ्यो न परिहीयते। अनुत्तरायाः सम्यक्संबोधेः॥ एवं खलु बोधिसत्त्वो महासत्त्वस्तस्मिं समये सर्वबोधिपक्षधर्मेषु सम-
न्वागतो भवति। न परिहीयते यावदनुत्तरां सम्यक्संबोधिमभिसंबुध्यते। उपायकौशलपरिगृहीतो बोधिसत्त्वो महासत्त्वो दिव्यचक्षुषा कु-
शलधर्मेस्त्रीक्ष्णा तनाशिवास्यन्द्रियाणि एवं क्रियधानश्रावकप्रत्येकबुद्धा। पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्यैवं भवति। दीर्घरात्रमिमे सत्त्वा-
श्चतुर्षु विपर्यासेषु चरिता नित्यसंज्ञया सुखसंज्ञया आत्मसंज्ञया शुभसंज्ञया। तेषामर्थाय यत्नं करिष्यामि। तथा चानुत्तरां सम्यक्संबोधिमभिसं-
बुध्य धर्मं देशयिष्यामि। तथा नित्यमिति वा सुखमिति वा आत्मेति वा शुभमिति वा सम्पदा चान्यापि न भविष्यति। एतैश्चित्तोत्पादैः समन्वागत उपा-
यकौशलेन च प्रज्ञापारमितायां चरति। न च भूतकोटिं साक्षात्करोति। अपरिपूर्णैर्दशभिस्तथागतबलैरपरिपूर्णैश्चतुर्भिर्वैशारद्यैरपरिपूर्णै-
श्चतसृभिः प्रतिसंविद्भिरपरिपूर्णैश्चतसृभिः प्रतिसंविद्भिरपरिपूर्णैरष्टादशभिरावेणिकैर्बुद्धधर्मैरपरिपूर्णया महामैत्र्या अपरि-
पूर्णया महाकरुणया शून्यतानिमित्ताप्रणिहितसमाधिविमोक्षमुखैर्नैव तस्मिं समये बोधिसत्त्वो महासत्त्वः समापद्यते न च भूतको-

टिं साक्षात्करोति। यावदनुत्तरां सम्यक्संबोधिमभिसंबुध्यते॥ पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्यैवं भवति। दीर्घरात्रमिमे सत्त्वा उप-
लम्भचरिता आत्मेति वा सत्त्व इति वा जीव इति वा जन्तुरिति वा पोष इति वा पुरुष इति वा पुद्गल इति वा मनुज इति वा मानव इति वा
कारक इति वा वेदक इति वा जानक इति वा पश्यक इति वा रूपमिति वा वेदनेति वा संज्ञेति वा संस्कारा इति वा विज्ञानमिति वा स्कन्ध इ-
ति वा धातव इति वा आयतनानीति वा प्रतीत्यसमुत्पाद इति वा दानपारमितेति वा शीलपारमितेति वा क्षान्तिपारमितेति वा वी-
र्यपारमितेति वा ध्यानपारमितेति वा प्रज्ञापारमितेति वा अध्यात्मशून्यतेति वा बहिर्धाशून्यतेति वा शून्यताशून्यतेति वा महाशून्यतेति
वा परमार्थशून्यतेति संस्कृतशून्यतेति वा अत्यन्तशून्यतेति वा अनवराग्रशून्यतेति अनवकारशून्यतेति वा प्रकृतिशून्यतेति
वा सर्वधर्मशून्यतेति वा स्वलक्षणशून्यतेति वा अनुपलम्भशून्यतेति वा अभावशून्यतेति वा स्वभावशून्यतेति वा अभावस्वभावशून्यतेति वा॥ स्मृत्यु-
पस्थानानीति वा सम्यक्प्रहाणानीति वा ऋद्धिपादा इति वा इन्द्रियाणीति वा बलानीति वा बोध्यङ्गानीति वा आर्याष्टाङ्गमार्ग इति वा
आर्यसत्यानीति वा ध्यानानीति वा अप्रमाणानीति वा आरूप्यसमापत्तय इति वा विमोक्षा इति वा अनुपूर्वविहारसमापत्तय इति वा शू-
न्यतानिमित्ताप्रणिहितविमोक्षमुखानीति वा अभिज्ञा इति वा समाधय इति वा धारणीमुखानीति वा तथागतबलानीति वा वैशार-
द्यानीति वा प्रतिसंविद इति वा महामैत्रीति वा महाकरुणेति वा आवेणिका इति वा बुद्धधर्मा इति वा॥ सोऽहं तथा करिष्यामि। यथा
मेऽनुत्तरां सम्यक्संबोधिमभिसंबुद्धस्य सत्त्वा नाम तदुपलम्भदृष्टिर्न भविष्यति। एतैश्चित्तोत्पादैः समन्वागतो नैवोपायकौशलेन प्रज्ञापा-
रमितायां चरन् भूतकोटिं साक्षात्करोति। अपरिपूर्णैर्दशभिस्तथागतबलैरपरिपूर्णैश्चतुर्भिर्वैशारद्यैरपरिपूर्णाभिश्चतसृभिः
प्रतिसंविद्भिरपरिपूर्णैरष्टादशभिरावेणिकैर्बुद्धधर्मैरपरिपूर्णया महामैत्र्या अपरिपूर्णया महाकरुणया अपरिपूर्णया शून्य-
तानिमित्ताप्रणिहितसमाधिमुखानि मुखानि तस्मिन्समये बोधिसत्त्वस्य महासत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतः। एवं एव
ति। दीर्घरात्रमिमे सत्त्वा निमित्ते चरिताः स्त्रीनिमित्ते वा पुरुषनिमित्ते वा रूपनिमित्ते वा वेदनानिमित्ते वा संज्ञानिमित्ते वा संस्कार-


0 cms.
5
10
15
20
25
30
35
40

प्रथम

निमित्तीकृत्वा। संस्कारनिमित्तीकृत्वा। विज्ञाननिमित्तीकृत्वा। चक्षुर्निमित्तीकृत्वा। श्रोत्रनिमित्तीकृत्वा। घ्राणनिमित्तीकृत्वा। जिह्वानिमित्तीकृत्वा। कायनिमित्तीकृत्वा। मनोविज्ञान
निमित्तीकृत्वा॥ चक्षुःसंस्पर्शनिमित्तीकृत्वा। श्रोत्रसंस्पर्शनिमित्तीकृत्वा। घ्राणसंस्पर्शनिमित्तीकृत्वा। जिह्वासंस्पर्शनिमित्तीकृत्वा। कायसंस्पर्शनिमित्तीकृत्वा। मनः
संस्पर्शनिमित्तीकृत्वा। चक्षुःसंस्पर्शप्रत्ययवेदनानिमित्तीकृत्वा। श्रोत्रसंस्पर्शप्रत्ययवेदनानिमित्तीकृत्वा। घ्राणसंस्पर्शप्रत्ययवेदनानिमित्तीकृत्वा। जि
ह्वासंस्पर्शप्रत्ययवेदनानिमित्तीकृत्वा। घ्राणसंस्पर्शप्रत्ययवेदनानिमित्तीकृत्वा। कायसंस्पर्शप्रत्ययवेदनानिमित्तीकृत्वा॥ पृथिवीधातुनिमित्तीकृत्वा। अब्धा
तुनिमित्तीकृत्वा। तेजोधातुनिमित्तीकृत्वा। वायुधातुनिमित्तीकृत्वा। आकाशधातुनिमित्तीकृत्वा। विज्ञानधातुनिमित्तीकृत्वा। अविद्यानिमित्तीकृत्वा। संस्कारनिमि
त्तीकृत्वा। विज्ञाननिमित्तीकृत्वा। नामरूपनिमित्तीकृत्वा॥ षडायतननिमित्तीकृत्वा। स्पर्शनिमित्तीकृत्वा। वेदनानिमित्तीकृत्वा। तृष्णानिमित्तीकृत्वा॥ उपादाननिमित्ती
कृत्वा। भवनिमित्तीकृत्वा। जातिनिमित्तीकृत्वा। जरामरणनिमित्तीकृत्वा॥ दानपारमितानिमित्तीकृत्वा॥ शीलपारमितानिमित्तीकृत्वा। क्षान्तिपारमितानिमित्तीकृत्वा
वीर्यपारमितानिमित्तीकृत्वा॥ ध्यानपारमितानिमित्तीकृत्वा। प्रज्ञापारमितानिमित्तीकृत्वा। अध्यात्मशून्यतानिमित्तीकृत्वा। बहिर्धाशून्यतानिमित्तीकृत्वा
अध्यात्मबहिर्धाशून्यतानिमित्तीकृत्वा। शून्यताशून्यतानिमित्तीकृत्वा महाशून्यतानिमित्तीकृत्वा। परमार्थशून्यतानिमित्तीकृत्वा। संस्कृ
तशून्यतानिमित्तीकृत्वा। असंस्कृतशून्यतानिमित्तीकृत्वा। अत्यन्तशून्यतानिमित्तीकृत्वा। अनवकारशून्यतानि
मित्तीकृत्वा। प्रकृतिशून्यतानिमित्तीकृत्वा। सर्वधर्मशून्यतानिमित्तीकृत्वा। स्वलक्षणशून्यतानिमित्तीकृत्वा॥ इन्द्रियनिमित्तीकृत्वा। अनुपलम्भशू
न्यतानिमित्तीकृत्वा। अभावशून्यतानिमित्तीकृत्वा। स्वभावशून्यतानिमित्तीकृत्वा। अभावस्वभावशून्यतानिमित्तीकृत्वा॥ स्मृत्युपस्थाननिमित्तीकृत्वा
। सम्यक्प्रहाणनिमित्तीकृत्वा। ऋद्धिपादनिमित्तीकृत्वा। इन्द्रियनिमित्तीकृत्वा। बलनिमित्तीकृत्वा॥ बोध्यङ्गनिमित्तीकृत्वा। आर्याष्टाङ्गनिमित्ती
कृत्वा। आर्यसत्यनिमित्तीकृत्वा। ध्याननिमित्तीकृत्वा। अप्रमाणनिमित्तीकृत्वा। आरूप्यसमापत्तिनिमित्तीकृत्वा। विमोक्षनिमित्तीकृत्वा। अनुपूर्वविहा
रसमापत्तिनिमित्तीकृत्वा। शून्यतानिमित्ताप्रणिहितविमोक्षमुखनिमित्तीकृत्वा। अभिज्ञानिमित्तीकृत्वा। समाधिनिमित्तीकृत्वा। धारणीमुख
निमित्तीकृत्वा। तथागतबलनिमित्तीकृत्वा। वैशारद्यनिमित्तीकृत्वा॥ अर्हत्त्वनिमित्तीकृत्वा। प्रत्येकबोधिनिमित्तीकृत्वा। मार्गाकारज्ञतानिमित्तीकृत्वा। सर्वाका

२८०

नज्ञतानिमित्तीकृत्वा। सोऽहं [illegible] कनिष्यामि। [illegible] सम्यक्संबोधिमभिसम्बुद्ध्य तेषां सत्त्वानामर्थे दोषानतिविध्यति। [illegible]
समन्वागतो ऽनेन [illegible] कौशलेन प्रज्ञापारमितायां चरन् [illegible] कालेन नाति। अपरिपूर्णेषु [illegible] न परि
पूर्णीति [illegible] अपरिपूर्णेन श्रावकबुद्धधर्मैन परिपूर्णया महामैत्र्या अपरिपूर्णया महाकरुण
या शून्यता [illegible] विमोक्षमुखानि तस्मिन् समये बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतः [illegible]। दीर्घरात्रम
भिसत्त्वाः प्रतिपादयितव्याः [illegible] कृत्व ब्रह्मत्व लोकपालत्व चक्रवर्तित्वान्यभिलषति। कायमभिलषति। मनोऽभिलषति। रूपम
भिलषति। संज्ञामभिलषति। संस्कारानभिलषति। विज्ञानमभिलषति। चक्षुरभिलषति। श्रोत्रमभिलषति। घ्राणमभिलषति। जि
ह्वामभिलषति। कायमभिलषति। मनोऽभिलषति। रूपमभिलषति। शब्दमभिलषति। गन्धमभिलषति। रसमभिलषति। स्पर्शम
भिलषति। धर्मानभिलषति॥ चक्षुर्विज्ञानमभिलषति। श्रोत्रविज्ञानमभिलषति। घ्राणविज्ञानमभिलषति। श्रोत्रविज्ञानमभिल
षति। घ्राणविज्ञानमभिलषति। जिह्वाविज्ञानमभिलषति। कायविज्ञानमभिलषति। मनोविज्ञानमभिलषति। चक्षुःसंस्पर्शम
भिलषति। श्रोत्रसंस्पर्शमभिलषति। घ्राणसंस्पर्शमभिलषति। जिह्वासंस्पर्शमभिलषति। कायसंस्पर्शमभिलषति। मन
संस्पर्शमभिलषति॥ चक्षुःसंस्पर्शप्रत्ययवेदनामभिलषति। श्रोत्रसंस्पर्शप्रत्ययवेदनामभिलषति। घ्राणसंस्पर्शप्रत्ययवेदना
मभिलषति। घ्राणसंस्पर्शप्रत्ययवेदनामभिलषति। महाकरुणामभिलषति। श्रावकबुद्धधर्मानभिलषति। श्रोत्रआपत्तिफलम
भिलषति। आकाशधातुमभिलषति। विज्ञानधातुमभिलषति॥ अविद्यामभिलषति। संस्कारानभिलषति। विज्ञानमभिलष
ति। नामरूपमभिलषति। षडायतनमभिलषति। स्पर्शमभिलषति। वेदनामभिलषति। तृष्णामभिलषति। उपादानमभिल
षति। भवमभिलषति। जातिमभिलषति। जरामरणमभिलषति॥ दानपारमितामभिलषति। शीलपारमितामभिलषति।



